THE

SĀTHWATHA-SAMHITHA

(Pàncharàthiràgama)

EDITED BY

P. B. ANANTHA CHARIAR

SANSKRIT PANDIT

Printed and Published

By the

PROPRIETOR

OF

SRI SUDARSANA PRESS

COJEEVERAM.

1902.

Price-Rs. 2-8-0.

इह किल दुस्तरानन्त संसारपारावारनिमग्ना नाध्यात्मिकादि तापत्रय सन्तापितान् निखिलानपि जन्तू ननुजिघृक्षतो भगवतो लक्ष्मीपते मुंखादुद्गतं महोपनिषदाख्यं शास्त्रम् । यस्य किल सन्निधौ पश्चेतराणि कापालादीनि तन्त्राणि रात्रीयन्त इत्यपरा पञ्च-रात्र संज्ञापि प्रवर्तते ।

प्रमाण सार्वभौमताचास्य महाभारते ब्रह्मसूत्रे आगमप्रामाण्ये श्रीभाष्ये - श्रीपांचरात्राधिकरणे, पांचरात्र रक्षाया मन्येषु च बहुषु निबन्धनेषु सुस्पष्टमुद्घुष्यते ।

तदेतत्पञ्चरात्रशास्त्रं एकमूर्ति चतुर्मूर्ति नवमूर्ति प्राधान्यैः चतुस्त्रिवक्रप्राधान्येन च मन्त्रसिद्धान्ता गमसिद्धान्त तन्त्रसिद्धान्त तन्त्रान्तरसिद्धान्त संज्ञाभि श्चतुर्धाविभक्तम् ।

तस्यैतस्य सिद्धान्तचतुष्टयात्मकस्य पाञ्चरात्रशास्त्रस्य पाद्म पद्मोद्भवाद्या अष्टोत्तरशतं संहिताः प्रसिद्धाः ।

तासु च साक्षात भगवन्मुखोद्गततया रत्नत्रयमिति प्रथितासु श्रीसात्वत पौष्करजयाख्याभिधानासु तिसृषुसंहिता स्वन्यतमेयं सात्वत संहिता भगवतोवासुदेवस्य संकर्षणस्यच संवादरूपा तत्वहित पुरुषार्थ तत्साधनभगवदाराधनाद्यवबोधनेन बहूपकरोतिभाविनाम् । यामेवोद्दिश्य महाभारते कुरुपितामहो ज्ञानवृद्धो भीष्मएवं प्राह-

" ब्राह्मणैः क्षत्रियै वैश्यै श्शूद्रैश्च कृतलक्षणैः ।
अर्चनीयश्च सेव्यश्च कीर्तनीयश्च सर्वदा ॥
सात्वतं विधिमास्थाय गीतस्संकर्षणेनयः ।
द्वापरस्य युगस्यान्त आदौ कलियुगस्यच ॥ "इति ।

यद्यपीदं वचनं श्रीपाञ्चरात्र सामान्यपरमेव, कृत्स्नस्यापि तस्य सात्वतशास्त्र संज्ञत्वात्, अथापि संकर्षणगीतत्व रूपविशेषणस्यै त-न्मात्रा साधारणतया नामप्रसिद्ध्या च एत त्संहिता प्रधानाभिमता भवितुमर्हतीति वयं प्रतिपद्यामहे ।

तदेतादृश्या अस्या मुद्रणे प्रवृत्ता वयम् –

१. अस्मदीय श्री " हयवदन लीलासदन " पुस्तकाल-यस्थ मेकं ग्रन्थाक्षरै स्ताळपत्रेषु लिखितम् ,

२. विद्वद्वर्याणां श्रीपद्पुरनिवासिनां श्रीशैलानन्तपुरुष श्रीरङ्गा-चार्य स्वामिनां ताळपत्रलिखित मांध्राक्षर मय मपरम् ,

३. " तेषामेव ताळपत्रेष्वेव ग्रन्थाक्षरै र्लिखितमितरत् ,

४. " श्री विशाखपत्तन निवासिनां श्रीपरवस्तु यस् . पि. वि. रङ्गनाथस्वामिनां आर्यवरगुरूणां पुस्तकालयस्थं ताळपत्र लिखितं ग्रन्थाक्षरमय मन्यत ,

इति पुस्तक चतुष्टयाधारेणास्या श्शोधन मकार्ष्म । प्रायेणैषां पुस्तकाना मशुद्धिबहुळाना मेकरूपाणा मेवोपलब्धतया सम्भाव्यते महत्यशुद्धि रत्र । तथापि ग्रन्थलोपाभावमात्रेण तुष्यद्भिः कृतप्रह्वैः क्षन्तव्योयं दोष इति निवेदयति ।

प्र. अनन्ताचार्यः ।

सम्पादकः ।

सात्वतसंहिता ।

(पांचरात्रशास्त्रम्)

भवभयाभि तप्त निखिल जगत्समुज्जीवनकामेन

परमदयालुना भगवता वासुदेवेन

संकर्षणायोपदिष्टा

अष्टोत्तरशतसंख्येषु पांचरात्रसंहिता स्वन्यतमा

श्रीकांची प्रतिवादि भयंकर

अनन्ताचार्येण

परिशोधिता,

श्री सुदर्शनमुद्रारशालायां

अमुद्रत ।

१९०२

श्रीकांची ।

इदानीमेतन्मूल्यम् — २ - ८ - ०

4019

श्रियै नमः ।

श्री हयग्रीवाय नमः ।

॥ शास्त्रमुक्तावळी ॥

॥ श्रीपांचरात्रे श्रीसात्वत संहिता ॥

विष्णो राराधनपरा मुनयो मलयाचले ।
संस्थिता स्सिद्धगन्धर्व विद्याधर निषेविते ॥ १ ॥
कालेन केनचित्स्वर्गा द्रामदर्शन लालसः ।
तत्रावतीर्णो देवर्षि नारदो भगवन्मयः ॥ १ ॥
ज्ञात्वा तस्याचलां भक्ति देवः परशुलांछनः ।
प्रत्यक्षतां जगामाशु सानुकम्पेन चेतसा ॥ ३ ॥
ततः प्रहृष्टवदनः प्रोद्भिन्नपुलको मुनिः ।
पूजयामास तं देव मष्टांग पतनादिना ॥ ४ ॥
अथाह भगवान् रामो मधुराऽक्षरया गिरा ।
तवास्ति भक्ति रधिका जन्मबीज क्षयं करी ॥ ५ ॥
एषातु सात्विकी शुद्धा नित्यमव्यभिचारिणी ।
तिष्ठन्ति मुनयो येऽत्र प्रार्थयाना हरेः पदम् ॥ ६ ॥
तान् सात्वते क्रिया मार्गे मद्वाक्या द्याहियोजय ।
एवमुक्त्वातु तं विप्र मृषीणां हितकाम्यया ॥ ७ ॥
जगामा दर्शनं देव स्तस्माद्देशात्तदियथा ।
सतु हृष्टमना वाक्यं शिरसा चाभिवाद्य तत् ॥ ८ ॥
निर्जगामार्चयित्वाथ पुण्यै स्स्थानवरन्तु तत् ।
अपश्य दाश्रमं चान्यं नानाद्विज निषेवितम् ॥ ९ ॥

तरुपुष्पफलैराढ्यं वापी कूप ह्रदान्वितम् ।
सम्प्रहृष्ट स्तत स्तस्थे द्विजेन्द्रै रभिवादितः ॥ १० ॥
पूजितश्चार्घ्यपाद्याद्यै विनिवेशितविष्टरः ।
अथांजलिधरास्सर्वे प्रोत्फुल्ल नयनाम्बुजाः ॥ ११ ॥
वदन्ति जन्मसाफल्य मद्य न स्तव दर्शनात् ।
श्रुत्वा त त्प्रीति जनकं वाक्यं प्रणयपेशलम् ॥ १२ ॥
नमस्कृत्य हृषीकेशं मुनि रप्याह नारदः ।
मन्ये कृतार्थ मात्मानं नूनं विप्रवराह्यहम् ॥ १३ ॥
भवद्भिस्सह सम्बन्धो यस्य मेऽस्मिन्शुभाश्रमे ।
प्रेरितोहं भवतामर्थे देवेनाक्लिष्टकर्मणा ॥ १४ ॥
यत्तदेकहृदस्सर्व माकर्णयतसाम्प्रतम् ।
अद्यप्रभृतिदेवेश माराधयतकेशवम् ॥ १५ ॥
रहस्याम्नायविधिना शश्वन्मोक्षप्रदेनतु ।

ऋषयऊचुः ।

मुनेच्चिरप्रपन्नानां भक्तानांनोभवान्गतिः ॥ १६ ॥
नारायणपदप्राप्ते यच्छ्रेयस्तत्प्रकाशय ।

नारदः ।

यच्चोदितेन हलिना प्रागुम [क्तं] चक्रपाणिना ॥ १७ ॥
पारम्पर्यागतंतन्मे गदतश्शृणुतद्विजाः ।
पुराऽतीतेकृतप्राप्ते त्रेताख्येद्वापरेयुगे ॥ १८ ॥
ईषदारक्ततांयाते जगद्धातरिचाच्युते ।
आहसंकर्षणोविष्णुं ज्ञात्वाविनयवानपि ॥ १९ ॥
किमिदंदेवपश्यामि तवरूपविपर्ययम् ।
प्रहस्योवाचभगवा न्मेघगम्भीरयागिरा ॥ २० ॥

नायं सकालो यत्रासी स्त्वैकबहुलोजनः ।
अग्रागपरोलोक स्तद्वृत्तंधारयाम्यहम् ॥ २१ ॥

संकर्षण उवाच ।

कालस्वभावजःकेन कर्मणा राग ईदृशः ।
नछादयतिलोकानां त्वद्भक्तानां विशेषतः ॥ २२ ॥

श्रीभगवानुवाच ।

त्रिविधेनप्रकारेण परमंब्रह्मशाश्वतम् ।
आराधयन्तियेतेषां रागस्तिष्ठतिदूरतः ॥ २३ ॥

संकर्षण उवाच ।

भगवंस्त्रिविधं ब्रूहि - उपेयंब्रह्मलक्षणम् ।
हितार्थं च प्रपन्नानां व्यामोह विनिवृत्तये ॥ २४ ॥

श्रीभगवानुवाच ।

षाड्गुण्य विग्रहं देवं भास्वज्ज्वलन तेजसं ।
सर्वतः पाणिपादं त त्सर्वतोक्षि शिरोमुखम् ॥ २५ ॥
परमेतत्सनाख्यात मेकं सर्वाश्रयं तथा ।
एतत्सर्वं त्रयं चान्य ज्ज्ञानाद्यै र्भेदितगुणैः ॥ २६ ॥
विद्धि त द्व्यूहसंज्ञंवै निरायास फलप्रदम् ।
मुख्यानुवृत्तिभेदेन युक्तंज्ञानादिकैर्गुणैः ॥ २७ ॥
नानाकृति च तद्विद्धि वैभवं भुक्तिमुक्तिदम् ॥ २७॥ ॥

इति श्रीपांचरात्रे श्री सात्वत संहितायां प्रश्नप्रतिवचनंनाम

प्रथमः परिच्छेदः ॥ १ ॥

अथ द्वितीयः परिच्छेदः ।

श्रुत्वैव मच्युतमुखा देवदेवो हलायुधः ।
हितार्थं भवभीतानां पुनराह द्विजोत्तमाः ॥ १ ॥

संकर्षणः ।

विधिना कीदृशेनैव ह्युपास्या विहिता ऽत्रवै ।
उपासकानां भक्तानां समासाद्ब्रूहि मे विभो ॥ २ ॥

श्री भगवानुवाच ।

शृणु सम्य क्प्रवक्ष्यामि यदहं चोदित स्त्वया ।
यज्ञात्वा न पुन र्जन्म पुनरेवाप्नुया न्नरः ॥ ३ ॥
ब्राह्मणानां च सद्ब्रह्म वासुदेवाख्य याजिनां ।
लक्ष्यभूतं यदा सृष्टे र्हृदि स्थ माधिकारिणाम् ॥ ४ ॥
विवेकदं परं शास्त्रं ब्रह्मोपनिषदं महत् ।
दिव्यमार्ग समोपेतं मोक्षैक फललक्षणम् ॥ ५ ॥
तादृक्परिसृतं तस्मा जगदुद्धरणाय च ।
तदाद्य मुपदेक्ष्यामि यद्वेदे बहुभि स्स्थितम् ॥ ६ ॥
सिद्धिमोक्षप्रदं शुद्धं सरहस्यं महाफलम् ।
अष्टांग योग सिद्धानां ह्यागनिरतात्मनाम् ॥ ७ ॥
योगिना मधिकारस्स्या देकस्मिन् हृदयेशये ।
व्यामिश्रयाग मुक्तानां विप्राणां वेदवादिनाम् ॥ ८ ॥
समन्त्रेतु चतुर्व्यूहे त्वधिकारो नचान्यथा ।
त्रयाणां क्षत्रियादीनां प्रपन्नानांच तत्त्वतः ॥ ९ ॥
अमन्त्र मधिकारस्तु चतुर्व्यूहक्रियाक्रमे ।

सक्रिये मन्त्रचक्रेतु वैभवीये विलोकिनाम् ॥ १० ॥
ममता सन्निरस्तानां स्वकर्म निरतात्मनाम् ।
कर्मवाङ्मनसै स्सम्य ग्भक्तानां परमेश्वरे ॥ ११ ॥
चतुर्णा मधिकारोवै प्राप्ते दीक्षा क्रमे सति ।
एवं सम्प्रतिपन्नानां मन्त्रपूर्वं यथा स्थितम् ॥ १२ ॥
विधान मेक मूर्तीयं समाकर्णय साम्प्रतम् ।
प्रशस्ते विजने शुभे गन्धलिप्ते धरातले ॥ १३ ॥
सुधूपिते घ्यपुष्पाढ्ये वर्णचक्रं प्रसाध्यच ।
यस्मि न्प्रतिष्ठितं विश्व माब्रह्मभुवनान्तिकम् ॥ १४ ॥
येनो दितेन जगतः प्रभव स्समनन्तरम् ।
स्वात्म न्युपरते यस्मि न्प्रळय स्सम्प्रजायते ॥ १५ ॥
प्रेरकं चन्द्रसूर्याभ्यां सबाह्याभ्यन्तरन्तु यत् ।
नित्योदितं यदक्षस्थं वर्ण मीश्वरवाचकम् ॥ १६ ॥
यत्र स्थानविभागेन वागात्मा भगवान् स्थितः ।
अकाराद्यो विसर्गान्त स्सौरं चान्द्रं कळागणः ॥ १७ ॥
ह्रस्वदीर्घविभागेन नाभौ यत्र द्विरष्टकः ।
कादिभान्तो घ्यरान्तस्थः प्राकृत स्तत्व संचयः ॥ १८ ॥
पृथिव्यादि प्रकृत्यन्त युग्मयोगेन लाङ्गलिन् ।
कळिना देहभृत्कालो नेमिगो नवलक्षणः ॥ १९ ॥
मकाराद्यो विसर्गान्तो यत्र पृथ्वीगण स्स्वयम् ।
कालवैश्वानर स्साक्षा न्मार्ताण्डायुतसन्निभः ॥ २० ॥
ज्वाला ऽ युतसहस्राढ्यो वर्णान्तो भगवान् स्थितः ।
आमध्या त्प्रथिपर्यन्तं नमोन्तावर्णसन्ततिः ॥ २१ ॥
उच्चार्या द्यादिना भ्यर्च्य विद्याबीजंहि चक्रराट् ।
तत स्समुद्धरे न्मन्त्रं परमात्मनि वाचकम् ॥ २२ ॥

गळन्त ममृतमस्य मचिरा न्मोक्षसिद्धिदम् ।
भक्षस्थ मुद्धरे त्पूर्वं नेमे ष्षष्ठ मनन्तरम् ॥ २३ ॥
नाभिद्वितीयेना क्रान्तं द्वितीय मिद मक्षरम् ।
द्वितीयं दशसंयोगि (?) तदादौ चाष्टमा त्परम् ॥ २४ ॥
नाभे स्त्रयोदशोपेतं द्वितीय मिद मक्षरम् ।
अथ द्वितीयं नवमा न्नाभीतुर्या दिनान्वितम् ॥ २५ ॥
द्वितीय मष्टमा द्वर्णं केवलं विद्धि पंचमम् ।
निज्ञानपाद मादाय त्र्यक्षरं तदनन्तरम् ॥ २६ ॥
आद्य मेकादशा द्वर्णं भिन्नं नाभ्यपरेणतु ।
नेमे स्तृतीयवर्णस्य तत स्तमुपरि न्यसेत ॥ २७ ॥
मन्त्रान्तं नवमं स्रोत द्दशमं मे निबोधतु ।
नाभिद्वितीयेना क्रान्तं माग्वर्णं च्चाष्टमारगम् ॥ २८ ॥
नेमे द्वितीयं तदनु नेमे रादाय चाष्टकम् ।
तदुद्दशा त्तृतीयंच स्थितं तत्पंचमोपरि ॥ २९ ॥
त्रयोदश मिदं विद्धि नवमा द्परं ततः ।
षष्ठस्य नेमिवर्णस्य चोर्ध्वं तत्त्रितयं न्यसेत् ॥ ३० ॥
युक्तं नाभितृतीयेन ह्यथ षोडश मुच्यते ।
द्वितीयं दशमा द्वर्णा न्नाभ्येकादशसंयुतम् ॥ ३१ ॥
चैतन्याय पदं दद्या त्तनमस्क मतः परम् ।
द्वाविंशार्णो ह्ययं मन्त्रः पदै ष्षड्भि रलंकृतः ॥ ३२ ॥
तत्रैकार्णं पदं ज्ञानं चतुर्वर्णं पदं बलम् ।
षडक्षरंत्वा प्यैश्वर्यं वीर्यं पंचाक्षरं परम् ॥ ३३ ॥
चतुर्वर्णं पदं तेज श्शक्तिं स्या द्व्यक्षरंच यत ।
तेजो वीर्यं बलं शक्ति रैश्वर्यं ज्ञानमेवच ॥ ३४ ॥

हृगस्त्रं कवचं शैखं शिरोहच्च यथाक्रमम् ।
मन्त्र स्समाधिविषये नानाभूमिजयेषुच ॥ ३५ ॥

निराकारो निरंगश्च स्मर्तव्यो ब्रह्मलक्षणः ।
तत्प्राप्त्युपाये प्रथमे यागहोमादिकेतु वै ॥ ३६ ॥

साकारं संस्मरे त्सांगं परिवारेण चावृतम् ।
आनीता व्यक्ततां येन स्वयं ज्ञानादयो गुणाः ॥ ३७ ॥

शश्व यागसमाप्त्यर्थं कर्मणा मनुकंपया ।
सोनंग स्संस्मृतो मन्त्रो भक्तिश्रद्धावशेनतु ॥ ३८ ॥

फलं यच्छति वै नूनं नित्यं तद्भावितात्मनां ।
प्राधान्येन कृताः स्थैर्यं मोक्षो यत्रा नुषंगतः ॥ ३९ ॥

तत्र तद्विघ्नशान्त्यर्थं मन्त्रार्थं विद्धि मन्त्रपम् ।
विपर्ययेतु नेत्रान्तो मन्त्रो यस्मा न्महामते ॥ ४० ॥

दृग्दृष्टिशुद्धमार्गाणां क्व विघ्ना श्शान्तचेतसाम् ।
स्वक मन्तर्गते तेज स्स्वातन्त्र्याञ्च बहिष्कृतम् ॥ ४१ ॥

येन येन हि मन्त्रेण सन्न नेत्रान्वित स्स्मृतः ।
स्वप्रकाश स्त्वनुपमो येन येन हृदन्तरे ॥ ४२ ॥

सितासित स्समाकृष्टि स्सतु तद्वाचको सितः ।
अथ मन्त्रवरस्यास्य शृणुष्वा राधनं यथा ॥ ४३ ॥

सबाह्याभ्यन्तरावस्थं समार्थं ममलेक्षण ।
परिच्युतमल स्स्नात श्शुद्धवासा जितेन्द्रियः ॥ ४४ ॥

वाग्यतः पुष्पदर्भाद्यै द्वाराग्रस्थं पतत्रिपम् ।
सचक्रं पूजयित्वादौ संविशे द्भगवद्गृहम् ॥ ४५ ॥

उपार्जितं पुरस्ता द्वै यागोपकरणं महत् ।
तत्सर्वं दक्षिणे कृत्वा वामेतु करकं न्यसेत् ॥ ४६ ॥

गाळितेनाम्भसा पूर्ण मध्ये भद्रासनं न्यसेत् ।
मृत्काष्ठोपलधातूत्थ मेकद्वित्रिशतंतु वा ॥ ४७ ॥
चतुरश्र मथाष्टाश्रं चतुरश्रयुतंतु वा ।
चतुष्पाद्समायुक्तं चतुरावरणांकितम् ॥ ४८ ॥
मकरास्यप्रणाळन्तु प्रमाणेनो पलक्षितम् ।
तदध श्रोत्तरस्यां वै चलं पक्ष्मान्तराश्रितम् ॥ ४९ ॥
शंखचक्रांकितं कुर्या जलाधारं सुलक्षणम् ।
अथो पविश्य पैद्राभे काष्ठजेवाऽजिनासने ॥ ५० ॥
बद्धपद्मासनः कुर्या न्यासं मन्त्रवरेणतु ।
अभिन्नं मस्तके ताव दादित्या दुपयन्नयसेत ॥ ५१ ॥
व्यापकत्वेन तदनु विन्यसे द्भिन्नलक्षणम् ।
अंगुष्ठद्वितया च्चाव त्कनिष्ठाद्वितयावधि ॥ ५२ ॥
ज्ञानाद्यं वीर्यपर्यन्तं विन्यसे दंगपंचकम् ।
मूलव द्व्यापकत्वेन नेत्रमूर्ध्वँगुळीषुच ॥ ५३ ॥
आब्रह्मरन्ध्रा त्पादान्त मथ मन्त्रन्तु विग्रहे ।
ततस्तु हृदये ज्ञानं यतो भज्येत तत्र तत् ॥ ५४ ॥
ऐश्वर्यं शिरसो देशे यस्मा दुपरि तिष्ठति ।
प्राकृतं तात्विकं वापि सर्वत्र कमलेक्षण ॥ ५५ ॥
हार्दाग्रे रूर्ध्वगायांतु शिखायां शक्तिमन्त्रराट् ।
बलं चाखिलगात्राणां तद्गतं वायुना सह ॥ ५६ ॥
मूर्छितं सर्वगात्रे यं तद्वीर्यं हस्तयो न्यसेत् ।
अन्तर्बोधस्वरूपं य त्प्राकृतध्वान्तशान्तिकृत ॥ ५७ ॥
तेज स्त त्तैजसे स्थाने न्यासकाले समस्यते ।
चतुःपंचनवद्वारे देहे देवगृहे पुरा ॥ ५८ ॥

न्यस्यैव मभिमानन्तु मन्त्राख्य मवलम्ब्यच ।
मनस्तुपरतं कुर्या दक्षमामं बहि स्स्थितम् ॥ ५९ ॥
चित्तं बुद्धौ विनिक्षिप्य तां बुद्धिं ज्ञानगोचरे ।
ज्ञानभावनया कर्म कुर्या द्वै पारमार्थिकम् ॥ ६० ॥
चतु श्चक्रे नवद्वारे देहे देवगृहे पुरा ।
कण्ठकूपधराकढं हत्पद्मं य दधोमुखम् ॥ ६१ ॥
तत्कर्णिका वने मध्ये कड्मुर्ध्वमुखंतु यत् ।
शब्दब्यक्ति स्तदूर्ध्वेतु स्थिताकेंन्द्वग्निलक्षणा ॥ ६२ ॥
त्रिदोषिभास्वरा नाडी त्वव्यक्त ध्वनिविग्रहा ।
व्यस्तं चक्रत्रयस्योर्ध्वे वर्तते या महामते ॥ ६३ ॥
निस्सृता ब्रह्मरन्ध्रेण गता सूर्यपथात्परम् ।
वायुद्वारेण पाताळं भित्वा याता सुगोचरन् ॥ ६४ ॥
संकल्पाविषय स्सर्वं स्तद्ब्रह्मं प्रतितिष्ठति ।
सूत्रे मणिगणायद्व न्मध्यनाडी ह्यत स्स्मृता ॥ ६५ ॥
लक्षस्थानेतु पूर्वोक्ते तस्या मभ्यन्तरेतु वै ।
सम्पुटे शशिसूर्याख्ये निमेषोन्मेषलक्षणे ॥ ६६ ॥
तत्रार्कं चाब्ज मालम्ब्य परा वाग्भ्रमरी स्थिता ।
या सर्व मन्त्रजननी शक्तिश्शान्तात्मनो विभोः ॥ ६७ ॥
वदन्ति वर्णजं नादं शब्दब्रह्मेति यत्स्मृतम् ।
अकार पूर्वो ह्यान्तश्च धारा सन्तान रूपधृक् ॥ ६८ ॥
नादावस्थान गगने देवो ऽनन्तसमन्वितः ।
शान्त स्संवित्स्वरूपस्तु भक्तानुग्रह काम्यया ॥ ६९ ॥
अनौपम्येन वपुषा ह्यमूर्तो मूर्ततां गतः ।
विश्वमाप्याययत्कान्त्या पूर्णेन्दुयुत तुल्यया ॥ ७० ॥

वरदाभयदेनैव शंखचक्रांकितेनतु ।
त्रैलोक्यो द्धृति दक्षेण युक्तः पाणिद्वयेन तु ॥ ७१ ॥
रश्मिभि र्भास्करो यद्व त्समुद्रइव चोर्मिभिः ।
सम्मूर्तिभि स्सूर्तीभि रच्युताद्याभि रच्युतम् ॥ ७२ ॥
दीप्तिमद्भिरमूर्तैस्तु सुधाकल्लोलसंकुलैः ।
पूर्ण आभरणै स्सर्वै र्निर्विकारांघ्रिविग्रहः ॥ ७३ ॥
ततः स्वाब्जकमध्यात्तु च्युतामूर्ध्वस्थितां स्मरेत ।
गंगांभगवतो मूर्ध्नि तेनामृतजलेनतु ॥ ७४ ॥
अर्घ्याद्यखिलभोगानां कार्या वै शुभकल्पना ।
तैः क्रमात्प्रीणये द्देव माद्यन्तुर्यपदेस्थितम् ॥ ७५ ॥
प्रणवत्रितयं चोक्त्वा प्रीयतां मे परः प्रभुः ।
अथ कर्मात्म तत्त्वेतु कृतकृत्ये सति प्रभुः ॥ ७६ ॥
आस्ते विलाप्य स्वंरूपं नित्यं व्यक्ता कृतं च यत् ॥ ७६ ॥

इति श्रीपाञ्चरात्रे श्रीसात्वतसंहितायाम्

द्वितीयः परिच्छेदः ॥ २ ॥

अथ तृतीयः परिच्छेदः ।

नारदः ।

पुनराह जगन्नाथः प्रसंगेन मुनीश्वराः ।
परमाराधनं प्राग्व त्स्वस्य परमात्मनः ॥ १ ॥

श्रीभगवानुवाच ।

हवर्णं कर्णिकायान्तु सुषुम्नाख्येपदेत्वधः ।
चतुर्धा प्रभवाख्येन क्रमेण तमजंयजेत ॥ २ ॥
ज्ञानविद्या चतुष्केण यथा तदवधारय ।
वेदकत्वेन भगवान् ब्रह्मसंवलिताकृतिः ॥ ३ ॥
स्तम्बवत्कर्णिकामध्ये स्थित्वा वेद्यत्व मेतिच ।
स्वयमेवो पकाराय कर्मिणां ब्रह्मयाजिनां ॥ ४ ॥
प्राग्भागादुत्तरं याव द्गुण भेदेन लांगलिन् ।
विभजत्यात्मनाऽत्मानं वासुदेवः परः प्रभुः ॥ ५ ॥
अलुप्त स्वरूपस्तु प्राग्भागे षड्गुणात्मना ।
बलसंवलिते नैव ज्ञानेनास्तेऽथदक्षिणे ॥ ६ ॥
ऐश्वर्येणतु वीर्येण प्रत्यग्भागे प्रतिष्ठितः ।
तेज श्शक्त्या त्मना सौम्ये संस्थितः परमेश्वरः ॥ ७ ॥
यद्यप्यरूपो भगवान् व्यूहात्मा गुणलक्षणः ।
अत्रापि पूर्वमेवोक्तं रूप मस्यो पचर्यते ॥ ८ ॥
किन्तु द्वितीयमूर्तेर्वै शुभपाणितल द्वये ।
स्फुटो रेखामय श्शंख स्तुव्यक्तं लांगलं महत् ॥ ९ ॥
रम्येणुणा तृतीयस्य दक्षिणाभिहितः करः ।
तुर्यस्यासिवरेणव शंखमाभ्यां करद्वये ॥ १० ॥
अधाङ्मुखः करवशा दूर्ध्ववक्त्र स्स्वभावतः ।
एतावता लक्षणेन व्यक्तीभावं गतेनच ॥ ११ ॥
भावस्थितिं निबध्नाति व्यूहेऽस्मिन् साधकस्यतु ।
सादृश्यात्षड्गुणत्वाच्च समत्वाच्च विशेषतः ॥ १२ ॥
शान्तत्वा न्निष्कलत्वाच्च न भेदो विद्यते यतः ।
गुणद्वय द्वयेनैव यद्यप्युक्तं पुरा मया ॥ १३ ॥

एकैकं भगवद्रूपं मुख्यभूत्या तथापिहि ।
चतुष्कमवशिष्टं य द्गुणानां समवस्थिताः [?] ॥ १४ ॥
तद्भजेता द्गुणत्तिश्च - एकैकस्य च सर्वदा ।
एवं ज्ञात्वा स्मृतिं ब्राह्मीं स्वानन्दां स्वन्दलक्षणाम् ॥ १५ ॥
ब्रह्मामृतमये भोगे योजयेत्तमसावृतः ।
विशुद्धबुद्ध्या देहान्ते खविशत्यमलं पदम् ॥ १६ ॥
अथ मन्त्र चतुष्कन्तु ब्रह्मषाड्गुण्यवाचकम् ।
कर्मिणां मोक्षदं शश्व त्पूर्वोद्दिष्टं निबोधतु ॥ १७ ॥
आद्याद्याक्षगतं बीजं नाभिपूर्वं मतः परम् ।
अरादेकादशात्पूर्वं तस्याधो विनिवेशितं ॥ १८ ॥
वर्णं नेमे स्थतार्थं य त्तृतीय मिद मक्षरम् ।
द्वितीय मष्टमाद्वर्णं नाभे स्तुर्यादिनान्वितम् ॥ १९ ॥
ततस्तु नवमं नेमेः केवलं विद्धि पंचमम् ।
अष्टमादपरं वर्णं द्वितीयस्वर संयुतम् ॥ २० ॥
षष्ठमेत द्विजानीया त्सप्तमं दशमात्परम् ।
अथ द्वितीयदशमा दाद्यार्ध्वेंतु विन्यसेत् ॥ २१ ॥
अष्टमा त्तद्वितीयस्य मन्त्राणा मिद मष्टकम् ।
द्वितीया त्प्रथमं वर्णं मष्टमा दपरं ततः ॥ २२ ॥
[?] त्तादेकादशमोपेतं द्वितीयं नेमिमण्डलात् ।
पूर्व मेकादशा च्छुद्धं तादृक्नेमे स्तृतीयकम् ॥ २३ ॥
नेमिपूर्वञ्च तद्नु नाभे रेकादशांकितम् ।
नेमे ष्षष्ठ मथा दाय स्थितं तत्पंचमोपरि ॥ २४ ॥
ततो नाभिद्वितीयेन युक्तं नेमे स्तृतीयकम् ।
द्वितीयं केवलं नेमे राद्यायच महामते ॥ २५ ॥

कर्त्रे नमः पदं पश्चा द्योजये च्चतुरक्षरम् ।
एकविंशतिभि र्वर्णै रय म्मन्त्र उदाहृतः ॥ २६ ॥
अभिन्नः पदभेदेन भवे देकाधिकस्तु वै ।
प्राग्वर्णेन पदं पूर्वं पंचार्णं द्वितयं भवेत् ॥ २७ ॥
षडक्षरं तृतीयंतु चतुर्थं तद्वदेव हि ।
द्व्यक्षरं पंचमं विद्धि तद्व त्षष्ठं महामते ॥ २८ ॥
अथा परं महामन्त्रं द्वितीय मवधारय ।
यज्ज्ञात्वा नपुन र्जन्म भवत्याराधकस्य च ॥ २९ ॥
आदाया क्षरमध्यस्थं नाभिपूर्वं मतः परम् ।
पूर्वं नेमेस्तु तस्यैव योज्यं नाभित्रयोदशम् ॥ ३० ॥
द्वितीया दपरं वर्णं सर्वशक्त्यात्मने पदम् ।
द्वितीयं द्वादशा द्वर्णं द्वितीया त्प्रथमं ततः ॥ ३१ ॥
पंचमंच वहिष्ठभ्य स्त्रीनेता न्विद्धि केवलान् ।
नाभ्येकादशसंभिन्नं द्वितीयं चाष्टमां ततः ॥ ३२ ॥
नमोनमः पदयुतो मन्त्रश्चा [?] शाक्षरः ।
अस्यैकार्णं पदं पूर्वं त्र्यक्षरं तदनन्तरम् ॥ ३३ ॥
षडक्षरं तृतीयन्तु चतुर्थं चतुरक्षरम् ।
द्वितीयं द्व्यक्षरं चान्य त्पदयो स्सम्प्रकीर्तनम् ॥ ३४ ॥
तृतीय मथ वक्ष्यामि मन्त्रं मन्त्रविदांवर ।
यज्ज्ञात्वा मानसीं शुद्धिं परा मभ्येति कर्मणाम् ॥ ३५ ॥
बीज मादाय मध्यस्थ माद्य मेकादशा ततः ।
नेमे स्तृतीयं तदध ऊर्ध्वेनाभ्यपरन्तु वै ॥ ३६ ॥
अथाद्य माष्टमाद्वर्णं द्वितीयं स्वरसंयुतम् ।
तद्वदेकादशाद्यं वर्णमन्यं समाहरेत् ॥ ३७ ॥
दशमादपरं वर्णं नेमेरष्टकमन्ततः ।
युक्तनाभि द्वितीयेन त्वाद्यं नेम्यक्षरन्तुयत् ॥ ३८ ॥

नाभित्रयोदशोपेत मादायदशमात्परम् ।
द्वितीयं नवमाद्वर्णं यत्नाभ्यपरेणतु ॥ ३९ ॥
तत्संख्यं दशमाच्छुद्धं ततोवाह्यास्तु पञ्चमम् ।
नेमे द्वितीयं तदधो युक्तंनाभेः परेणतु ॥ ४० ॥
द्वितीयं दशमाद्वर्णं प्राणाय ध्यक्षरंपदम् ।
ततस्त्वेकादशादाद्यं केवलंच समाहरेत् ॥ ४१ ॥
अथ नाभि द्वितीयेन युक्तं नेमेस्तृतीयकम् ।
नाभित्रयोदशोपेतं बहिष्ठे ध्वपरन्ततः ॥ ४२ ॥
नेमेस्तृतीय स्योर्ध्वेतु नियमा दपरं न्यसेत ।
ततो नाभि द्वितीयेन युक्तं प्राङ्नेमिमण्डलात ॥ ४३ ॥
द्वितीय मथवैवाह्या त्सनमस्कंहि केवलम् ।
त्रयोविंशतिभिर्वर्णै रुपेतोह्येषमन्त्रराट् ॥ ४४ ॥
पदैः पूर्वोक्तसंख्यस्तु तेषां भेदोप्यथोच्यते ।
पूर्वमेकाक्षरंविद्धि द्वितीयंतु नवाक्षरम् ॥ ४५ ॥
तृतीयंद्व्यक्षरं चैव चतुर्थं त्र्यक्षरंस्मृतम् ।
षडक्षर मथोर्ध्वस्थं द्व्यक्षरन्त्वदनन्तरम् ॥ ४६ ॥
चतुर्थमधुनामन्त्रं निबोधगदतोमम ।
येन विज्ञात मात्रेण संविदुत्पद्यते परा ॥ ४७ ॥
आदायादौ यदक्षस्थं नाभिपूर्वमनन्तरम् ।
तत स्तृतीया दपरं वर्ण मादायलांगलिन् ॥ ४८ ॥
नेमेर्द्वितीयं तस्या ध स्तदधो नाभि पंचमम् ।
द्वितीयमष्टमाद्वर्णं तत्संख्यं नेमिमण्डलात् ॥ ४९ ॥
आदायैतद्द्वयंकुर्या द्युक्तं नाभ्यपरेणतु ।
अथ नाभितृतीयेन युक्तं वाह्यात्तु पंचमम् ॥ ५० ॥

आद्यात्पूर्वमथादाय नाभिसप्तम संयुतम् ।
द्वितीयमष्टमाद्वर्णं द्वितीयं नेमि मण्डलात् ॥ ५१ ॥
आदायाभ्यां नियोक्तव्यं द्वितीयं नाभिगोचरात ।
अथ द्वितीयं दशमा त्केवलं वर्ण माहरेत ॥ ५२ ॥
द्वितीय मष्टमा द्वर्णं तदूर्ध्वं दशमा त्परम् ।
नाभिद्वितीय मस्यैव योजये त्तदनन्तरम् ॥ ५३ ॥
ततो नेमिद्वितीयन्तु केवलं वर्ण माहरेत ।
अथ नाभे र्यदादिस्थं प्राग्वर्ण दशमादरात् ॥ ५४ ॥
तदधो द्वितीयं वाह्मा त्प्रथिवर्णं मनन्तरम् ।
युक्तं नाभिद्वितीयेन त्वादाय तदनन्तरम् ॥ ५५ ॥
नेमिद्वितीयसंल्यंय न्नमस्कारपदं ततः ।
अष्टादशाक्षरो ह्येष द्व्यधिकः पदसंख्यया ॥ ५६ ॥
एकार्णं पदमाद्यन्तु द्वितीयं चतुरक्षरम् ।
पंचाक्षरं तृतीयन्तु चतुर्थं चतुरक्षरम् ॥ ५७ ॥
तथैव पंचमं विद्धि ह्यन्तस्थद्व्यक्षरं स्मृतम् ।
यत्र यत्र पदानांच वर्णाधिक्य मुदाहृतम् ॥ ५८ ॥
तत्रादौ नाभिपूर्वन्तु व्याहृत्या वं पदं न्यसेत् ॥ ५८॥

इति श्रीपाञ्चरात्रे श्रीसात्वतसंहितायाम्

सुषुम्निव्यूहमन्त्रोद्धारो नाम

तृतीयः परिच्छेदः ॥ ३ ॥

अथ चतुर्थः परिच्छेदः ।

नारदः ।

अथाह भगवान् देवो रक्तराजीव लोचनः ।
प्रसन्न स्तुप्रसन्नास्यो विधान मपरं द्विजाः ॥ १ ॥

श्रीभगवानुवाच ।

येनात्मा स्वप्नएवात्मा कर्मिणा मनुकंपया ।
क्रमेण व्यक्ततां नीतो वाग्वर्णकमलोपरि ॥ २ ॥

अभिन्नपूर्णषाड्गुण्य विभवेनो पबृंहितम् ।
भाभि स्सितादिभि दींप्त मभिन्नाभि र्निरन्तरम् ॥ ३ ॥

अवलोक्यामलं देव मुदितं स्वेन तेजसा ।
कर्णिकाग्रं समाश्रित्य दिव्यं मन्त्रवरं पुनः ॥ ४ ॥

पश्येत्स्वयं स्वशक्त्यावै काले नालक्ष्य मूर्तिना ।
संहरन्तं च तद्रूपं व्यक्तं पूर्वोक्त लक्षणम् ॥ ५ ॥

एवं मन्त्रमयं देव मुपसंहृत्य लांगलिन् ।
आमूलात्कर्णिकाग्रंच सम्पूर्यास्ते स्वतेजसा ॥ ६ ॥

ब्रह्मयूप स्वरूपेण त्वाक्रम्य स्वभ्रद्दामते ।
सौम्यमूर्ति चतुष्कन्तु सर्वदिक्प्रसृतंचयत् ॥ ७ ॥

प्राच्यांसितेनवपुषा सूर्यकान्त्यधिकेनतु ।
व्यक्तिमभ्येति भगवान् वासुदेवा त्मना स्वयम् ॥ ८ ॥

पद्मराग समानेन तेजसा समनन्तरन् ।
उदेति दक्षिणस्यां वै प्रभुस्संकर्षणात्मना ॥ ९ ॥

घर्मांशुरश्मिसन्तप्त शतधामा धिकेनतु ।
रूपेण पश्चिमस्यां च व्यक्तं प्रद्युम्न संज्ञया ॥ १० ॥

शरद्गगन संकाश वर्णेन परमेश्वरः ।
समास्त उत्तरस्यां चा प्यनिरुद्धात्मनाततः ॥ ११ ॥

संस्थान मादि मूर्तेर्वै सर्वेषान्तु समंस्मृतम् ।
सूर्यकोटि प्रभास्सर्वे तेजसा कमलेक्षणाः ॥ १२ ॥

दन्तज्योत्स्ना वितानैस्तु प्रकटीकृत दिङ्मुखाः ।
पूर्णचन्द्रा युताकार मुक्ताहारा द्यलंकृताः ॥ १३ ॥

लसत्पीयूष सदृशै स्स्वाम्बरै स्स्रग्वरैर्युताः ।
वरायुधो द्योतिकरा स्स्वकैश्चिह्नै रनुज्झिताः ॥ १४ ॥

क्षोमोत्थितैस्तुकल्हारैः पादपद्म तलाङ्किताः ।
विनम्रजनसन्ताप शमनव्यापृताननाः ॥ १५ ॥

करुणा पूर्णहृदया जगदुद्धारणोद्यताः ।
स्वदेहतेज स्सम्भूत ज्वालामण्डल मध्यगाः ॥ १६ ॥

एव मेवैषभगवान् संपूज्यः प्रा क्रमयोगतः ।
एकैकेनतु भागेन प्रभवेन क्रमेणतु ॥ १७ ॥

पुनरेवा निरुद्धादी न्प्राङ्मूर्त्यन्तं महामते ।
क्रमान्निरन्तरैर्भोगै रभ्यर्च्यपरमेश्वरम् ॥ १८ ॥

प्रणवद्वितयेनैव बुद्ध्यातुसुविशुद्धया ।
अध्ययाख्येन विधिना ह्ययाग निरतै र्बुधैः ॥ १९ ॥

तथा भिन्नतनो र्मन्त्रं देवस्या स्य महात्मनः ।
विशाखयूप संज्ञस्य वक्ष्ये विद्याविवेकदम् ॥ २० ॥

वर्णमक्षस्थमादाय त्वाद्यमेकादशा त्ततः ।
भिन्ननाभि द्वितीयेन तृतीयं नेमिमण्डलात ॥ २१ ॥

द्वितीयं केवलं बाह्या तेजो रूपायवैपदम्।
ततस्त्वेकादशा त्पूर्वं केवलन्तु समाहरेत ॥ २२ ॥
तृतीयमक्षरं बाह्या युक्तं नाभ्यपरेण तु।
दशमा दपरं पूर्ण पूर्वमेकादशात्ततः ॥ २३ ॥
एकादश स्वराक्रान्त मुद्धरे त्तदनन्तरम्।
ततो नाभिद्वितीयेन युक्तं मत्यक्षरं हि यत ॥ २४ ॥
केवलं द्वितीयं बाह्या दाद्यमेकादशात्तथा।
नेमे स्तृतीयं तदनु द्वितीयं स्वरसंयुतम् ॥ २५ ॥
दशमादपरं शुद्धं पूर्वमेकादशा ततः।
नाभ्येकादश संयुक्तं सदन्ते ऽ मल लोचन ॥ २६ ॥
नाभे स्तृतीय संयुक्तं प्रथिवर्णं समाहरेत।
अथ नाभि द्वितीयेन युक्तं यत्पर मष्टमात ॥ २७ ॥
नेमि द्वितीयं तदनु नमस्कार समन्वितम्।
चतुर्विंशतिभि वर्णै युक्तो मन्त्रो ह्ययं महान् ॥ २८ ॥
प्रणवेन पदं चास्य पूर्वमेकाक्षरं स्मृतम्।
द्वितीयं त्र्यक्षरं प्रोक्तं पंचार्णं तदनन्तरम् ॥ २९ ॥
षडक्षरं चतुर्थन्तु सप्तार्णं चात्र पंचमम्।
पदन्तु द्व्यक्षरं षष्टं मन्त्रस्यास्य महामते ॥ ३० ॥
नानामन्त्रस्वरूपेण ह्यादिदेवः परो विभुः।
आदि मध्यावसानेषु स्थित स्सर्वस्य सर्वदा ॥ ३१ ॥
चतुर्व्यूहचतुष्के स्वे शान्तादि व्यक्तलक्षणे।
प्राधान्येन त्रयाणांच देवानामवतिष्ठते ॥ ३२ ॥
यथाम्बरस्थ स्सविता त्वेकएव महामते।
जलाश्रयाणिचाश्रित्य बहुत्वं सम्प्रदर्शयेत् ॥ ३३ ॥

एवमेकोपि भगवा न्नानामन्त्राश्रयेषुच ।
तुर्यादिपद संस्थेषु बहुत्व मुपयातिच ॥ २४ ॥
अनुग्रहार्थं भविनां नानाश्रद्धावशेनतु ।
चतुष्क मथ मन्त्राणां निबोधगदतो मम ॥ २५ ॥
सितादिवर्णव्यक्तीनां वाचकत्वेन वै क्रमात् ।
अक्षस्थं नाभिपूर्वंश्च वर्ण यद्दशमा त्परम् ॥ २६ ॥
नेमिपूर्व मथो नाभे स्त्रयोदशसमन्वितम् ।
द्वितीयं द्वादशा द्वर्णं द्वितीया त्परमं ततः ॥ २७ ॥
पंचमं च वह्निष्ठेभ्य स्त्वानेता न्विद्धि केवलान् ।
ततो ऽष्टमात् द्वितीयन्तु नाभ्येकादशभेदितम् ॥ २८ ॥
पंचार्णं वासुदेवाय पदंच तदनन्तरम् ।
त्रयोदशाक्षरो ह्येष प्रथमं परिकीर्तितः ॥ २९ ॥
क्रमेण वक्ष्या म्यन्येषा मुद्धारंतु यथा स्थितम् ।
अक्षस्थ मक्षरं नाभे द्वितीयं तदनन्तरम् ॥ ४० ॥
पूर्वमन्त्रानुसारेण ततो दद्या त्पदत्रयम् ।
अथात्र पंचदशमं नाभे रोंकारपूर्वकम् ॥ ४१ ॥
पदत्रयेण तेनैव संयुक्तं विद्धि मन्त्रपम् ।
अथ षोडशसंख्यं य न्नाभेः प्रणवपूर्वकम् ॥ ४२ ॥
पूर्वोक्तलक्षणानान्तु पदानां प्राङ्निवेश्यते ।
अस्मा न्मन्त्रत्रया द्विद्धि द्वयं प्राङ्मन्त्रसंख्यया ॥ ४३ ॥
एकएकार्णरहितः पदभेद मत श्शृणु ।
पदद्वयन्तु सर्वेषा माद्य मेकाक्षरं स्मृतम् ॥ ४४ ॥
ऽयक्षरं च तृतीयन्तु चतुर्थं चतुरक्षरम् ।
पंचाक्षरं पंचमं वै त्रयाणां समुदाहृतम् ॥ ४५ ॥

तदेकस्य चतुर्वर्णं प्रद्युम्नाख्यस्य लांगलिन् ।
एवं स्वप्नपदस्थस्य समासा त्परिकीर्तितम् ॥ ४६ ॥
ध्यानार्चनं समन्त्रंच भक्तानां हितकाम्यया ॥ ४६-॥

इति श्रीपांचरात्रे श्रीसात्वतसंहितायाम्

॥ चतुर्थः परिच्छेदः ॥

॥ अथ पंचमः परिच्छेदः ॥

नारदः ।

अथ विप्रवराभ्यः प्राह सर्वेश्वरो हरिः ।
व्यामोह विनिवृत्त्यर्थं भविनां सीरिणे स्फुटम् ॥ १ ॥

श्री भगवानुवाच ।

अनन्त सरसि क्षार्णे विश्रान्तं य न्महा मते ।
अकाराक्षर मृळन्तु नित्यं सर्वाश्रयाम्बुजम् ॥ २ ॥
अकाराक्षर नाळन्तु शेष सर्वणपल्लवम् ।
दिगष्टकं समाश्रित्य यत्त त्तिष्ठति चक्रवत् ॥ ३ ॥
तत्पत्रमध्ये भगवान् जाग्रत्संज्ञे पदे त्वथ ।
यष्टव्यो भावनीयश्च यथा त दधुनोच्यते ॥ ४ ॥
परं प्रणवबीजेन सम्पूर्णं स्वेन तेजसा ।
स्थित स्वकार्णिको ध्वांक्ष केसरान्तं निरीक्ष्यत्र ॥ ५ ॥

ततः प्रणव पूर्वात्तु ब्रह्मबीज चतुष्टयात् ।
कदम्बपुष्पसदृशं मरीचिशत संकुलात ॥ ६ ॥
दिक्क्रमेणादितो ध्याये द्विभोर्मूर्तेश्चतुष्टयम् ।
सुव्यक्त लक्षणं मात्रं विभावेनावृतं वहिः ॥ ७ ॥
स्फुलिंगकण तुल्येन समुद्भूतेन वैपरात् ।
वाचकान्त निविष्टेन व्यक्तता मागतेनच ॥ ८ ॥
तत्राद्यं भगवद्रूपं हिमकुन्देन्दुकान्तिमत् ।
चतुर्भुजं सौम्यवक्त्रं पुण्डरीकनिभेक्षणम् ॥ ९ ॥
पीतकौशेयवसनं सुवर्णध्वज शोभितम् ।
मुख्यदक्षिणहस्तेन भीताना मभयप्रदम् ॥ १० ॥
विद्याकोशस्तु वामेन संगृहीतश्च शंखराट् ।
पृष्ठगेह्यपरस्मिंश्च प्रोद्यतो दक्षिणेत्वरी ॥ ११ ॥
तथा विधे गदा वामे निषण्णा वसुधातले ।
सिन्दूरशिखराकार मेकवक्त्रं चतु र्भुजम् ॥ १२ ॥
अतसीपुष्पसंकाश वासोभृत्ताललांछितम् ।
मुख्येन पाणियुग्मेन तुल्यमाद्यस्य वै विभोः ॥ १३ ॥
सीरं चक्रंच हस्तेस्य मुसलन्तु गदाकरे ।
प्रावृण्णिशासमुदित खद्योतचय दीधितिम् ॥ १४ ॥
रक्तकौशेयवसनं मकरध्वज शोभितम् ।
एकवक्त्रं चतुर्बाहुं तृतीयं परमेश्वरम् ॥ १५ ॥
मुख्य हस्तद्वयं चास्य प्राग्वद्ध्येयं महामते ।
वामे परस्मिन् शार्ङ्गंश्च दक्षिणे बाणपंचकम् ॥ १६ ॥
अञ्जनाद्रि प्रतीकाशं सुसिताम्बर वेष्टितम् ।
चतुर्भुजं विशालाक्षं मृगलांछन भूषितम् ॥ १७ ॥

आदिवत्पाणि युगळ माद्यमस्यापि कीर्तितम् ।
दक्षिणादि क्रमेणाथ द्वाभ्यां वै खड्गखेटकौ ॥ १८ ॥

वनमाला धरास्सर्वे श्रीवत्सकृतलक्षणाः ।
शोभिताः कौस्तुभेनैव रत्नराजेन वक्षसि ॥ १९ ॥

किरीट मकुटैरम्यै र्हार केयूर नूपुरैः ।
ललाट तिलकै श्चित्रै स्स्फुरन्मकर कुण्डलैः ॥ २० ॥

स्रग्वरै र्विविधै र्माल्यैः कर्पूराद्यै र्विलेपनैः ।
रम्यैरलंकृताश्चैव भावनीया स्सदैवहि ॥ २१ ॥

पुनरप्ययवोगेन प्रागुदङ्मध्यमेदळे ।
सितकृष्णेन वपुषा चानिरुद्धं स्मरे त्प्रभुम् ॥ २२ ॥

उदक्पश्चिममध्यस्थे प्रद्युम्नं भावयेच्छदे ।
रूपेण कृष्णपीतेन ह्यप्ययावस्तरेत्तुवै ॥ २३ ॥

प्रत्यग्दक्षिणमध्यस्थे पीतरक्त वपुर्धरम् ।
स्मरे त्संकर्षणं देवं प्रतिस्रोतः क्रियाविधौ ॥ २४ ॥

मध्ये प्राग्दक्षिणस्यां च सितरक्तेन तेजसा ।
वासुदेवो जगन्नाथो भावनीयो महामते ॥ २५ ॥

अतिशुद्धा शयत्वेन स्फटिकोपलवद्विभुः ।
स्थानभेदं समासाद्य स्वचकान्ति द्दयात्तुवै ॥ २६ ॥

गृह्यातिशबळं रूप मुपसंहार लक्षणम् ।
क्रमशोथ चतुर्णांवै वक्ष्ये मन्त्रगणं शृणु ॥ २७ ॥

अक्षान्तर्गत मादाय नाभेः पूर्वं मतः परम् ।
भिन्ननाभि द्वितीयेन नेमिपूर्वमतः परम् ॥ २८ ॥

नाभिपंचमसंयुक्तं दशमा त्प्रथमन्ततः ।
तृतीयंच द्वितीयन्त नेमरादाय चांकयेत् ॥ २९ ॥

नाभिद्वितीयबीजेन नवमा दपरं ततः ।
तदधोविनियोक्तव्यं द्वितीयं द्वादशात्तुवै ॥ ३० ॥
पंचमेनाथ वै नाभे र्युक्तं कुर्या दनन्तरम् ।
अष्टमादपरं शुद्धं नेमिपूर्वं तथाविधम् ॥ ३१ ॥
युक्तंनाभि द्वितीयेन द्वितीयं नेमिमण्डलात् ।
भूय स्तत्केवलं दद्या त्पदं योगेश्वराय वै ॥ ३२ ॥
तदन्ते चक्रिणे शब्द मथ नेमे र्यदष्टकम् ।
पश्चिमेनान्वितं नाभे स्तदन्ते विनिवेश्यच ॥ ३३ ॥
शुद्ध मेकादशा त्पूर्व माद्यं तदनु चाष्टमात् ।
नेमे स्तृतीयेना क्रान्त ध्वजायाथ पदं न्यसेत् ॥ ३४ ॥
भिन्न मेकादशा त्पूर्वं नाभितुर्येण वै ततः ।
अष्टमा दपरं शुद्धं पंचमं नेमिमण्डलात् ॥ ३५ ॥
द्वितीय स्वरसंयुक्तं ससेथ त्र्यक्षरं (?) पदम् ।
वासुदेवाय तदनु सनमस्कं पदं भवेत् ॥ ३६ ॥
षट्त्रिंशदक्षरो मन्त्रो भेद स्तस्याधुनो च्यते ।
पद मेकादशार्णन्तु प्रथमं परिकीर्तितम् ॥ ३७ ॥
पंचाक्षरं द्वितीयन्तु तृतीयं त्र्यक्षरं स्मृतम् ।
षडक्षरं चतुर्थन्तु पंचार्णं पचमंतु वै ॥ ३८ ॥
षष्ठं सप्ताक्षरं विद्धि पदं पदविदां वर ।
प्रणवान्ते त्वथादाय द्वितीयं नाभिमण्डलात ॥ ३९ ॥
चतुर्दशेन वै नाभे र्युक्तं नेम्यष्टकं ततः ।
द्वितीयं दशमा च्छुद्ध मथ भूय स्समा हरेत् ॥ ४० ॥
तदधो नवमा दन्तं नाभे स्तुर्यादिनान्वितम् ।
एकादशस्वराक्रान्तं द्वितीयं दशमा ततः ॥ ४१ ॥

बाह्या दथाष्टमं नाभे युक्तं पंचदशेनतु ।
केवलं पंचमं नेमे द्वितीयं चाष्टमा ततः ॥ ४२ ॥
नेमे स्तृतीयेनाक्रान्तं वर्ण मेत त्समाहरेत् ।
युक्तं नाभे स्तृतीयेन प्रागरा त्प्रथमन्तु वै ॥ ४३ ॥
द्वितीयं दशमा द्वर्णं नाभे रेकादशांकितम् ।
पंचाक्षरं पदं दद्या तदन्ते तालकेतवे ॥ ४४ ॥
भूय स्तदवसानेतु पंचार्णं नीलवाससे ।
प्रथमा त्प्रथमं चाथ द्वितीय स्वरसंयुतम् ॥ ४५ ॥
केवलं नेमिपूर्वन्तु चाद्य मेकादशा ततः ।
बहिष्ठेभ्य श्चतुर्थन्तु द्वाभ्यां नाभेः परं न्यसेत ॥ ४६ ॥
द्वितीयं केवलं बाह्या त्संकर्षणाय वै पदम् ।
तृतीयं प्रथमं नेमे रादायाकारसंयुतम् ॥ ४७ ॥
द्वितीय मपि वै बाह्या च्चतुर्थं तदनु वै नमः ।
षट्त्रिंशाक्षरसंयुक्त स्स्वयं मन्त्रो महामते ॥ ४८ ॥
षड्वर्ण पद मस्याद्यं पंचार्णं तदनन्तरम् ।
दशा क्षरं तृतीयन्तु त्रीणि पंचाक्षरा ण्यतः ॥ ४९ ॥
अथा दायाक्षरं बीजं नाभेः पंचदशा ततः ।
शाङ्गभृते पदं दद्या च्चतुर्वर्ण मतःपरम् ॥ ५० ॥
नेमिपूर्व मथादाय प्रागरा त्प्रथमं ततः ।
तृतीयंच बहिष्ठेभ्यः पदं त्र्यर्ण ध्वजाय वै ॥ ५१ ॥
तत स्तृतीयं बाह्यात्तु प्रथमा त्प्रथमं ततः ।
तदधो विनियोक्तव्यं द्वितीयं वर्ण मष्टमात ॥ ५२ ॥
द्वितीय स्वरसंयुक्त मथ बाह्यात्तु पंचमम ।
अष्टमन्तु तदुद्देशा त्केवलं पुनरेव तत ॥ ५३ ॥

नाभे रेकादशा क्रान्तं षडक्षर मतःपरम् ।
पदं सनत्कुमाराय पंचाक्षर मनन्तरम् ॥ ५४ ॥

पद्मं जगत्प्रियायेति प्रद्युम्नाय नम स्ततः ।
चतुर्स्त्रिशाक्षर स्सोयं मन्त्र श्शृणु पदान्यपि ॥ ५५ ॥

आद्यं षडक्षरं ज्ञेयं द्वितीयं तद्वदेव हि ।
पंचाक्षरं तृतीयन्तु चतुर्थंतु षडक्षरम् ॥ ५६ ॥

पंचार्णं पंचमं विद्धि षड्वर्णं षष्ठमेव हि ।
अक्षस्थं षोडशं नाभे द्वितीयं दशमात्तु वै ॥ ५७ ॥

केवलं ह्यथ तेनैव चाक्रान्तं नवमा त्परम् ।
अथादायच तस्यान्ते प्रथमा त्प्रथमं परात् ॥ ५८ ॥

युक्तं नाभिद्वितीयेन वर्ण मेकं महामते ।
वर्णद्वयं पदस्यादौ तदेवान्ते ऽस्य वै पुनः ॥ ५९ ॥

अथ द्वितीयं नवमा त्प्रथमा त्प्रथमं ततः ।
तृतीय मथ वै नेमे द्वितीय स्वरसंयुतम् ॥ ६० ॥

द्वितीयं केवलं बाह्या त्सप्तमं नाभिमण्डलात ।
अथ षष्ठेन वै नेमे राक्रान्तं द्वितीयं न्यसेत ॥ ६१ ॥

प्राग्वर्णं दशमा न्नेमेः पंचमस्योर्ध्वगंत्वथ ।
चतुर्था दपरं वर्णं द्वितीयं नेमिमण्डलात् ॥ ६२ ॥

द्वाभ्यां नाभिद्वितीयन्तु योजये त्तदनन्तरम् ।
दशमा दपरं वर्णं तृतीय स्वरसंयुतम् ॥ ६३ ॥

तृतीयमथवैनेमे र्नाभि पंचम संयुतम् ।
द्वितीय स्वर संयुक्तं द्वितीयं नवमादरात ॥ ६४ ॥

अस्यैवा धो नियोक्तव्यं दशमा त्प्रथमं हि यत ।
शुद्धंनेमि द्वितीयन्तु पदं त्वासित वाससे ॥ ६५ ॥

विष्वक्सेनायतदनु नमस्कार समन्वितम् ।
द्वात्रिंशार्णो ह्ययंमन्त्रः पदभेदेन वैपुनः ॥ ६६ ॥
एकाधिकस्तु भवति पदान्यथ निबोधमे ।
द्व्यक्षरन्तु पदं पूर्वं द्वितीयन्तु नवाक्षरम् ॥ ६७ ॥
त्रीणिपंचाक्षराण्यन्यत् षष्ठं सप्ताक्षरं स्मृतम् ।
अप्ययायसरे प्राप्ते स्मरणेचार्चने विभोः ॥ ६८ ॥
शृणुमन्त्र चतुष्कन्तु पुनरन्य त्समासतः ।
आद्य मेकादशाद्वर्णं पञ्चम स्वर संयुतम् ॥ ६९ ॥
युक्तं स्वरेण तेनैव तृतीयं नेमि मण्डलात् ।
द्वितीय स्वर संयुक्त मथवाह्यात्तु सप्तमम् ॥ ७० ॥
द्वितीयं केवलं नेमे रायन्ते प्रणवोनमः ।
शुद्धन्तथा ष्टमंवाह्यात् द्वितीयमथ चाष्टमात् ॥ ७१ ॥
अथोनेमि द्वितीयेन युक्तं नाभ्यपरेणतु ।
केवल द्वितीयं बाह्या न्नमस्कार मतः परम् ॥ ७२ ॥
अथाक्षरं नाभिपूर्वं द्वितीयं तृतीयादरात् ।
तदधो द्वितीयं बाह्या न्नाभिपञ्चम संयुतम् ॥ ७३ ॥
अथनाभि द्वितीयेन युक्तं यत्परमाष्टमात् ।
द्वितीयं केवलं बाह्या न्नमस्कारं ततः परम् ॥ ७४ ॥
अक्षरस्थ बीजं तदनु द्वितीयं द्वादशादरात् ।
द्वितीयात्प्रथमं चाथ पञ्चमं नेमिमण्डलात् ॥ ७५ ॥
केवलं त्रितयं ह्यरत द्वितीयं च तथाष्टमात् ।
एकादश स्वराक्रान्तं वासुदेवाय वै नमः ॥ ७६ ॥
सप्ताक्षरस्तु प्राङ्मन्त्रो द्वितीयस्तु षडक्षरः ।
पूर्वतुल्य स्तृतीयस्तु चतुर्थो द्वादशाक्षरः ॥ ७७ ॥

पदभेद विनिर्मुक्त मेतन्मन्त्र चतुष्टयम् ।
गोपनीयं प्रयत्नेन विधिज्ञैः सिद्धिमीप्सुभिः ॥ ७८ ॥

एवं ज्ञात्वा ऽमृतमये भोगैस्तोष्यश्च पूर्ववत् ।
वैभवीये कृतोदेवे श्चतुमूर्ति रधोक्षजः ॥ ७९ ॥

चतुरंगा दयं चक्रा च्चातुरात्म्यस्यवै विभोः ।
इति मन्त्रगणः प्रोक्त स्सरहस्य स्समासतः ॥ ८० ॥

अभेदेनादिमूर्तेर्वै संस्थितं वटबीजवत् ।
सर्वक्रियाविनिर्मुक्त मुत्तमं परमार्थतः ॥ ८१ ॥

चातुरात्म्यं सदाद्यं वै शुद्ध संविन्मयं महत् ।
वह्न्यर्केन्दु सहस्राभ मानन्दास्पद लक्षणम् ॥ ८२ ॥

बीजं सर्वक्रियाणां च द्विकल्पानां यदास्पदम् ।
चातुरात्म्यन्तु तद्विद्धि द्वितीय ममलेक्षण ॥ ८३ ॥

नित्यं नित्याकृतिधरं तेजसा सूर्यवर्चसम् ।
भिन्नं सितादिभेदेन चोर्ध्वाध स्संस्थितेनच ॥ ८४ ॥

कैवल्य भोगफलदं भवबीज क्षयंकरम् ।
चातुरात्म्यं तृतीयन्तु सुधा सन्दोह सुन्दरम् ॥ ८५ ॥

स्थित्युत्पत्ति प्रळयकृ त्सर्वोपकरणान्वितम् ।
प्रकृतिं स्वामधिष्ठाय समुदे त्यस्तमेतिच ॥ ८६ ॥

चतुर्थं विद्धि यद्यस्य विश्वं तिष्ठति शासनात् ।
धत्ते सितादिकं रूपं चतुर्धा च कृते युगे ॥ ८७ ॥

रक्ताद्यं सितनिष्ठश्च त्रेतायांहि महामते ।
पीतं कृष्णं सितं रक्तं सम्प्राप्ते द्वापरे युगे ॥ ८८ ॥

कलौ कृष्णं सितं रक्तं पीतश्चानुक्रमेण तु ।
युगसन्ध्या चतुष्केतु बिभर्ति परमेश्वरः ॥ ८९ ॥

विभिन्नमूर्तिसामान्यं रूपं यत्त न्निबोधमे ।
सितरक्तं कृतान्तेतु रक्तपीत मतः परम् ॥ ९० ॥
पीतकृष्णंच तदनु कृष्णशुक्लमनन्तरम् ।
भेदः प्रागुदिते ह्येय आयुधाम्बर लांछनैः ॥ ९१ ॥
समत्वा दन्यथांकेन विभागो ऽत्रावधार्यते ।
युगाब्ददिनरात्रयर्ध प्रहराणां क्रमेणतु ॥ ९२ ॥
विभागकल्पनं कृत्वा नित्य मालक्ष्य वै प्रभुम् ।
देहे ऽस्मि न्मूर्ध्नि हृदये नाभौतु तदधः पुनः ॥ ९३ ॥
तस्मा दामूर्धपादान्तं भूतये मुक्तये ऽन्यथा ।
ग्रीवांस जानुगुल्फेषु स्मरे त्सन्ध्युक्तलक्षणम् ॥ ९४ ॥
सृष्टिसंहारयोगेन य स्स याति परां गतिम् ।
इत्येकमूर्तें र्व्यूहानां विभवस्या खिलस्यच ॥ ९५ ॥
अवतार स्तथाध्यान मर्चनं मन्त्रपूर्वकम् ।
स्वपद स्थान भेदेन प्रोक्त मेक समाधिना ॥ ९६ ॥
विशेषोप्यथ भेदाख्य स्सवतार पुरस्सरः ।
भाव स्स्थितिविधोचैव सर्वेषामधुनोच्यते ॥ ९७ ॥
षाड्गुण्यमादिदेवाद्यं चातुरात्म्य मलाञ्छनम् ।
सृष्ट्येत्रितयंह्येत स्सामर्थ्यं पारमेश्वरम् ॥ ९८ ॥
लोलीभूत मभेदेन स्मरेत्तुर्यात्मना पुरा ।
नित्योदितंच सुपदे स्थित मस्पन्दलक्षणम् ॥ ९९ ॥
अथार्चितु यमिच्छेत्तु विशेष व्यक्तिलक्षणम् ।
संकल्प्यतं स्वबुद्ध्यातु तत्कालसमनन्तरम् ॥ १०० ॥
ध्रुवा सामर्थ्य शक्तिर्वे स्पन्दतामेति च स्वयम् ।
सूते ऽग्निकणवन्मन्त्रं यत्रमन्त्री कृतास्पदः ॥ १०१ ॥

तमागत मिवाकाशा त्तारकं कर्णिकान्तरे ।
भावयेदथ तन्मध्या दाराध्य मुदितं स्मरेत ॥ १०२ ॥
आदिमूर्ति स्वरूपेण चतुर्मूर्ति मयेनवा ।
पृथक्त्वेन चतुसूर्ते रेकैका कृतिनाप्यथ ॥ १०३ ॥
अथवावैभवीयेन नानाकृत्या त्मनातुवै ।
अंगसंघं तदीयंच न्यसे त्पद्म दळाश्रितम् ॥ १०४ ॥
परिवारं बहिः पद्मा त्स्वकं यो यस्य विद्यते ।
सशक्तिकस्य मन्त्रस्य दिक्क्रमेण हृदादि यत् ॥ १०५ ॥
न्यसेत्केसरजालस्थं पद्ममध्येतु शक्तयः ।
निश्शक्तिको निरंगोयो मन्त्रनाथस्तु केवलः ॥ १०६ ॥
शब्दमात्रेण तद्भूयो दळजात गतं यजेत् ।
इत्येव मन्त्रयागस्तु देवस्य परमात्मनः ॥ १०७ ॥
समासेनोदित स्सम्य गथ मूर्तेयजेद्बहिः ।
येषां पुराहृते भोगे बिम्बेवाचक्रपंकजे ॥ १०८ ॥
हेमादिद्रव्य जनिते चक्रेवा केवलाम्बुजे ।
भद्रपीठ भुवोमध्ये सुश्लक्ष्णे केवलेतुवा ॥ १०९ ॥
ध्यात्वाध्यात्वा स्वमन्त्रेण ह्यपवर्ग फलाप्तये ।
समर्चनीयं विधिव त्त्वब्ध्वा भक्ति पुरस्सरम् ॥ ११० ॥

इति श्रीपांचरात्रे श्रीसात्वतसंहितायां

पंचमः परिच्छेदः ॥ ५ ॥

षष्ठः परिच्छेदः ।

नारदः ।

वक्ष्ये विप्रवरा स्सम्य ग्य उक्त श्चक्रपाणिना ।
प्रसंगा द्बलदेवाय द्रव्ययागोप्यनन्तरम् ॥ १ ॥

श्रीभगवा नुवाच ।

यत्किंचि त्पत्रपुष्पाद्यं परिदृश्येत पीठगम् ।
पाणिना तत्समाहृत्य शुचिस्थाने निधाय वै २ ॥
गव्यै र्वा चामरै र्बाले श्शिखिपुच्छैः कुशै रथ ।
सम्मार्ज्य भद्रपीठन्तु वाससा सुसितेनवा ॥ ३ ॥

बहुना वस्त्रपूतेन वारिणा तदनन्तरम् ।
प्रक्षाळ्य द्वादशार्णेन प्रणवाद्यन्तकेनतु ॥ ४ ॥

सर्वलोकमयं तत्र सर्वदेवसमाश्रयम् ।
सर्वाधारमयं ध्याये दन्तर्लीनन्तु चक्रराट् ॥ ५ ॥

प्रणवेन स्वनाम्नाथ नमोन्तेनार्चयेच्च तम् ।
अर्घ्यालभनधूपैस्तु माल्यै र्नानासुगन्धिवैः ॥ ६ ॥

ततः कुम्भचतुष्कन्तु हेमादिद्रव्यनिर्मितम् ।
गाळितेना म्भसा पूर्ण स्रगाद्यै रप्यलकृतम् ॥ ७ ॥

गन्धसर्वौषधीरत्न फलबीजकुशोदकम् ।
बहिःकोणचतुष्केतु न्यसे दाधारपृष्ठगम् ॥ ८ ॥

ओं मर्घ्यं कल्पयामीति श्रुक्त्वा वायुपदे न्यसेत ।
कलशं तद्वदेशान्यां न्यसे दाचमनार्थतः ॥ ९ ॥

स्नानार्थ मग्निकोणेतु पाद्यार्थं नैरृते तथा ।
अथ मंगळकुम्भाना मुपकुम्भसमन्वितम् ॥ १० ॥
चतुष्कं विन्यसे द्वाक्षे दिक्क्रमेण सुपूजितम् ।
भगवद्बिम्बपूर्वन्तु यागांगं प्रागुदीरितम् ॥ ११ ॥
एकं सुलक्षणं तत्र ततो मध्ये ऽवतार्यच ।
भुक्तमर्घ्यादिकं तस्मा दपनीयाभिवन्द्यच ॥ १२ ॥

उशीरवंशकूर्चेन क्षाळये दम्भसा ततः ।
पुरांकितन्तु चक्राद्यै र्यथावद्धन्तु वा शुभम् ॥ १३ ॥

सलिलेना र्घ्यपात्रन्तु सम्पूर्यांग्रे निधायवै ।
तिलान् सुमनस स्तस्मिन् दूर्वां स्सिद्धार्थकान् क्षिपेत ॥ १४ ॥

चतुरावर्तयेन्मन्त्रं कृत्वापाणितलेस्थितं ।
तत स्सर्वगतंदेवं मन्त्रमूर्तित्व मागतम् ॥ १५ ॥

समाहूय स्वमन्त्रेण ह्यागच्छेति पदेनवै ।
यथासर्वगतोवायु र्व्यजनेन महामते ॥ १६ ॥

व्यक्तिमभ्येति भगवा नाहूतस्तद्वदेवहि ।
भावदर्पण संक्रान्तं कृत्वाहृत्कमलात्तवै ॥ १७ ॥

सन्निरोध्य बहिर्वेद्यां मन्त्रोच्चारा वसानतः ।
मन्त्र मागच्छ मानन्तु निर्गतन्तु स्वकात्पदात ॥ १८ ॥

कालं पाद्यार्घ्यदानान्त मुत्थितं भावये त्सदा ।
अथोपचर्यमाणन्तं भोगैः कालानुकूलतः ॥ १९ ॥

स्नानालभनवस्त्रस्र ग्दानालंकरणेतथा ।
अन्यत्र भोग पूजायां स्मरे त्पद्मासनादिना ॥ २० ॥

पुनस्तमेवोपविष्टं सानुकम्पंच सम्मुखम् ।
बिम्बंविनान्यत्राधारे भवत्येवं महामते ॥ २१ ॥

बिम्बाकृत्यात्मना बिम्बे समागत्यावतिष्ठते ।
करो त्यमूर्तां मखिलां भोगशक्तिन्तुचात्मसात् ॥ २२ ॥

विनिवेश्या सनवरं समाहूतस्य वै प्रभोः ।
पादपीठन्तु सामान्यं मृद्वास्तरणभूषितम् ॥ २३ ॥

पाद्यार्घ्यं मधुपर्कंच तोय माचमनीयकम् ।
सपुत्रदार मात्मान मष्टांगपतनेनतु ॥ २४ ॥

चेतसा भक्तियुक्तेन निवेद्य तदनन्तरम् ।
भगवानपि विज्ञाप्यः कृत्वा तत्पादगौ करौ ॥ २५ ॥
स्फुटीकृतं मया देव त्विदं स्नानपरे त्वयि ।
सपादपीठं परमं शुभं स्नानासनं महत ॥ २६ ॥
आसादयाशु स्नानार्थं मदनुग्रहकाम्यया ।
स्नानासनं निवेद्याथ देवस्य द्वितयन्तु वै ॥ २७ ॥
भक्तिनम्रेण शिरसा दद्या दर्घ्यन्तु मूर्धनि ।
विनिवेद्यततोहैमं सरत्नंच प्रतिग्रहम् ॥ १८ ॥
दद्याद्वैपाद्य कलशा त्पाद्यं पादाम्बुजद्वये ।
सुशुभेपादुकेचाथ तदन्तेस्नानशाटिकां ॥ २९ ॥
सुगन्धशालिसम्पूर्णं मात्रार्थपात्रमुत्तमम् ।
दर्पणं पूर्णचन्द्राभं गन्धतोय मनन्तरम्॥ ३० ॥
पाणिभ्यां क्षाळनार्थन्तु पादपीठं ततश्शुभम् ।
दन्तकाष्ठंच तदनु मुखशुद्धि प्रतिग्रहम् ॥ ३१ ॥
जिह्वानिर्लेखनंचैव मुखप्रक्षाळनंतु वै ।
पुनराचमनं देव स्याभ्यंगार्थ मनन्तरम् ॥ ३२ ॥
तैलं बहुसुगन्धंच चूर्णं गोधूमशालिजम् ।
रजनीचूर्णसम्मिश्र मीष त्पद्मकभावितम् ॥ ३३ ॥
देय मुद्वर्तनार्थन्तु मर्षांच तदनन्तरम् ।
स्नानार्थं खलिसम्पूर्णं (?) तोयमुष्णमनन्तरम् ॥ ३४ ॥
चन्दनं मुखलेपार्थं घृष्टं कर्पूरभावितम् ।
गव्यं प्रभूतं स्नानार्थं क्षीरं दधिघृतं मधु ॥ ३५ ॥
ऐक्षवन्तु रसं हृद्य मभावे शार्करोदकम् ।
धात्रीफलोदकं चैव लोद्ध्रतोय मनन्तरम् ॥ ३६ ॥

रक्तचन्दन तोयंच रजनीनीरमुत्तमम् ।
ग्रन्थिपल्लव वार्येव ततस्तु तगरोदकम् ॥ ६७ ॥
प्रियंगुवारि तदनु मांसीजल मतःपरम् ।
सिद्धार्थकोदकं चैव सर्वौषधिजलं ततः ॥ ३८ ॥
पत्रपुष्पोदकंचैव फलबीजोदके तथा ।
गन्धोदकंच तदनु हेमरत्नजले ततः ॥ ३९ ॥
पुण्यतीर्थं सरित्तोयं केवलं तदनन्तरम् ।
स्नानार्थं कल्पितंनैव चोदकेन विमिश्रितम् ॥ ४० ॥
योक्तव्यं क्रमशोह्येत दर्घ्यपुष्प समन्वितम् ।
अन्तरान्तरयोगेन स्नानानांच महामते ॥ ४१ ॥
क्षालनं चार्घ्यं कलशा दर्घ्यदानं समाचरेत् ।
सम्पूर्णमम्भसांकुम्भं हरिद्राशालितण्डुलैः ॥ ४२ ॥
गन्धादिभिश्च संलिप्त मथ युक्तं स्रगादिना ।
पाणौ कृत्वा त मेकस्मि न्नपरस्मिंस्तु मल्लकम् ॥ ४३ ॥
धूमायमानं सिद्धार्थै श्चाग्यमूर्ध्नि बहिः क्षिपेत् ।
सुधौतमहतंचाथ शाटकं विनिवेद्यच ॥ ४४ ॥
कचोदकापकर्षार्थं मपरं देहवारिहृत् ।
अधरोत्तरवस्त्रंच गन्ध धूपाधिवासिते ॥ ४५ ॥
प्रणाळभागा दपरं स्थानं भद्रासनेतु वै ।
भूरिनीरघटै श्शुद्धं कृत्वा तत्रावतार्यच ॥ ४६ ॥
सपीठं भगवद्बिम्बं तद्विना वार्चितं यदि ।
सप्लुतं भावये देवं निश्शेषं क्षाळये त्पुनः ॥ ४७ ॥
भूयो गन्धोदकेनैव पूर्यं कुम्भचतुष्टयम् ।
स्नानकुम्भं विनान्येषां प्राग्व त्कार्याच कल्पना ॥ ४८ ॥

मध्ये स्वतायां भगवा न्विनिवेद्यासनं ततः ।
तृतीयं रत्नखचितं तत्रस्थं परमेश्वरम् ॥ ४९ ॥
विभाव्या लंकृतं भक्त्या भोगैः स्त्रक्चन्दनादिभिः ।
समभ्यर्च्यार्घ्यपाद्येन पादुकाभ्या मनन्तरम् ॥ ५० ॥
देय माचमनं भूयः पादपीठं तथैवच ।
समालभ्य सुगन्धेन भक्तित श्चन्दनादिना ॥ ५१ ॥
संवीज्य व्यजनेनैव मायूरेण ततेनच ।
केशप्रसारकं त्कूर्चं पुष्पताम्बूलकर्तरीम् ॥ ५२ ॥
निवेद्य देवदेवाय दुकूलवसने सिते ।
उपवीतं सोत्तरीयं मकुटाद्य मनन्तरम् ॥ ५३ ॥
पादनूपुरपर्यन्त मलंकरण मुत्तमम् ।
विचित्रंहि शिरोमाल्यं मुक्तपुष्पसमन्वितम् ॥ ५४ ॥
स्त्रग्दामसूत्रसम्बद्ध माकर्णाञ्चरणावधि ।
रुचिरं कंकणं चाथ दद्या त्प्रतिसरं ततः ॥ ५५ ॥
धातुभिः कुंकुमाद्यै र्वा विचित्रं सितसूत्रजम् ।
पूजितं मृदुतूलेन ग्रथितंचान्तरान्तरा ॥ ५६ ॥
अंजनं सशलाकंच ताम्बूलं गन्धभावितम् ।
ललाटतिलकं हैमं मुखवासनरोचनाम् ॥ ५७ ॥
कर्णावतंसकुसुमे मण्डलं दर्पणं महत् ।
प्राकारं चित्रकुसुमै र्दीपं रत्नप्रभोज्वलम् ॥ ५८ ॥
मृष्टधूपसमायुक्तं गुग्गुलुं धूपये च्छुभम् ।
सह घण्टारवै रम्यै श्चाल्यमानेन बाहुना ॥ ५९ ॥
उपानहौ सितं छत्रं शिबिकांच रथादियत ।
वाहनं गजपर्यन्तं सपताकं खगध्वजम् ॥ ६० ॥

सितासितौ चामरौ तु मात्रावित्त मनन्तरम् ।
औपचारिकभोगाना मेतेषां पूरणायच ॥ ६१ ॥

भेरी मृदंग शंखाद्यै जयशब्द समन्वितैः ।
गीतकै र्विविधैर्नृत्यै स्तन्त्रीवाद्य समन्वितैः ॥ ६२ ॥

स्तोत्रमन्त्रै र्नमस्कारैः प्रणामै स्सप्रदक्षिणैः ।
पूज्यस्सपाद पीठंवै दद्याद्भोज्यासनं विभोः ॥ ६३ ॥

छत्रंदुकूल तूलोत्थ मधूक प्रवरेणतु ।
अथार्हणं ऊऊं स्वच्छं सुगन्धं पत्रतः कृतम् ॥ ६४ ॥

मधुपर्कं दधिमधु घृतयुक्त मनन्तरम् ।
शीतलं तर्पणजलं माधिचूर्णं पुरोदितम् ॥ ६५ ॥

देयं निपुंसनार्थन्तु पुनराचमनंविभोः ।
स्वलंकृतां सुरूपांच स्रग्युक्तां विनिवेद्यगां ॥ ६६ ॥

प्रभूत मथनैवेद्यं भक्ष्य भोज्यान्यनेकशः ।
मधुराद्यारसास्सर्वे शाका स्सफल मूलकाः ॥ ६७ ॥

पानकानि पवित्राणि स्वादूनि मधुपर्कवत् ।
सर्वमाचमनार्थन्तु प्रदद्यादर्हणोदकं ॥ ६८ ॥

तिलान्यथ सुरत्नानि ताम्बूलं पुनरेवहि ।
गन्धदिग्धौ करौकृत्वा मुद्राबन्धमथाचरेत् ॥ ६९ ॥

मध्यमानामिकाभ्यान्तु द्वन्द्वयुक्तं करद्वयात् ।
पराङ्मुखं च सुस्पष्टं कृत्वायोज्यं परस्परम् ॥ ७० ॥

आमूला त्रखपर्यन्तं नैरन्तर्येण यत्नतः ।
समुत्तानेकर तले शेषा श्चांगुळय स्तथा ॥ ७१ ॥

अधरोत्तरयोगेन वामदक्षिणत स्तथा ।
तर्जन्या मूध्वतो गुष्ठे सम्मुखे सम्प्रसार्यच ॥ ७२ ॥

निविष्टा हृदयोद्देशे कार्याथ जपमाचरेत् ।
स्फाटिके नाक्ष सूत्रेण स्वकैर्वा करपर्वभिः ॥ ७३ ॥

यथाभिमत संख्यांच जपान्ते स्रग्वरैस्सह ।
सम्पूज्यगन्धधूपैश्च ततस्तु भगवन्मयः ॥ ७४ ॥

यथाक्रमं समभ्यर्च्य नैवेद्यंप्रतिपाद्यच ।
तेषां मात्रावसानंवा प्यग्नौसन्तर्पयेत्ततः ॥ ७५ ॥

प्रमाण परिशुद्धंच विभवानुगुणं शुभम् ।
चतुरावरणं कुण्डं कृत्वांगुष्ठ विभूषितम् ॥ ७६ ॥

त्र्यंशेनार्धांशतोवापि खाताद्ध्रासोविधीयते ।
चक्रशंखा म्बुजाकारं वृत्तंवा चतुरश्रकम् ॥ ७७ ॥

गदाद्ये श्चक्रपर्यन्त लांछनै र्लांछितंतुवा ।
अग्निकार्योपयोगीनि तानि यानि महामते ॥ ७८ ॥
स्रुक्स्रुवादीनि भाण्डानि स्वंकितव्यानि तैरपि ।
सुधाद्यै र्वर्णकै श्शुद्धै र्भूषयित्वोपलिप्यच ॥ ७९ ॥

सुगन्धचन्दनाद्यैश्च पंचगव्य पुरस्सरैः ।
तन्मध्येच कुशाग्रेण प्राग्भाग मवलम्ब्यच ॥ ८० ॥

आरभ्य दक्षिणाशाया लिखे ल्लेखा मुदग्गताम् ।
तस्यानुपरि संलिख्य लेखानां त्रितयं स्फुटम् ॥ ८१ ॥

प्रागग्रं दक्षिणाशादि ह्युदीच्यन्तंच सान्तरम् ।
चतुर्धा प्रणवेनाथ प्रोक्षयेदर्घ्यवारिणा ॥ ८२ ॥

तदभ्यर्च्यार्घ्यपुष्पाद्यै र्ध्यायेत्तद्धृदपीठवत् ।
प्रणवेस्तु प्रतिष्ठानं प्राग्वदस्य समाचरेत ॥ ८३ ॥

चतरश्रे स्थले कौण्डे दिग्विदिशाष्टके बहिः ।
सम्पूर्णपात्रं कुम्भाना मष्टकं विनिवेश्यच ॥ ८४ ॥

ऊर्ध्वाधो मेखलानांच चतुर्णां दिक्चतुष्टये ।
कोशे यत्निष्टरस्थांश्च वासुदेवादिका न्यजेत ॥ ८५ ॥

विदिश्वप्यथ योगेन ह्यर्ध्वान्त मथरात्तत्रे ।
तद्वदेवार्घ्यपुष्पाद्यैः पूजनीयाः क्रमेणतु ॥ ८६ ॥
मृदुदर्भसमुद्दंच नीरसं चाश्मकुट्टिमम् ।
शुष्कगोमयचूर्णेन युक्तं गन्ध मनासहा (?) ॥ ८७ ॥
कुण्डे द्रोणांशमात्रन्तु समारोप्य प्रसार्यंच ।
ताम्रपात्रेथवान्यस्मिन् समादाय हुताशनम् ॥ ८८ ॥
आरण्यं लौकिकं वाथ मणिजं दर्पणोद्भवम् ।
कालवैश्वानराख्यस्य हृदयेशस्य वै प्रभोः ॥ ८९ ॥
मारुतानुगताभास्सा योज्या बाह्याग्निना सह ।
भ्रामयित्वा चतुर्धा वै ततः कुण्डान्तरे क्षिपेत् ॥ ९० ॥
पूतं समिच्चतुष्कंतु प्रणवै रभिमन्त्रितम् ।
दत्वा तदूर्ध्वे तदनु कुर्या त्परिसमूहनम् ॥ ९१ ॥
प्रदक्षिणक्रमेणैव ह्यार्द्रपाणितलेनतु ।
तिर्यं क्चाधोमुख स्तेन नखमग्र मदर्शयन् ॥ ९२ ॥
तत स्त्वभग्नमूलाग्रे स्समे र्दंभा स्कुशै स्स्तरम् ।
दिशि दिश्युत्तराशांतं याम्याशादौतु सान्तरम् ॥ ९३ ॥
चतुर्गुणे श्चतुर्धातु मप्रच्छन्नैः परस्परम् ।
प्राक्प्रान्तैः पूर्वभागाच्च याव दुत्तरगोचरम् ॥ ९४ ॥
होमोपकरणं सर्वं होमभाण्डपुरस्सरम् ।
अवतार्य तदूर्ध्वेतु दक्षिणस्यां तथात्मनः ॥ ९५ ॥
द्वन्द्वद्वयप्रयोगेण द्रव्यस्थापन माचरेत ।
द्विरष्टसंख्य मिध्मन्तु संयुक्तंच महामते ॥ ९६ ॥
द्वितीयेनाष्टसंख्येन शुष्कदर्भै स्तराण्डकाम् ।
स्रुवस्रुचौच चतुष्कंच देकत्र विनिवेश्य तत् ॥ ९७ ॥

सुगन्धूमं मधुपर्कंच बीजान्येकत्रवैततः।
कौशेयं धौतकेशन्तु विष्टरंच घृतं चरुम् ॥ ९८ ॥
आज्य स्थालीं चतुष्कंच निधाय तदनन्तरम्।
प्रणीता पात्रयुगळं करकं चार्घ्यभाजनम् ॥ ९९ ॥
चतुष्कमेतदपर मग्रतो विनिवेश्यच।
प्रादेशमात्रास्समिधः प्रभूतं शुष्कमिन्धनम् ॥ १०० ॥
पक्ष्मकं स्वेदहृद्वस्त्रं वामभागे निधायच।
अर्घ्यं पात्रोदकेनप्रा क्कृत्स्नं पावनतां नयेत् ॥ १०१ ॥
आदाय सोदकं चाथ प्रणीताख्यंच भाजनम्।
पवित्रन्कतु तन्मध्ये चतुर्दर्भं कृतं न्यसेत् ॥ १०२ ॥
उद्धृत्योद्धृत्य हस्तेन जळं तत्रैवचक्षिपेत।
चातुरात्मीय मन्त्रंच जपमानोहिसाधकः ॥ १०३ ॥
भूय स्तदम्भसा सर्वं प्रोक्षयेद्विष्टरेणतु।
शेषस्याप्लावणं कुर्या त्सर्वदिक्षुस्तरोपरि ॥ १०४ ॥
पुनरेवाम्भसा पूर्य तन्मध्ये परमेश्वरम्।
ध्यात्वाऽ र्चयित्वा संस्थाप्य त्वग्रत स्तदनन्तरम् ॥ १०५ ॥
सम्प्रोक्ष्या र्घ्याम्भसाचेध्मां श्चतुर्धा संविभज्यच।
पूजये दर्घ्यपुष्पाभ्यां द्वादशाक्षरविद्यया ॥ १०६ ॥
प्रणीतेचापरस्मिन्वै पात्रेचाग्रे कृते सति।
सपवित्रन्तु तत्रार्घ्यं दत्वा चक्रन्तु विन्यसेत् ॥ १०७ ॥
चतुर्मूर्तिं तदूर्ध्वेतु ध्यात्वाभ्यर्च्य यथा क्रमम्।
तत्पात्रमुत्तरस्यांच कृत्वा सम्पूज्यवैपुनः ॥ १०८ ॥
आज्यस्थाली मथादाय त्वाज्यं यत्प्राग्द्रवीकृतम्।
विनिक्षिप्याज्य भाण्डान्त मुच्चस्थेन करेणतु ॥ १०९ ॥

पुनराधाय कृत्वाग्र आधारोपरि यत्नतः ।
दार्भं काण्डचतुष्कन्तु द्वादशांगुळसंमितम् ॥ ११० ॥
तिर्य गुत्तानपाणिभ्यां ववष्टभ्यच सान्तरम् ।
अनामांगुष्ठयुग्मेन यथा मध्यं नतं भवेत ॥ १११ ॥

तै राज्यं चतुरोवारा नानये न्नतुरुन्नयेत ।
अन्तरान्तरयोगेन ह्यात्मनोग्रेस्तु सम्मुखम् ॥ ११२ ॥

प्रणवोक्तेन संख्येन (?) कुण्डमध्येथ निक्षिपेत ।
स्रुक्स्रुवावथ चादाच दर्भपुंजीलकेनतु ॥ ११३ ॥
रजोपनयनं कुर्या त्प्रक्षाल्योष्णेन वारिणा ।
निर्मलीकृत्य कूर्चेन ज्वालाभि स्सम्प्रताप्यच ॥ ११४ ॥

प्रोक्षयित्वा र्घ्यतोयेन पूजयित्वा निधायच ।
षत्रुशाखै रभग्नाग्रै स्समूलैस्सुसमैः कुशैः ॥ ११५ ॥

चतुर्भि र्वामहस्तेन त्वादायाथ पवित्रकं ।
दक्षिण नामकर्यांतु चतुष्काण्ड विनिर्मितं ॥ ११६ ॥

अंगुळीयक रूपंच कृत्वावैतदनंतरं ।
संस्कृत्याज्यस्य विप्रुड्भि स्संस्पृशेदिन्धनादिकम् ॥ ११७ ॥

निश्शेषदोष शान्त्यर्थ मधाग्ने राहुतस्यच ।
शतं शतार्धं पादं वा त्वाहुतीनां स्वशक्तितः ॥ ११८ ॥

तिलानां घृतसिक्तानां शुद्धेनहविषासह ।
होतव्यं कर्मसिद्ध्यर्थं यथा त दवधारय ॥ ११९ ॥

आहुत्या मुद्धृतायांच मूलमन्त्रावसानतः ।
प्रणवान्तं पदं ब्रूया दग्नि शोधय शोधय ॥ १२० ॥

यथावस्थितरूपेण तत स्तेनैव बुद्धिमान् ।
दद्या त्पूर्णाहुतिं पश्चात घृतेनतु चतुष्पलीम् ॥ १२१ ॥

तस्य संशुद्धदोषस्य पुनरेव समाचरेत् ।
सम्बोधजनकं होमं जडभावप्रशान्तिदम् ॥ १२२ ॥
उच्चार्य मूलमन्त्रन्तु प्रणव द्वितयान्वितम् ।
जुहुया दाहुतीनां च सहस्रं शतमेववा ॥ १२३ ॥
तद्वदाज्येन सन्तर्प्य दद्या त्पूर्णाहुतिं तथा ।
तदा सलब्धसत्तस्य पश्य त्यन्तर्गतं विभुम् ॥ १२४ ॥
प्राणभूत मजं विष्णुं तन्मयत्व मथाश्रयेत ।
अथ सयज्ञनिष्ठस्य कर्मिणोस्यापवर्गिणः ॥ १२५ ॥
याति यागाग्निभावित्वं स्वयमेव यदृच्छया ।
विभजत्यात्मना त्मानं चतुर्धा कुण्ड मध्यतः ॥ १२६ ॥
आधिभूतस्वरूपेण समाश्रित्यच दिक्क्रमम् ।
पूर्वं माहवनीयाख्य स्वरूपेणाथ दक्षिणे ॥ १२७ ॥
समास्ते सभ्यवपुषा पश्चिमस्या मनन्तरम् ।
गार्हपत्याख्यभेदेन तत स्तिष्ठति चोत्तरे ॥ १२८ ॥
ओदन स्पचनात्मातु सर्वात्मत्वेन मध्यतः ।
आधाराधेयभावेन त्वास्ते संवलिताकृतिः ॥ १२९ ॥
अंगारा र्व्यार्चिषश्चैव शक्ति र्या वहनात्मिका ।
विलक्षणोय माधार आधेयो हुतभु ग्विभुः ॥ १३० ॥
आत्मनोऽ ग्निस्तु विश्वेशो वासुदेव स्सनातनः ।
एवं ज्ञात्वा पुरा सम्य क्सत्तां वैश्वानरीं पराम् ॥ १३१ ॥
ततः कर्मणि वर्तेत नैष्ठिकः कृतनिश्चयः ।
कुर्या दुदकपूर्वन्तु माग्व दावाहनं ततः ॥ १३२ ॥
व्यक्तेर्विगाळितेनैव तत्वेनाप्यव्ययात्मना ।
सर्वेश्वरस्यैवयस्मा द्व्यान्मात्र म्मदद्वपुः ॥ १३३ ॥

वाच्यवाचक रूपंत द्वितय मर्मलक्षण ।
तत्पुनश्शुद्ध सामान्य मुपचारविधौ स्थितम् ॥ १३४ ॥
यद्भोगदानमंत्रैस्तु रहितं मात्रमैश्वरम् ।
प्राक्चतुर्थी विभक्तीय स्तमादायेध्मसंचयं ॥ १३५ ॥
आज्येनोभयत स्सिक्तं ब्रह्मक्षीर द्रुमोद्भवं ।
कुण्डस्य ब्रह्मभित्तिभ्यां मध्यभाग चतुष्टये ॥ १३६ ॥
निदध्यादुत्तराशांतं प्राग्भागा दादितःक्रमात् ।
ईशानाग्नेयपादाभ्यां पतितं प्राक्चतुष्टयम् ॥ १३७ ॥
आग्नेयनैर्ऋताशाभ्यां विश्रान्तमपरं न्यसेत् ।
नैर्ऋतानिल संस्पर्शि तृतीयं विनिवेश्यच ॥ १३८ ॥
वाय्वीशपद संरुद्धं चतुर्थन्तु चतुष्टयम् ।
एवं चतु र्विभक्तेन समिद्धेन समासतः ॥ १३९ ॥
कुण्डमेकं चतुर्धावै चतुर्णां संविभज्यच ।
अग्नीना मेकदेहानां चातुरात्म्य व्यपेक्षया ॥ १४० ॥
यदाय उपयोग्यस्स्यात् यस्मिन्यस्मिन्हि वस्तुनि ।
स्वमूर्तौ स्तर्पणार्थंच कर्मणि स्थापनादिके ॥ १४१ ॥
तदा तदा स आदेय स्स्वकात्स्थानाच्च यत्नतः ।
द्वितीय मिध्ममादाय त्वष्टकाष्ठमयो हि यः ॥ १४२ ॥
द्विधाकृत्वा पुराज्येन पूर्ववत्सेचयेच्चतम् ।
निधाय दक्षिणस्यांच मध्य आग्नेय दिग्गतं ॥ १४३ ॥
विश्रान्तं नैर्ऋतपदे चोत्तरस्यां तथापरम् ।
वारीशपदसंरुद्ध माज्यमादायवैततः ॥ १४४ ॥
चतुस्संख्येन मन्त्रेण प्रणवालंकृतेनच ।
दक्षिणे स्रुवचतुष्कंतु जुहुयादुत्तरे तथा ॥ १४५ ॥

सूर्य सोमात्मकं चाग्ने विद्धितं लोचन द्वयम् ।
एतयो रन्तरं यद्वै तदग्ने वंदनं स्मृतम् ॥ १४६ ॥
तत्रवै जुहुया त्पूर्वं समिधां सप्तकं क्रमात ।
घृतसिक्तां चतुस्संख्या मेकैकांहि सुपुष्कलाम् ॥ १४७ ॥
प्राक्कुंकुमादिना लिप्तां काष्ठ संख्यान्तु होमयेत् ।
स्रग्धूपमधुपर्कंच बीजान्याज्यं यथाक्रमात् ॥ १४८ ॥
तत्रात्र समिधोदाने विशेषोयं विधीयते ।
साधितसंस्कृतेग्नौप्रा कन्निधायाग्रतश्चरुम् ॥ १४९ ॥
समुद्घाट्यावलोक्याद्भिः सम्प्रोक्ष्या ध्यांम्भसाततः ।
दर्भकाण्ड चतुष्केण साग्निना तदनुस्पृशेत ॥ १५० ॥
तन्मध्ये स्रुक्चतुष्कन्तु मन्त्रराज्यस्य निक्षिपेत् ।
अथादाय स्रुचन्तत्र तद्वद्दद्या च्चष्टयम् ॥ १५१ ॥
चतुरंगुळ मानेना प्यग्रग्रास मथाहरेत ।
तन्निधाय स्रुचादर्भे तदूर्ध्वे पूर्ववद्घृतम् ॥ १५२ ॥
दद्यादग्नौ चतुष्कंतु क्षिपेदत्राहुतिं ततः ।
भूयोग्नौ स्रुक्चतुष्कतु चाज्यस्यापाद्ययत्नतः ॥ १५३ ॥
ततोन्यमाज्यसंसिक्तं प्राग्व ककृत्वाहुतिं पुनः ।
दद्यात्पूर्व प्रयोगेण त्वेवमेव चतुष्टयम् ॥ १५४ ॥
हुत्वाप्यन्नाहुतीनांच ह्याज्याभ्यां जुहुयात्ततः ।
तदन्ते तांय निर्मुक्तैः कुसुमै रर्घ्यमिश्रितैः ॥ १५५ ॥
पूजयेच्चतुरो वारा न्मन्त्रैर्वा प्रणवैः प्रभुम् ।
ततो मोक्षामये होमं यथाशक्ति समाचरत् ॥ १५६ ॥
शतपूर्वं सहस्रान्तं दद्या त्पूर्णाहुतिं ततः ।
एकमन्त्र चतुष्केण चतुर्भिश्चतुरोथवा ॥ १५७ ॥
प्राग्वत्पूजां पुनः कुर्या द्दर्भै स्सम्मार्ज्यंच स्रुचम् ।
यथा भवति निस्स्नेह मथ प्राक्स्थापितेनतु ॥ १५८ ॥

पुरतश्चाम्भसा पूर्य तांच पात्रेण तेन वा ।
प्रागादा कुण्डवाह्येतु प्रादक्षिण्येन सेचयेत् ॥ १५९ ॥
पवित्रकेणाथ ऊर्ध्वं विनिक्षिप्यकरेणवा ।
शेषं स्वशिरसो दद्या त्स्वस्थानेथ त्वधोमुखे ॥ १६० ॥
निदध्या द्धोम भाण्डंते भस्मना तदनन्तरम् ।
जलानिर्मथितेनैव ह्यूर्ध्वपुण्ड्र चतुष्टयम् ॥ १६१ ॥
हृद्यंसयोर्ललाटेच कुर्या द्दीप शिखाकृति ।
एवं परिसमाप्तेतु अग्निकार्ये र्पिते सति ॥ १६२ ॥
संविभागः पितॄणांच यथा कार्य स्तथोच्यते ।
कुण्डस्य योनि निकटे दक्षिणाग्रां स्तरेत्कुशान् ॥ १६३ ॥
भद्रपीठ समीपेतु क्ष्मातळेवा तदूर्ध्वतः ।
स्तरोपरि र्चकाथार्थं तिलान् सरजतोदकान् ॥ १६४ ॥
क्रमेण भावये त्तत्र पितॄनथ पितामहान् ।
तृप्तयेह्यथ सर्वेषां देवाय विनिवेद्यचं ॥ १६५ ॥
प्रोक्षितान्यन्नपात्राणि चत्वारि कबळानिच ।
स्तरोर्ध्वेतु निधायाथ सम्पूज्यार्घ्यादिना ततः ॥ १६६ ॥
क्रमेण चातुरात्मीये र्मन्त्रै रप्यययोगतः ।
ततस्तु नाम्ना गोत्रेण मन्त्रपूर्वं तिलोदकम् ॥ १६७ ॥
सर्वेषा मर्घ्यकलशा न्मदद्याच्च यथाक्रमम् ।
तादर्थ्येनाथ चतुरो विनिवेश्या सनेषुच ॥ १६८ ॥
लब्धलक्षा न्परे तत्त्वे ब्राह्मणा न्पाञ्चरात्रिकान् ।
प्राङ्मुखं द्वितयं चैव द्वितयं चाप्युदङ्मुखम् ॥ १६९ ॥
सम्पत्त्यभावे प्येकंवा विनिवेश्योत्तराननम् ।
अथ तेषां क्रमा त्कुर्या दर्चनं चातुरात्म्यवत् ॥ १७० ॥

अर्घ्यानुलेपनाद्यैस्तु भोगै र्मन्त्रावसानिकैः।
तत्तत्कालोचितै स्सर्वै रनुपादेयवर्जितैः॥ १७१॥
तै श्चापि मौननिष्ठैस्तु भवितव्यं सुयन्त्रितैः।
वाग्यता श्शुद्धलक्षाश्चा प्यग्ने मूर्तौ जनार्दने॥ १७२॥
येश्नन्ति पितर स्तेन तृप्ति मायान्ति शाश्वतीम्।
अत स्सव्यभिचारन्तु मौनं वर्ज्यं क्रियापरैः॥ १७३॥
शुभ मव्यभिचारं य त्तत्कार्यं सर्ववस्तुषु।
यदंगसंकेतमय मव्यक्तं नासिकाक्षरैः॥ १७४॥
कृतमोष्टपुटे बद्धे मौनं तत्सिद्धिहानिकृत्।
स्वयमेव सुबुद्ध्याय त्सर्ववस्तुषु वर्तते॥ १७५॥
शब्दै रनुपदिष्टैस्तु तन्मौनं सर्वसिद्धिदम्।
तस्मा द्वै श्राद्धभोक्तॄणां द्विव्येवा पितृकर्मणि॥ १७६॥
दद्या न्नैवेद्यवत्सर्वं मर्यादाभ्यन्तरे ऽग्रतः।
येनाचमनपर्यन्तं कालं तिष्ठन्ति वाग्यताः॥ १७७॥
विधिना नेन वै नित्यं यागयज्ञेतु वैष्णवे।
संविभागः पितॄणांच कार्य स्सद्द्रविणे नरैः॥ १७८॥
कृत्वातिलोदकान्तंवा फलमूलै स्स्वशक्तितः।
तदर्थं ग्रासमात्रन्तु दद्या द्वोप्यथ भैक्षुके॥ १७९॥
यस्मा द्दिव्ये महामन्त्रै र्दत्तं यत्पूजितेऽच्युते।
पित्रर्थ मल्पंवा भुवि तत्तेषा मक्षयं भवेत्॥ १८०॥
पश्चा च्छरीरयात्रार्थ मभ्यर्च्य परमेश्वरम्।
लब्धानुज्ञस्तुवकुर्या दात्मयागं यथाविधि॥ १८१॥
भोज्यं नैवेद्यपूर्वन्तु सर्वमादाय पात्रगम्।
विनिवेद्यच देवाय पवित्रीकृत्यचाम्भसा॥ १८२॥
सत्यरूपाग्निलक्ष्याचा प्यन्नदोष क्षयंकरी।
चेतसा चातुरात्मीया भावनीयाच भावना॥ १८३॥

रसात्माध्यक्षसंज्ञो वै साधुभावे व्यवस्थितः ।
प्रद्युम्नो भगवा न्रूपे चैतद्वीर्यैतु लांगलिन् ॥ १८४ ॥
भोक्ता महात्मा भगवान् वासुदेव स्स्वयं ह्यजः ।
चतुःप्रणवसम्भक्तं ततोऽम्भ श्चुळकं पिबेत् ॥ १८५ ॥
वङ्कुण्डेथ तेनैवा प्यन्नाहुतिचतुष्टयम् ।
हुत्वाचाभिमतै र्ग्रासै स्ततोऽश्नीया यथारुचि ॥ १८६ ॥
समाचम्य पुनर्याया त्प्रयतो भगवद्गृहम् ।
मनोबुद्ध्यभिमानेन संहृन्यस्य धरातले ॥ १८७ ॥
कूर्मव च्चतुरः पादान् शिरस्तत्रैव पञ्चमम् ।
प्रदक्षिणसमेतेन त्वेवंरूपेण सर्वदा ॥ १८८ ॥
अष्टांगेन नमस्कृत्य ह्युपविश्याग्रतः प्रभोः ।
आगमाध्ययनं कुर्या त्तद्वाक्यार्थविचारणम् ॥ १८९ ॥
प्राप्तेतु संध्यासमये स्नात्वावा जघनावधि ।
क्षाळयित्वा ततःकुर्या द्वासस्संम्परिवर्तनम् ॥ १९० ॥
अर्चयित्वार्घ्य पुष्पाद्यै र्देवमग्निं यजेत्ततः ।
यथाशक्ति जपं कुर्या दासाद्य शयनं ततः ॥ १९१ ॥
समाधाय च हृद्देवं निरालम्बपदेस्थितम् ।
अप्रयत्नेनवैताव दनिरुद्धेन तेजसा ॥ १९२ ॥
सह तेनैव वै निद्रा यावदभ्येति साम्प्रतम् ।
समुत्थायार्धरात्रेथ जितनिद्रो जितश्रमः ॥ १९३ ॥
कमण्डलुस्थितेनैव समाचम्यतु वारिणा ।
गुरुं देवं नमस्कृत्य ह्युपविश्याजिना सने ॥ १९४ ॥
न्यासं मन्त्रचतुष्केण कुर्यात्संहार लक्षणम् ।
आपादाज्जानुपर्यन्त मनिरुद्धंच विन्यसेत् ॥ १९५ ॥
प्रद्युम्नाख्यं न्यसेन्मन्त्रं नाभ्यन्तं जानुमण्डलात् ।
नाभेराकर्णदेशंतु मन्त्रं सांकर्षणं न्यसेत् ॥ १९६ ॥

आकर्णात् ब्रह्मरन्ध्रान्ते चतुर्थं विनिवेद्य च ।
ततस्त्वभिमतेनैव त्वास्ते पद्मासनादिना ॥ १९७ ॥
स्वात्मना चातुरात्मीय मभिमानं समाश्रयेत् ।
समं कायशिरोग्रीवं सन्धाय सह वक्षसा ॥ १९८ ॥
दृङ् नासाग्रगताकार्या विनिमीलित लक्षणा ।
जिह्वा तालुतलस्थाच सान्तरे दशनावली ॥ १९९ ॥
ईषदोष्ठपुटौ लग्नौ धार्यै द्वे बाहुकूर्परे ।
ऊरुमध्यप्रदेशेतु हस्तौ नाभावधोन्यसेत् ॥ २०० ॥
अधरोत्तर योगेन वामदक्षिणतः क्रमात् ।
अचलं योगपट्टेन त्वेवं सन्धार्य विग्रहम् ॥ २०१ ॥
संकोच्यापानदेशन्त्व प्युपरिष्टात्तमेवहि ।
विकास्यावर्णहीनेन ह्राणेना (?) लक्ष्यमूर्तिना ॥ २०२ ॥
विषयान्तान्निविष्टन्तु क्रमाच्चित्तं समाहरेत् ।
कुर्याद्बुद्धिलीनन्तु तच्च कुर्या त्स्वगोचरे ॥ २०३ ॥
समाधायात्मनात्मानं स्वहमन्त्रै स्ततः क्रमात् ।
आजाग्रत्पदभूमेर्वै यथावद्गदतः शृणु ॥ २०४ ॥
मध्याह्न भास्कराकारै स्त्वैः स्वंशान्तविग्रहैः ।
स्मरेत्पूर्वोदितं पद्मं चातुरात्म्यैरधिष्ठितम् ॥ २०५ ॥
ततो जाग्रत्पदस्थंचा प्यनिरुद्धंच मन्त्रराट् ।
परावर्त्यं शतं बुद्धया तदभिन्नेन चात्मना ॥ २०६ ॥
तन्मन्त्रजपसामर्थ्या त्तादात्म्य स्थितिबन्धनात् ।
महिमातु सविज्ञान स्तदीय स्तस्य जायते ॥ २०७ ॥
अभ्यासा द्वत्सरान्तेतु तदद्वैतसमन्वितम् ।
अथ प्रद्युम्नमन्त्रन्तु परावृत्य शतद्वयम् ॥ २०८ ॥

योयं सोहमतो नैव ह्यद्वैतेन सदैवहि ।
एवमेव समभ्यासा न्मतिमां श्छिन्नसंशयः ॥ २०९ ॥

तत्प्रभावाच्च तेनैव तथा कालेन जायते ।
अनेन क्रमयोगेन जपवृद्ध्यान्वितेनतु ॥ २१० ॥

निखिलंचाप्यधिकुर्यात मन्त्र वृन्दं पुरोदितम् ।
यावद्भाति भगवान् स्थाने पूर्वोक्त लक्षणे ॥ २११ ॥

प्रलीनमूर्तिरममो ह्यनन्तस्तेजसां निधिः ।
चिदानन्दघनश्शान्तो ह्यनौपम्यो ह्यनाकुलः ॥ २१२ ॥

समाधायात्मनात्मानं तत्र त्यक्त्वा जपक्रियाम् ।
ध्यातृध्येयविभागेन यावत्तन्मयतां व्रजेत् ॥ २१३ ॥

यदा संवेद्य निर्मुक्ते समाधौ लभते स्थितिम् ।
अभ्यासाद्भगवद्योगी ब्रह्म सम्पद्यते तदा ॥ २१४ ॥

तत्र श्रमजयं कुर्या त्यक्त्वा ध्यानासने क्रमात् ।
समाप्ते शयनस्थश्च कालं रात्रिक्षयावधि ॥ २१५ ॥

ब्राह्मे मुहूर्ते सम्प्राप्ते ह्युत्थाय शयनात्ततः ।
स्नात्वा भ्यर्च्य जगन्नाथं समिद्दानं समाचरेत् ॥ २१६ ॥

जुहुयाच्च यथाशक्ति ततस्तिलघृतादिवत् ।
ऊनातिरिक्त शान्त्यर्थं सर्वकर्म समाप्तये ॥ २१७ ॥

दद्या त्पूर्णाहुतिं कृत्वा पूर्ववत्सेचनादिकम् ।
ततो देवन्तु पीठस्थं कुण्डस्थमनलं ततः ॥ २१८ ॥

न्यासद्वयंच संहृत्य मनसाच स्वविग्रहात् ।
निश्शेषस्योपसंहारं कुर्यादर्घ्यादिकस्यच ॥ २१९ ॥

यागादेशात्तथा कुण्डा त्ततराद्यस्या खिलस्यच ।
सहोपलेन केनैव सर्वं ग्महासि निक्षिपेत् ॥ २२० ॥

सकृत्यहंच समाहं पक्ष म्मास मथापिवा ।
यो यजे द्विधिनानेन भक्तिश्रद्धा समन्वितः ॥ २२१ ॥
सोपियायात्परं स्थानं किम्पुनर्योत्रसंस्थितः ।
यावज्जीवावधिकाळं बद्धकक्ष्यो महामतिः ॥ २२२ ॥
इत्युक्तं चातुरात्मीयं समासादमलेक्षण ।
सबाह्याभ्यन्तरं सम्य क्ष्यातेयजनंशुभम् ॥ २२३ ॥
यज्ज्ञात्वाक्षय मायाति त्वविद्या बीजमक्षरम् ।
अचिरादेव भावनां भक्तानां भावितात्मनाम् ॥ २२४ ॥

इति श्रीपांचरात्रे श्रीसात्वतसंहितायां चातुरात्म्याराधनंनाम

षष्ठः परिच्छेदः ॥ ६ ॥

श्रीः ।

अथ सप्तमः परिच्छेदः ।

नारदः ।

प्रसन्नेनाथ विभुना यदुक्तो लांगली पुनः ।
निश्श्रेयसकरं कर्म तदाकर्णयताद्विजाः ॥ १ ॥

श्रीभगवानुवाच ।

शृणु ब्रह्ममयं पुण्य मपुण्यचयदाहकृत ।
तत्त्वतः प्रतिपन्नाना मचिरादेव सिद्धिदम् ॥ २ ॥
परं ब्रह्म परं धाम चातुरात्मक मव्ययम् ।
जाग्रत्संज्ञे स्वयं यत्तु पदे व्यक्तचतुर्भुजम् ॥ ३ ॥

न्यूनं कर्मात्मतत्त्वानां भवदुःखप्रशान्तये ।
भाव माक्रम्य रूपेण तेन मोक्षप्रदेनच ॥ ४ ॥

तत स्वप्यययोगेन स्वस्वमूर्तिचतुष्टयम् ।
नीत्वा परिणतिं योगा दात्मन्यास्तेच पूर्ववत ॥ ५ ॥

अनुग्रहार्थं भविनां नानाकृत्यानु वै पुनः ।
देहकान्ति मनुज्झित्य दिक्क्रमेणतु षं सह ॥ ६ ॥

पौरुषेणतु रूपेण प्रत्येकेन त्रिधा त्रिधा ।
वासुदेवादिकेनैव व्यक्तचक्रादिना युतम् ॥ ७ ॥

उत्कृष्ट्यादिगुणाढ्यानां माकृष्टे नान्ययाजिनाम् ।
वर्णानां जनकत्वेन व्यक्ति मभ्येति शाश्वतीम् ॥ ८ ॥

यां समाऽलम्ब्य संसारा दचिरादेव यान्तिच ।
सुप्रबुद्धां परं धाम दानधर्मव्रतादिना ॥ ९ ॥

कर्तव्यमिति वै कर्म त्वैश्वर्य य स्समाचरेत ।
भक्त्या व्रत च्छलेनैव तस्यायं विहितः क्रमः ॥ १० ॥

कार्तिकस्य दशम्यांच मासस्यतु निशागमे ।
घृतेन पञ्चगव्येन बिम्बयादाम्भसातुवा ॥ ११ ॥

कृत्वा स्वकोष्टसंशुद्धिं निर्हृत्योदरगं मलम् ।
स्मरन् प्रभुं समाचम्य पाणौ कृत्वा कुशोदकम् ॥ १२ ॥

तत्तोय पूर्वं संकल्प आवर्तव्यो व्रतंत्वति ।
ॐ वृताधिपतये देव नित्यनिर्मल मूर्तये ॥ १३ ॥

वत्सरं परपिण्डैस्तु त्वामहं तोषयाम्यजम् ।
प्रयतो दर्भशय्यायां क्ष्मातले रजनीं नयेत ॥ १४ ॥

एकादश्यां प्रभातेथ स्नात्वादेव मधोक्षजम् ।
ध्यात्वाभ्यर्च्य यथापूर्वं नाना नामान्तरै श्शुभैः ॥ १५ ॥

कराभ्यां लम्बमानाभ्यां संस्थितौ दक्षिणादितः ।
पद्मशंखौ सुशोभाढ्यौ यथातदवधारय ॥ १६ ॥
तर्जनी मध्यमाभ्यान्तु नम्राभ्यां मध्यमस्थितिम् ।
निषण्णं तलपर्यन्ते शंखनूर्ध्वमुखंशुभम् ॥ १७ ॥
सनाळं कमलं तद्व त्सितं विकसितंतु वै ।
मणिबन्धा दतिक्रान्तं किञ्चिच्छेषं लतागणम् ॥ १८ ॥
लम्बमान मधोवक्त्रं सांगुष्ठं संस्मरेद्विभोः ।
होमान्तमखिलं कृत्वा ध्यायेदनिमिषस्ततः ॥ १९ ॥
दिनमध्येऽर्चनं कुर्या द्दिनान्ते स्नानवर्जितम् ।
महाक्षै र्विविधै स्स्तोत्रै र्गीतवाद्य समन्वितैः ॥ २० ॥
निशांनीत्वा प्रभातेऽथ स्नानपूर्वं मजं यजेत ।
चतुरात्मान मव्यक्त मनुयागन्तु कर्मणः ॥ २१ ॥
उदितेथ निशानाथे चास्तंयाते दिवाकरे ।
क्षान्त्यर्थं मर्चनं कुर्या द्भूण्डवत्प्रणमेक्षितौ ॥ २२ ॥
चतुर्धावै चतुर्दिक्षु ततःकुर्या त्प्रदक्षिणम् ।
एकैकस्याग्र उच्चार्य चतुर्धातु पदं पदम् ॥ २३ ॥
तद्वाचका स्स्तोत्र मन्त्रा ततः कृत्वा स्वभावगम् ।
तद्व्यक्ति व्यंजकेनैव सद्वाक्यगणेनतु ॥ २४ ॥
जितंते पुण्डरीकाक्ष वासुदेवा मितच्युत ।
रागद्वेषादिनिर्मुक्त समस्तगुण मूर्तिमन् ॥ २५ ॥
नाथ ज्ञानबलोत्कृष्ट नमस्ते विश्वभावन ।
संकर्षण विशालाक्ष सर्वज्ञपरमेश्वर ॥ २६ ॥
देव - ऐश्वर्यवीर्यात्मन् प्रद्युम्न जगतां पते ।
नमस्तेऽस्तु [illegible] [illegible] जगन्मय ॥ २७ ॥

स्थित्युत्पत्तिलयत्राण हेतवे शक्तितेजसे ।
जयानिरुद्ध भगवन् महापुरुष पूर्वज ॥ २८ ॥

विधिनानेन वै कार्य पक्षयो रुभयोरपि ।
अब्जान्त मर्चनं विष्णो निष्कामेना ग्रजन्मना ॥ २९ ॥

एवं संकर्षणाद्यन्तु वासुदेवान्त मर्चनम् ।
विहितं क्षत्रजाते वै कर्तव्यत्वेन सर्वदा ॥ ३० ॥

प्रद्युम्नाद्यन्तु वैश्यस्य मुसलान्त मुदाहृतम् ।
सच्छूद्रस्या निरुद्धाद्यं प्रद्युम्नान्तं सदैवहि ॥ ३१ ॥

मूर्तीनां ध्यानकालेतु विशेष मवधारय ।
संकर्षणेऽजव द्रम्यां दक्षिणेतु करे गदाम् ॥ ३२ ॥

गृहीतां चिन्तये न्मध्या दधोवक्त्रेण पाणिना ।
अंगुळिद्वितयेनैव त्वंगुष्ठाद्येन लीलया ॥ ३३ ॥

प्राग्वद्वामकरे पद्मं प्रद्युम्नस्य निबोधच ।
दक्षिणे हेतिराट् तद्व दंगुळिद्वितयोपरि ॥ ३४ ॥

पूर्वव त्कमले वामे चतुर्थस्या धुनोच्यते ।
आदिव दक्षिणे पद्मं गदा वामे यथोदिता ॥ ३५ ॥

इति प्रथममूर्तीनां ध्यान मुक्तन्तु सार्चनम् ।
नित्यनैमित्तिकार्थन्तु निश्श्रेयसपदाप्तये ॥ ३६ ॥

भक्तिपूर्वांस्तु कैवल्या द्यलेना भ्यर्थयन्ति ये ।
वर्णा विप्रादय स्तेषां व्रताचरण मुच्यते ॥ ३७ ॥

श्रावणस्य दशम्यान्तु सर्व पूर्वोक्त माचरेत ।
स्मृत्वा कुशोदकाभ्यङ्गं स्मरन् देव मिदं पठेत् ॥ ३८ ॥

ॐ - सर्वभूतमयानादे यच्छ ते परमं पदम् ।
छिन्दि सांसारिकान् बन्धा नज्ञानतिमिरं हर ॥ ३९ ॥

ततो ध्यात्वा यज न्देवं चतुर्मूर्तिन्तु पूर्ववत् ।
गौणमुख्यै मंहच्छन्दैः जितंताद्यैः पदै स्ततः ॥ ४० ॥

व्यस्तै स्तत स्समस्तैश्चा प्येकैकं पुनरर्चयेत् ।
वाच्यभेदोक्ति योगेन समस्तेनान्यथा त्मनः ॥ ४१ ॥

इत्यर्चनं क्रमा त्कुर्या न्मूर्तै मूर्ते महामते ।
प्रणिपाताधिकं सर्व मावर्तव्यं यथास्थितम् ॥ ४२ ॥

तूर्यार्थं मौद्गलाद्यैस्तु मोक्षैकफललम्पटैः ।
विन्यासं लांछनानान्तु ग्रहणेनान्वितं शृणु ॥ ४३ ॥

अस्मि न्व्रते चतुर्णान्तु देवानां वस्तुसूचनम् ।
तिर्यक्स्वपक्षदेशाभ्यां स्थानाभ्यां मण्डला द्बहिः ॥ ४४ ॥

दक्षिणेतु गदाग्रस्य स्पष्टमुष्टिगदा भवेत् ।
वामेन कुक्षिकुहरा त्समाक्रान्तश्च शंखराट् ॥ ४५ ॥

परितो बाह्यतांगुष्ठं निषण्णं सर्वदा स्मरेत् ।
मुसलहस्ते द्वितीयस्य ध्येयश्शंखवर स्तथा ॥ ४६ ॥

चक्र अंगुष्ठ ऊर्ध्वस्थं वामहस्ते समुष्टिकम् ।
प्रद्युम्नस्य गदा वामे शरत्पूर्णास्तु दक्षिणे ॥ ४७ ॥

दक्षिणे त्वनिरुद्धस्य कमलं सूर्यवर्चसम् ।
वामतर्जनिगं चक्रं त्रिष्वंगुष्ठं स्मरेत् स्थितम् ॥ ४८ ॥

एवं यथा स्थितात् ध्याना त्फलमाप्नोति साधकः ।
सक्षीर मन्नपात्रन्तु विहितं मासि मासिच ॥ ४९ ॥

दानार्थं व्रतपर्यन्ते हेम रत्न तिलान्वितम् ।
निष्काम व्रतिनां नित्यं त्वन्ते गोदानमेवच ॥ ५० ॥

प्रतिमासं सकामानां दधिपात्रंच सोदनम् ।
फलानि हेमयुक्तानि त्वन्ते भूदानमेव च ॥ ५१ ॥

तिलान्युदक कुम्भंच पत्रपुष्पादिनार्चनम् ।
यथाशक्ति दरिद्राणां हिरण्यं गोसमं स्मृतम् ॥ ५२ ॥
दाने ऽर्चनेतु शूद्राणां व्रतकर्मणि सर्वदा ।
असिद्धान्नन्तु विहितं सिद्धंवा ब्राह्मणेच्छया ॥ ५३ ॥
स्वकर्मणा यथोत्कर्ष मभ्येति न तथार्चनात् ।
तस्मा त्स्वेनाधिकारेण कुर्यादाराधनं सदा ॥ ५४ ॥
सर्वत्राधिकृतो विप्रो वासुदेवादिपूजने ।
यथा तथा न क्षत्राद्या स्तस्माच्छास्त्रोक्त माचरेत ॥ ५५ ॥
नये न्नक्ताशने भक्त्या दिनान्येतानि मौद्गलः ।
व्रताद्यन्तेतु विहितं परिपीडं हितस्य वै ॥ ५६ ॥
यथाभिमत मासाद्वै समारभ्य क्रमेणतु ।
इति कर्तव्यता सर्वै र्मोक्षकामैस्तु चाग्रजैः ॥ ५७ ॥
दशम्यां चैव संकल्पः कार्यो द्वादश वार्षिकः ।
प्रागवदब्दन्तु सम्पूर्य दाने मासानुमासकैः ॥ ५८ ॥
व्रतेश्वरं जगन्नाथं प्रीणये द्वत्सरे गते ।
पुनरारम्भ मासाद्य त्वग्रचमासस्य तद्दिनात् ॥ ५९ ॥
आरभ्य वत्सरं प्राग्व त्पूजये त्प्रीणये त्प्रभुम् ।
क्रमेणानेन सम्पाद्य द्वादशाब्दं व्रतं महत् ॥ ६० ॥
तदन्तेतु यथा शक्त्या दाने र्वस्त्रानुलेपनैः ।
द्विषट्कं ब्राह्मणानान्तु यष्टव्य मधिकारिणा ॥ ६१ ॥
स्वमूर्त्या राधनाद्येन कर्मणाद्योतदेवहि ।
कार्यं व्रतमिदं भक्त्या ज्येष्ठायं क्षत्रियेणतु ॥ ६२ ॥
वैश्येनाश्वयुजादाद्या वावर्तव्यं समासतः ।
मौद्गलेनतु माघाद्यं पालनीयं यथाक्रमम् ॥ ६३ ॥

इदं व्रतोत्तमं दिव्य मपवर्ग फलप्रदम् ।
विहितं सर्ववर्णाना मनिरुद्धंच सर्वदा ॥ ६४ ॥
चान्द्रायणा द्युत्तम मासद्वैः कल्मषापहम् ।
वक्ष्ये व्रतवरंचान्य त्कर्तव्यत्वेन कर्मणाम् ॥ ६५ ॥
मोक्षैक फलकामाना मन्येषां भावितात्मनां ।
मोक्षदन्देहपाताद्य श्चातुरात्म्यैकयाजिनाम् ॥ ६६ ॥
यथाभिमतमासस्य दशम्यां पातये ज्जलम् ।
नत्वाव्रतेश्वरं प्राग्व द्वत्सरद्वितयस्यच ॥ ६७ ॥
विशेषाच्छ्रावणे कुर्या त्संकल्पं कार्तिकेपिच ।
आरम्भमासा दारभ्य निष्ठाख्यं यावदेवहि ॥ ६८ ॥
द्विषट्क मुपवासाना मेकवृद्ध्याचातु वर्धयेत् ।
होमान्त मर्चनं कृत्वा पूर्ववत्तन्मयोन्यसेत ॥ ६९ ॥
ततस्तुपरिपीडानां वत्सरं ग्रास माचरेत् ।
कार्यं मारम्भमासेतु पूर्वद्वादशरात्रिकम् ॥ ७० ॥
एकैकं लोपयेत्ताव द्यावदब्द स्समाप्यते ।
कुर्यात् व्रतसमाप्तिंतु पूर्वव त्पूजनादिना ॥ ७१ ॥
वृद्धिह्रासक्रमेणैतत व्रतमुक्त म्मयाचते ।
अनायासेनवैयेन प्राप्यते शाश्वतं पदम् ॥ ७२ ॥
व्रताना मुत्तमं धन्यं द्वादशाख्य मतश्शृणु ।
अकामानां सकामाना मन्ते तुल्यफलंहियत् ॥ ७३ ॥
सितपक्षात्तु चैत्रस्य कार्याद्येऽहनिकल्पना ।
गतेऽर्धरात्रसमये चाप्रभाता त्ततो ऽच्युतम् ॥ ७४ ॥
उपवासं विना भ्यर्च्य कार्यं वै नक्तभोजनम् ।
एकादश्यन्त मेवंहि पीतः पुन्येन लांगलिन् ॥ ७५ ॥

कार्यं मप्यययुक्त्या वै चातुरात्म्यस्य पूजनम् ।
एकादश्यां नभुंजीत विहित स्तत्र जागरः ॥ ७६ ॥
द्वादश्या मादिदेवन्तु समाराध्य यथाविधि ।
मध्याह्नसमये प्राप्ते विधिव त्तन्मयो न्यसेत् ॥७७॥
भक्त्या शक्त्यातु चतुर एकैकं प्रत्यहं त्वपि ।
गवां ग्रास स्स्वसामर्थ्या ल्लोपनीयो नसर्वदा ॥७८॥
सह पूर्वोक्तदानैस्तु व्रतकर्मपरायणैः ।
प्राप्तेतु तद्दिने भूयः कृष्णपक्षस्य लांगलिन् ॥ ७९ ॥
अर्चनं केशवादीनां त्रिसन्ध्यं प्राग्व दाचरेत् ।
द्वादश्यां सोपवासस्तु न्यस्ये द्दामोदरं प्रभुम् ॥ ८० ॥
दानान्त मर्चनाद्यन्तु सितपक्षोक्त माचरेत् ।
प्राभवेन क्रमेणैव चैवं मूर्त्यन्तरं यजेत् ॥ ८१ ॥
मूर्तिभि श्चाप्ययाख्येन संवत्सर मतन्द्रितः ।
यो यो धिकारी भक्तो वा तस्य तुष्य त्यधोक्षजः ॥ ८२ ॥
षोडशाख्य मतो वक्ष्ये व्रतं धन्यतमं हि यत् ।
पूर्वव द्वाविसमय आषाढस्याद्य वासरे ॥ ८३ ॥
गृहीत्वा नियमं कुर्या दाप्रभातादिपूजनम् ।
त्रिसन्ध्यं वामनादीनां विधिवत् द्वादशाहकम् ॥ ८४ ॥
त्रयोदश्यां ततोऽभ्यर्च्य चतुर्वर्गप्रदं प्रभुम् ।
आद्यन्त मनिरुद्धादि तदाद्य मपरेऽहनि ॥ ८५ ॥
तृतीयं पंचदश्यान्तु संशान्तिव्यक्तिलक्षणम् ।
एवं मूर्त्यन्तरे युक्तं चातुरात्म्यं त्रिधा स्थितम् ॥ ८६ ॥
आराध्य परया भक्त्या चैकादश्या मनश्नतः ।
पूर्णं तदर्चनं कृत्वा पंचदश्यां यथाविधि ॥ ८७ ॥
चत्वार स्तन्मयाः पूज्याः श्रद्धापूतेन चेतसा ।
आत्मयागं ततः कुर्या द्दिनान्ते चैनपूर्वकम् ॥ ८८ ॥

एव माश्वयुजे भूयः पर्वादौ प्रारभे त्क्रियाम् ।
पद्मनाभादिमूर्तीना मर्चनं विहितं क्रमात् ॥ ८९ ॥
एकादश्या मनश्नंस्तु सर्वं निर्वर्त्य पूर्ववत् ।
सम्प्राप्तेच ततः पौषे यजे न्नारायणादिकम् ॥ ९० ॥
द्वादश्यां तद्द्विषट्कंच तथा व्यूहत्रयं त्वपि ।
चैत्रे तद्दिवसा दादौ विष्ण्वादीनां समर्चनम् ॥ ९१ ॥
विहितं सकृतं ज्ञानां सह व्यूहत्रयेणतु ।
विशेषपूजनं कुर्या त्सम्पन्ने वत्सरे सति ॥ ९२ ॥
विप्रो रग्रे द्विजेन्द्राणां षोडशानां स्वशक्तितः ।
दत्ताशिष्ट मतृप्तंच द्वैपायनेन भावितम् ॥ ९३ ॥
हविश्शेषेण संयुक्तं व्रतिनां भोजनं हितम् ।
एवं सितेऽसिते वापि ह्युभयो रपि पक्षयोः ॥ ९४ ॥
यथाभिमतमासा द्वै समारभ्य यजे त्क्रमात् ।
एकादशेष्व मासेशान् पर्वादौतु सकृ त्सकृत ॥ ९५ ॥
द्वादश्यां सोपवासस्तु तन्मासेशमथार्चयेत ।
तत्कारणादि भेदोत्थं चातुरात्म्येन वै सह ॥ ९६ ॥
पुण्यं व्रतमिदं विद्धि वृद्धस्त्री बालसिद्धिकृत ।
नित्यं सद्वैष्णवैः कार्यं मविरुद्ध मखेददम् ॥ ९७ ॥
प्राक्प्रणीते महाभागे श्रद्धया दान समन्वितैः ।
गृहस्थै ब्रह्मचर्यस्थै र्वानप्रस्थैस्तु भिक्षुकैः ॥ ९८ ॥
येन केन प्रकारेण वित्तं सम्भृत्य वैपुरा ।
नित्यं धर्मा विरुद्धेन भैक्षपूर्वेण सर्वदा ॥ ९९ ॥
कुटुम्बभरणाद्यर्थं लाभे भैक्षादिकेतु वै ।
अवज्ञा परमा यत्र बुद्धिमां स्तत्र संवदेत ॥ १०० ॥
दाता ददाति यत्किंचि त्पूजा पूर्वंहि भक्तितः ।
कृत्स्नं तद्धर्ममशुभं तिष्ठत्यधिजनाश्रितम् ॥ १०१ ॥

परिभूतेतु वै लाभे सन्तोषो यस्य जायते ।
प्रतिग्रहोत्थितो दोष स्तस्य दूरतरं व्रजेत् ॥ १०२ ॥
एवं ज्ञात्वाप्यपात्राणां भक्तानां भावितात्मनां ।
जनयेद् दुर्बुद्धिभेदन्तु नेतरेषां कदाचन ॥ १०३ ॥
यत्र दाता गृहीताच द्वावेव कलुषात्मकौ ।
दृष्टादृष्ट विनाशार्थं ज्ञानं द्वाभ्यां द्रवं नु तत् ॥ १०४ ॥
प्रागेवं वित्तसंशुद्धिं भावशुद्धि समन्विताम् ।
निश्चयीकृत्य यत्नेन दिव्य मायतनं व्रजेत् ॥ १०५ ॥
धृतसंसिद्धये नूनं सिद्धायतनमेववा ।
अथवायतनं रम्य मासन्न नगरादिकम् ॥ १०६ ॥
निर्विघ्नेन व्रतं यस्मा त्रिष्वथेतात्र कर्मिणाम् ।
कर्मवाङ्मनसै श्शुद्ध स्तपो निष्ठःक्रियापरः ॥ १०७ ॥
यो नान्य देवतायाजी तत्वतो भगवन्मयः ।
कस्मिंश्चिद्वैभवे रूपे व्यूहीये वा सुबुद्धिमान् ॥ १०८ ॥
बद्धलक्ष्यो भवे द्भक्त्या स्वामागमनिदर्शनात् ।
तस्यापि तादृशानांच भविना मनुकम्पया ॥ १०९ ॥
व्यक्तता मगमद्देव स्स्वयमेव धरात्मना ।
यत्र मोक्षप्रदं विद्धि दिव्यमायतनं हि तत् ॥ ११० ॥
मन्त्रसिद्धैश्च विबुधै र्मुनिमुख्यै स्तथामलैः ।
शान्तये देशजानान्च प्यात्मनश्चापि कीर्तये ॥ १११ ॥
मन्त्राकृति मयं ध्यात्वा पाषाणं वसुधातले ।
पावनं वा ततं वृक्षं ज्ञात्वावा देवताश्रयं ॥ ११२ ॥
कृत्वा तच्छक्ति संरुद्धं विसृज्यच तदाश्रितम् ।
विद्धि सर्वेश्वरस्यैवं स्थितं निलय लक्षणम् ॥ ११३ ॥
स्वमन्त्र सन्निधिं तत्र कृत्वा तद्विग्रहान्वितं ।
पूजितं यत्र पुण्याद्यै स्तत्सिद्धा यतनं स्मृतम् ॥ ११४ ॥

फलप्रायेतु विप्राथे स्स्वकुलो द्धारणायच ।
स्थापितं भगवाद्धिम्बं ज्ञय मायतनं हितत् ॥ ११५ ॥
क्रियांगभागं यातस्य सर्वगस्यचवैविभोः ।
विद्धि सर्वेश्वरस्यैवं स्थितं नियत लक्षणम् ॥ ११६ ॥

स्वमन्त्र सन्निधिं तत्र कृत्वा तद्विग्रहान्वितं ।
प्रासादद्वार देशाच्च यत्रशांखध्वनिक्षयः ॥ ११७ ॥

पूर्वादिसर्वदिक्काव त्क्षेत्रं भवति वैष्णवम् ।
सिद्धावतारिताद्देवा त्तदेताद्विगुणं स्मृतम् ॥ ११८ ॥

त्रिगुणं च स्वयंव्यक्ता द्देहान्ते भाविता मनाम् ।
फलं सालोक्यता पूर्वं परिज्ञेयं क्रमाद्यतः ॥ ११९ ॥

दुष्टेन्द्रिय वशा च्चित्तं नृणां यत्कल्मषै र्वृतं ।
तदन्तकाले संशुद्धिं यातिनारायणालये ॥ १२० ॥

व्रता न्येतानियःकुर्या दभिसन्धाय चेतसा ।
अभीष्ट मतितीव्रेण तदाप्नो त्यचिरात्तुसः ॥ १२१ ॥

शुद्धधाने रत स्तस्मात दृष्टादृष्टफलाप्तये ।
व्रता न्येतानि कर्तव्या न्यभिसन्धाय चेतसा ॥ १२२ ॥
नावसादस्तु कर्तव्यो व्रतभंगा त्कदाचन ।
संकल्पादेव भगवां स्तत्वतो भावितात्मनाम् ॥ १२३ ॥
व्रतान्त मखिलं कालं सेचय त्यमृतेनतु ।
ज्ञात्वैवं वद्धलक्ष्येण भवितव्यं सदैवाहि ॥ १२४ ॥
प्राप्तये सर्वकामानां संसार भयभीरुणा ॥ १२४ ॥

इति श्री पाञ्चरात्रे श्रीसात्वत संहितायां व्रतविधिर्नाम

सप्तमः परिच्छेदः ॥ ७ ॥

श्रीः ।

श्रीमते रामानुजाय नमः ।

अथ अष्टमः परिच्छेदः ।

भगवान् –

व्रतमेतदमन्त्रं च सामान्यं सार्वलौकिकम् ।
लिवेतर विभागेन प्रोक्तं मन्त्र द्वयं शृणु ॥ १ ॥

प्रागथं प्रार्थयित्वातु दृष्टा दृष्ट मदस्सहि ।
ज्ञात्वा स्थिरमतिः कुर्या त्तदर्थं चक्रमण्डलम् ॥ २ ॥
तन्मध्ये चतुरात्मातु यष्टव्यः कर्णिकोपरि ।
चतुर्दिक्ष्वी क्षमाणस्तु वासुदेवादितः क्रमात् ॥ ३ ॥
हृदादिनेत्रपर्यन्त मंगषट्कं यजेत्ततः ।
अर्घ्यादिभिः क्रमा द्भोगै र्व्रतज्ञेन पुरोहितैः ॥ ४ ॥
ततः कुण्डान्तरेचैव संस्कृतेग्नौच विन्यसेत ।
चक्रं मन्त्रगणोपेतं समिद्भिस्तर्पये त्क्रमात् ॥ ५ ॥
पश्चात्तण्डुलसम्मिश्रै स्सघृतैर्बहुभि स्तिलैः ।
अर्घ्योदकेन शिरसा पवित्रीकृत्य साम्प्रतम् ॥ ६ ॥
नतजानुशिराश्शिष्यं कृत्वासौ श्रावयेत्प्रभुम् ।
त्वय्याराधनकामोयं व्रतं चरितु मिच्छति ॥ ७ ॥
संकल्पसिद्ध्यै भगव न्पूरयास्य मनोरथान् ।
इति विज्ञाप्य देवेशं ततः पुष्पाणि दापयेत् ॥ ८ ॥
अष्टांगमथवैकुर्या त्प्रमाणं सप्रदक्षिणम् ।
भूयोभूयो ऽनवच्छिन्नं भक्तिश्रद्धापुरस्सरम् ॥ ९ ॥
तत स्तस्योपदेष्टव्यं विधानं मन्त्रपूर्वकम् ।
स..तं षष्ठस्वरारूढं अनुस्वारविभूषितम् ॥ १० ॥

बीजमाद्यस्यच विभो वांसुदेवस्य कीर्तितं ।
तदेव जीवबीजस्थं षष्ठस्वरविवर्जितम् ॥ ११ ॥
द्वितीयस्वरसंयुक्तं संकर्षणस्य बीजराट् ।
उभयो रन्तरे रेफ माद्यबीजस्य योजयेत् ॥ १२ ॥
बीजं प्रद्युम्ननाथस्य तृतीयं सर्वकामदम् ।
जीवारूढं हकारन्तुं लान्तस्योपरि विन्यसेत ॥ १३ ॥
विसर्गसहितं बीजं मनिरुद्धस्य वाचकम् ।
द्विभुजा स्सर्वएवैते सूर्येन्दुशत सन्निभाः ॥ १४ ॥
तेजसा स्वन्नभेदोस्ति स्वरूपेण सितादिना ।
दक्षिणोत्तरपाणिभ्यां तर्जनी मध्यमान्तरे ॥ १५ ॥
आद्यस्य चक्रशंखौ द्वौ ध्येयावंसद्वयोपरि ।
स्कन्धसूत्रसमस्थेन दक्षिणेनतु पाणिना ॥ १६ ॥
गृहीता मुष्टिबन्धेन विश्रान्ता पीठपृष्ठतः ।
ध्येया गदा द्वितीयस्य तथाभूते करे परे ॥ १७ ॥
संस्मरे द्वैतिराडुदीमं लीलाक्षेप इवोद्यतम् ।
एवं प्रद्युम्ननाथस्य व्यत्ययेनतु ते उभे ॥ १८ ॥
दक्षिणोत्तर हस्ताभ्यां श्रोत्रमण्डल सम्मुखौ ।
शंखपद्मौ चतुर्थस्य तथाकृष्टौतु संस्मरेत ॥ १९ ॥
किन्तुवैपंकजं नाळ मस्यवैपाणिपृष्ठगम् ।
हकारंच सकारस्थं कृत्वा षोढानिवेश्यच ॥ २० ॥
द्वितीय तुर्यषष्ठाष्ट द्विषट्कदशकैः क्रमात् ।
स्वरैर्नियोजये द्विद्वि हृदाद्या न्नेत्रपश्चिमान् ॥ २१ ॥
चातुरात्मीय मन्त्राणां साधनत्वेन सर्वदा ।
त्रिधा हकारं कृत्वादौ जीवबीजं तथैवच ॥ २२ ॥
ककारंच क्षकारंच लिखेत्तद्वात्रिधा त्रिधा ।
द्विषट्कमेव बीजानां क्रमादादौ निवेश्यच ॥ २३ ॥
ततो वायुधरावारि संज्ञं यद्याक्षरत्रयम् ।
पौनः पुन्येन सर्वेषा मधोभागे नियोजयेत् ॥ २४ ॥

सर्वे षष्ठस्वरारूढ़ा अनुस्वारविभूषिताः ।
बोद्धव्याः केशवादीनां बीजास्त्वेते पृथक्पृथक् ॥ २५ ॥
क्षहसत्रितयं ह्येत च्चतुर्धाविलिखे त्क्रमात् ।
ततोद्विषट्कं बीजानां तस्याधो विनिवेश्यच ॥ २६ ॥
क्रमेण सप्तमाद्वर्गात द्वितीयंच चतुर्थकम् ।
पुनस्तृतीयंतुर्यंच द्वितीयं च तृतीयकम् ॥ २७ ॥
द्वितीयं च चतुर्थंच चतुर्थं तदनन्तरम् ।
तृतीय मष्टमंचाथ तृतीयं सप्तमात्पुनः ॥ २८ ॥
नवम द्वादशाभ्यांतु विशेषमिम(?) मामच ।
अधोनियोजयेद्रेफं तत्त्रयाणांतु मूर्धनि ॥ २९ ॥
षट्सप्तमाष्टसंज्ञाना मिकारमुपरिन्यसेत ।
सानुस्वारंच सर्वेषा मितिदेवीगणस्यच ॥ ३० ॥
बीजद्वादशकं प्रोक्तं यथाचानुक्रमेणत ।
श्रीश्च वागीश्वरीकान्तिः क्रियाशक्ति विभूतयः ॥ ३१ ॥
इच्छाप्रीती रतिश्चैव मायाधी र्महिमेतिच ।
समुद्रमूर्तये स्वाहा पमस्य प्रणवादिकः ॥ ३२ ॥
सर्वान्तश्चारिणेकृत्वा ततोगगन मूर्तये ।
स्वाहान्तः प्रणवान्तश्च मन्त्रश्शंखस्य कीर्तितः ॥ ३३ ॥
ओंकारो वेदमात्रेथ विद्ये स्वाहा पदंतुवै ।
गदामन्त्र स्स्वयंप्रोक्त श्चक्रस्याथ निगद्यते ॥ ३४ ॥
ओंकारान्ते पदं दद्यात्पंचार्णं प्रभविष्णवे ।
श्लिष्टौ विकासितौ हस्तौ योज्यौ च्चामणि बन्धनात ॥ ३५ ॥
तद्वाहुकौ खरौ (?) द्वौच नाभौ संरोध्य दण्डवत् ।
ईषद्दै ढोलये त्पश्चा दध ऊर्ध्वंच तौ करौ ॥ ३६ ॥
गुप्तिः कृत्वातु योज्यैषा मुद्राराधनकर्मणि ।
भासाच प्राक्स्थिता मर्चा स्वयं वा समपृष्ठताम् ॥ ३७ ॥

सर्वलक्षणसम्पन्नां यस्यां चेतः प्रसीदति ।
हेमाद्रिनिर्मितं कुर्या त्पीठं वा लक्षणान्वितम् ॥ ३८ ॥
समं त्रिभागन्यूनं वा द्वादशांगुळविस्तृतम् ।
चतुरश्रं चतुष्पादं विस्त [?] रार्धेन चोन्नतम् ॥ ३९ ॥
तृतीयं भाग मादाय विस्तराच्च [विस्तरच्च] स्वरं स्वकम् ।
तेन तन्मध्यगं कुर्या त्कमलं लक्षणान्वितम् ॥ ४० ॥
द्विपट्कारन्तु तद्वाह्ये चक्रं सर्वांगचिह्नितम् ।
सिद्धामरनरादीनां हृदयस्थाक्षराच्युति (?) ॥ ४१ ॥
मृदुमुच्चरणाकान्ति निर्मुक्ताकृतिलक्षणा ।
पादाम्बुरुहमुद्राथ कार्यावै कर्णिकोदरे ॥ ४२ ॥
सम्पाद्य चैव माधारं पीठं वार्चान्वितं स्मरेत ।
पादाब्जमुद्रारहितं कुण्डं तद्दतु कल्पयेत् ॥ ४३ ॥
फुल्लपद्मसमाकार मोष्ठयोनिसमन्वितम् ।
चलमेकदिशिस्थंवा ततो नियम माचरेत ॥ ४४ ॥
संवत्सरस्य पूजार्थं विभो वैं द्वादशात्मनः ।
मार्गशीर्षा त्समारभ्य मासाद्वै कौमुदान्तिमम् ॥ ४५ ॥
मासेशमन्त्रसंजमं युक्तं होमकुशाम्बुना ।
दशम्यां पंचगव्यञ्च पिबे त्सम्पूज्य केशवम् ॥ ४६ ॥
तन्निवेदित मन्नंच प्राग्भुक्त्वातु घृताधिकम् ।
नातीव तृप्तिजनकं दन्तकाष्ठ मथाचरेत् ॥ ४७ ॥
शयनं मंत्रतोयेन प्रोक्षये त्सकुशं ततः ।
शयनस्थो जपे न्मन्त्रं शत मष्टाधिकन्तु वै ॥ ४८ ॥
एकादश्यां प्रभातेथ मध्याह्नेवा दिनक्षये ।
केशवाय नमस्कुर्या द्वहुशः प्रणवादिकम् ॥ ४९ ॥
तस्य वै पूजनं भक्त्या कुर्या त्कालत्रयंतु वै ।
सर्वगं परमं ज्योति रमूर्त ममलंहि यत ॥ ५० ॥

सएव वासुदेवेति मत्वा सम्य ग्यजे ततः ।
चेतसा मृतसंकाशैः पुष्पाद्यै रखिलैः प्रभुम् ॥ ५१ ॥
पश्चात्त ममलं धाम ध्याये न्मुक्त मनश्वरम् ।
श्रोणीतटार्पितकरं सानुकम्प मनूपमम् ॥ ५२ ॥
दक्षिणेनतु हस्तेन भक्ताना मभयप्रदम् ।
पुष्पाभरणवस्त्राढ्यं शंखचक्रद्वयान्वितम् ॥ ५३ ॥
तत स्तस्मात्तु वै धाम्नो युगप न्निस्सृतं स्मरेत् ।
महत्स्फुलिंगसंकाशं महस्तु सततोदितम् ॥ ५४ ॥
तेन चाक्रमराब्रृन्दं समाक्रान्तंच भावयेत् ।
अथ प्रत्येकतेजोंशा दुद्भूतं भावये त्क्रमात् ॥ ५५ ॥
त्रयं त्रयं सिताद्येच केशवाद्यं चतुर्भुजम् ।
दक्षिणोत्तरपाणिभ्यां पृष्ठतः केशवादिषु ॥ ५६ ॥
युग्मं युग्मं परिज्ञेयं क्रमेणोर्ध्वगतंच तम् ।
शंखचक्र कजंविद्या त्साथ शंखो थहेतिराट् ॥ ५७ ॥
विद्या चक्रंच तद्विद्या त्पद्म श्शंखश्च सोम्बुजम् ।
पद्मध्वनिगदाशंख स्थविद्याम्बुरुह स्स्वरी ॥ ५८ ॥
भूयो धामगणा त्तस्मा त्संस्मरे न्निस्सृतं महः ।
केशवादिविभागेन श्रियाद्यंच त्रयं त्रयम् ॥ ५९ ॥
कमलादित्रयेणैव स्वन्योन्यत्वेन लांछितम् ।
बद्धपद्मासनस्थंच दिवि दिक्षुच सम्मुखम् ॥ ६० ॥
संवीजयेत्तु विनया च्चामरेण सितेनच ।
देवीद्वादशकंचैव तासां रूप मथोच्यते ॥ ६१ ॥
पूर्णचन्द्रानना स्सर्वा स्सर्वर्तुकुसुमान्विताः ।
सर्वलक्षणसम्पन्ना स्सर्वाभरणभूषिताः ॥ ६२ ॥
विद्रुमाभं त्रयं त्वाद्य मपरं चम्पकप्रभम् ।
प्रियंगुमंजरीश्यामं तृतीयं देवतात्रयम् ॥ ६३ ॥

चतुर्थं त्रितयं ध्याये ज्जातीपुष्पसमप्रभम् ।
आद्यायाः कमलं पाणा वन्यस्याहेदिराट्करे ॥ ६४ ॥
शंखं ध्याये त्तृतीयस्या एवं ध्याये त्त्रिषु त्रिषु ।
चतुस्त्रिदेवतान्ताना मेव माद्यं त्रयं क्रमात ॥ ६५ ॥
स्मृत्वा सम्पूजनं कुर्या ज्जागरेण समन्वितम् ।
स्तोत्रै स्तथाऽनकै र्वाद्यै र्गीतकैः क्षपये न्निशाम् ॥ ६६ ॥
रात्रिक्षये ततः स्नाया त्सिताम्बरधर श्शुचिः ।
मासेशमन्त्रसन्नद्धं कृत्वा देवं स्मरे त्तथा ॥ ६७ ॥
पूजापनयनं कृत्वा स्नानकर्म समाचरेत ।
मध्यतः केशव[केवल]स्यादौ [केशव]केवलस्य महात्मनः ॥६८॥
वासुदेव [स्य] स्व रूपस्य चक्रस्थस्य त्वनन्तरम् ।
प्रागरेभिनिविष्टस्य सकलस्या व्ययस्यच ॥ ६९ ॥
तदादिद्वादशानांच दद्या त्स्नानादिकं क्रमात् ।
अम्बुना पंचगव्येन क्षीरेण तदनन्तरम् ॥ ७० ॥
दध्ना घृतेन मधुना सर्वौषधिजलेनच ।
बीजाम्बुफलतोयेन गन्धपुष्पाम्बुना ततः ॥ ७१ ॥
हेम रत्नोदकेनाथ कुम्भस्थेन पृथक्पृथक् ।
सितं विलेपनं पुष्पं धूपम्मधुयुतं दधि ॥ ७२ ॥
नैवेद्यं विविधं पूतं व्रीहयोयवसंयुतम् ।
निवेद्य राजते पात्रे यथाशक्तिविनिर्मिते ॥ ७३ ॥
पात्राभावाच्च रजतं स्वल्पमात्रं न लोपयेत् ।
पश्चात्तद्भगवत्पूतं मधुपर्कादिकन्तु वै ॥ ७४ ॥
प्रतिपाद्य गुरो र्भक्त्या प्रसन्नेनान्तरात्मना ।
यवान्नं व्रीहिजं त्वादौ समश्नीया द्घृतान्वितम् ॥ ७५ ॥
ततः प्रभृति कालाच्च प्रत्यहं केशवस्यतु ।
स्थानद्वये निविष्टस्य पूजनंच समाचरेत ॥ ७६ ॥

प्राग्वन्मध्ये केशवस्य देवीयुक्तस्य बाह्यतः ।
ततो नारायणादीनां सदेवीनांच वैक्रमात ॥ ७७ ॥
सर्वेषां पूजनं कुर्या त्प्रादक्षिण्येन यत्नतः ।
यथा सम्भवतो भक्त्या पुष्पधूपादिकेनतु ॥ ७८ ॥
यावदभ्येति दशमी सिता पौषस्य वैतिथिः ।
ततः प्रभृतिकालाच्च प्रागुक्तविधिनाखिलम् ॥ ७९ ॥
नारायणाख्यमन्त्रेण व्रतकर्मसमापयेत ।
त मर्चये त्तु प्रथमं मध्ये कारुण्यमूर्तिगम् ॥ ८० ॥
बहिर्देवीसमेतंच प्राग्वत्स्नानादिना प्रभुम् ।
द्वादश्यां तं विधानेन केशवेन समन्वितम् ॥ ८१ ॥
किं तत्र विहितं पश्चा त्पूजनं केशवस्यच ।
दिनावसाने द्वादश्यां धूपं दत्वा क्षमापयेत् ॥ ८२ ॥
कान्तासमन्वितं देवं केशवं क्लेशनाशनम् ।
अथ दामोदरान्ताभि र्मूर्तिभिश्च समन्वितम् ॥ ८३ ॥
देवं नारायणं भक्त्या परेहनि समर्चयेत् ।
मध्ये केशवव त्पश्चा च्चक्रस्थं केशवारके ॥ ८४ ॥
केशवंच तदीये रे यजे त्कान्तासमन्वितम् ।
एवं प्रतिदिनं ताव द्यावन्मासस्य सा तिथिः ॥ ८५ ॥
ततो माधव मूर्तेर्वै प्राग्वदाराधनं भवेत् ।
तदर्चने समाप्ते तु द्वादश्यो फाल्गुनस्यच ॥ ८६ ॥
संकर्षणं परत्वेन भावये द्वासुदेववत ।
तदाश्रितन्तु गोविन्दं मध्ये मूर्तं समाह्वयेत् ॥ ८७ ॥
च्चक्रस्थं सह देव्यावै ततस्तं पूज्यपूर्ववत ।
रक्तचन्दन युक्तेन कुंकुमेन तथैव च ॥ ८८ ॥
पुष्पस्र ग्वाससा तद्व द्रक्तशाल्योदनेन च ।
सुगन्धेन फलै रक्तै र्लिप्तै र्वा रक्तधातुभिः ॥ ८९ ॥

आरक्तरक्तसंसिद्धे विद्रुमैः पुरुभूषितैः ।
सक्तूंस्तु ताम्रपात्रेतु कृत्वाथ विनिवेद्यतु ॥ ९० ॥
तदर्चनेच होमान्ते सम्पन्ने सति वै प्रति ।
याते वासत्रये चैव प्रसन्ने न्तःस्थिते च्युते ॥ ९१ ॥
गुरुमूर्तिगतो देवः पूजनीयश्च भक्तितः ।
वस्त्रै विलेपनै र्माल्यैः कटकै रंगुळीयकैः ॥ ९२ ॥
यथाशक्ति विना शाठ्यं पारणे पारणे ततः ।
प्रीणये द्वासुदेवश्च मूर्तित्रयसमन्वितम् ॥ ९३ ॥
ऐहि [कं] कान् धर्मकामा [र्थ] र्था न्मम यच्छन्तु शक्तयः ।
मोक्षविघ्नोपशमनं नित्यं कुर्वन्तु मूर्तयः ॥ ९४ ॥
सर्वदा नित्यशुद्धो यः परमात्मा परः प्रभुः ।
पतितस्य भवाम्बोधौ वासुदेवो स्तु मे गतिः ॥ ९५ ॥
कृत्वैवं प्रीणनं सम्य ग्वासुदेवस्य भक्तितः ।
तन्मूर्तित्रितयस्यापि शक्तित्रययुतस्य च ॥ ९६ ॥
अथ त्रितययुक्तस्य तृतीयस्य महात्मनः ।
सङ्कर्षणाभिधानस्य तत आरभ्य यत्नतः ॥ ९७ ॥
प्राग्व दाराधनं कुर्या त्प्रत्यहं मासभेदतः ।
पश्चा न्मासत्रये याते प्राप्ते ज्येष्ठस्य तद्दिने ॥ ९८ ॥
त्रिविक्रमाख्यमन्त्रेण चान्य त्सर्वं पुरोदितम् ।
मध्यतो म्बुजगर्भस्थं प्रद्युम्नं सर्वगं स्मरेत ॥ ९९ ॥
त्रिविक्रमं तदाकारं भावयित्वा ततो यजेत् ।
अनन्तरंच संस्थाना दानीय प्रागरान्तरम् ॥ १०० ॥
यष्टव्यस्य विशेषेण त्वनुज्झिततनुः [पुमान्] क्रमात् ।
श्रीखण्डंच सकर्पूर मीषत्कुंकुमभावितम् ॥ १०१ ॥
पीतं विलेपनं चात्र तथा पुष्पफलादिकम् ।
पीतानां फळपुष्पाना मभा [वात्] वे मसृणेनतु ॥ १०२ ॥

पूतेन धातुचूर्णेन रंजये त्कुंकुमेन वा ।
सघृतं हेमपात्रंच पूजान्ते विनिवेद्यच ॥ १०३ ॥
पात्राभावात् [च] यथाशक्ति कांचनंच घृतोपरि ।
तत स्सम्पूजनं कुर्यात व्रतादेष्टारि पूर्ववत ॥ १०४ ॥
गोहेमवस्त्रपूर्वैस्तु यथा सन्तोष मेति सः ।
तत्पूजान्ते पारणेन द्वितीयंच जगत्पतिम् ॥ १०५ ॥
प्रीणये त्संकर्षणं च गृहीत्वा पाणिना जलम् ।
प्रणवाद्येन तेनैव मन्त्रेणा चोदितेनच ॥ १०६ ॥
सनमस्केन किन्त्वत्र गति स्संकर्षणोस्तु मे ।
अथ त्रिविक्रमं देवं वामनं श्रीधरं प्रभुम् ॥ १०७ ॥
यजे न्मासत्रयं ताव द्याव त्स्या द्दशमी सिता ।
तदादि वै हृषीकेश मन्त्रेणा खिल माचरेत् ॥ १०८ ॥
परत्व मनिरुद्धस्य प्राप्तिचावसरे स्मरेत् ।
तदाकारं हृषीकेशं पद्मोदर गतं स्मरेत् ॥ १०९ ॥
इष्टासम्य ग्विधानेन चक्रारस्थं यथा पुरा ।
मन्त्रराजोप चारै [लाभै]स्तु षट्पदा[दै] भैस्तुचार्चनं ॥११०॥
पुष्पोदनाम्बरैः कुर्या दभावाद [वेचा] अनाि◌ना ।
पिंजरी कृत्य यत्नेन देवाय विनिवेद्यच ॥ १११ ॥
कृष्णागरु विमिश्रंच लेपनं चात्र कुंकुमं ।
धौतायसमयं पात्रं मणिभि श्चासितै श्चितम् ॥ ११२ ॥
वस्त्रैश्च चिनितैः कृष्णैः पूजान्ते विनिवेद्यच ।
सम्य क्तदर्चनं कृत्वा यथा सम्पत्ति भक्तितः ॥ ११३ ॥
तृतीयं प्रीणये त्प्राग्व त्प्रद्युम्नो मेस्तु वैगतिः ।
ततो मासानुमासंच हृषीकेशा दनन्तरम् ॥ ११४ ॥
पद्मनाभं समभ्यर्च्य ततो दामोदरन्तुवै ।
गते मासत्रये ह्येवं सम्प्राप्य पुनरेवहि ॥ ११५ ॥

दशमीं मार्गशीर्षस्य तदा कर्माणि कर्मणि ।
चतुर्षु चातुरात्मीयं मन्त्राणां विनियोज्यच ॥ ११६ ॥
चतुर्मूर्त्यभिधानंच समालम्ब्यं यजेत्तु तत् ।
कर्णिकोपरि पत्रेषु प्रागादि हृदयादिकम् ॥ ११७ ॥
विदिक्स्वस्त्रं विभोरग्रे नेत्रं वै केसराणिच [श्रितं] ।
अरान्तरे तत स्स्वेस्वे दशद्वौ केशवादिकान् ॥ ११८ ॥
चतुर्वर्णैस्तु कुसुमै स्तथा वस्त्रानुलेपनैः ।
तद्वद्धूपैश्च नैवेद्यैः पानकैः पावनैः फलैः ॥ ११९ ॥
अथान्यै र्विविधै र्भोगैः ध्वजाद्यैश्चापि वाहनैः ।
मात्राभि स्सहिरण्याभि स्ताम्बूलेनात्मना ततः ॥ १२० ॥
तर्पये द्वह्निमध्यस्थं मन्त्रग्रामं यथोदितम् ।
ततोर्चनं गुरोः कुर्या द्विशेषेण पुरोदितम् ॥ १२१ ॥
ब्राह्मणान्भोजये त्पश्चा त्तेभ्यो दद्याच्च दक्षिणाम् ।
प्रीणनंच पठे त्प्राग्व दनिरुद्धोस्तु मे गतिः ॥ १२२ ॥
ततः पूर्णाहुतिं दद्या त्पश्चादिद मुदाहरेत् ।
व्रतोत्तमेना नेनाद्य मया भक्त्याकृतेनच ॥ १२३ ॥
चत्वारो वासुदेवाद्या मूर्तय श्शक्तिभि स्सह ।
प्रयान्तु प्रीति मतुलां दिशन्तु भविनो ऽभयम् ॥ १२४ ॥
धन्यं व्रत मिदं पुण्यं संसाराध्व निवर्तनम् ।
अल्पक्लेशमसम्पूर्ण मनन्तफलदं नृणाम् ॥ १२५ ॥
मा वसाद स्ववतः कार्य एतदाचरणे तु वै ।
यथो पसदनैः कार्यं प्रथमै र्मध्यमै र्जनैः ॥ १२६ ॥
अशाठ्येन यथाशक्ति त्वारण्यैः कुसुमादिकैः ।
अद्भि र्दूर्वाङ्कुरैः पत्रै र्जप जागरणादिना ॥ १२७ ॥
दीपेना भ्युक्षणेनैव मार्जनेनो पलेपनैः ।
व्रीहीन् सक्तू नथाज्यंच तिला न्यत्रान्यथा हरेत् ॥ १२८ ॥

संवत्सरस्य पूजार्थं दानार्थं प्राशनायच ।
पूर्वं मासत्रयं दद्या द्व्रीहीं न्वै विनिवेद्यच ॥ १२९ ॥
द्वादश्यां भोजना त्पूर्वं हितं तत्प्राशनं सदा ।
अपरं सक्तवश्चैव तृतीयं त्रितयं घृतम् ॥ १३० ॥
तिलानां त्रितयं चान्य त्प्राशनं चैव मेव हि ।
स्या दद्यैकादशीपूर्णा द्वादश्याथ तया सह ॥ १३१ ॥
परे हनि तदा कुर्यात द्वादश्या मर्चनादिकम् ।
संवत्सरस्य वैमध्याद्य स्त्वेकां कर्तु मिच्छति ॥ १३२ ॥
तस्या मपि स्वमन्त्रेण कर्मपूजान्त माचरेत् ।
यथा प्राँतस्तु पुष्पाद्यैः प्रागुक्तांगै स्सहार्चनम् ॥ १३३ ॥
पररूपस्य मध्येतु पूजनं स्वे [नके] न्वगेव हि ।
केवलस्य तु तस्यैव स्वनाम्ना प्रीणनं हितम् ॥ १३४ ॥
पारणं प्रा ग्विधानेन त्वेकं भूरिफलप्रदम् ।
शस्मा द्वे त्रीणि वा कुर्या त्स्वशक्त्या श्रद्धया न्वितः ॥ १३५ ॥
नारी ह्यनन्यशरणा यथेवंहि समाचरेत ।
निस्स्वामिका वानुज्ञाता पत्या साथाप्नुयाच्च तत् ॥ १३६ ॥
अथापवर्गदं वक्ष्ये चातुर्मास्यं व्रतोत्तमम् ।
यत्कृत्वा भिमता न्कामा निहैव लभते नरः ॥ १३७ ॥
गृह मासाद्य निर्बाधं देशे वा जननाकुले ।
यथाविभवविस्तीर्णं तुर्यांश्रं वा यथायतम् ॥ १३८ ॥
धूमनिर्गमनोपेतं गवाक्षगणभूषितम् ।
इष्टकाद्यै श्चितं कुर्या त्तन्मध्ये पिण्ढि [ता] कात्रयम् ॥ १३९ ॥
चतुरश्रंच विच्छिन्नं भूमेः किञ्चि त्समुन्नतम् ।
ततो दक्षिणदिग्वेदे रूर्ध्वं कुण्डन्तु पूर्ववत् ॥ १४० ॥
मध्ये चन्दनमिश्रेण रोचना कुंकुमेन च ।
गोक्षीरमर्दितनैव मासि मासि लिखे च्छुभम् ॥ १४१ ॥

चक्रं षट्पत्रगर्भन्तु स्नानपीठ मुदग्दिशि ।
तत स्त्वाषाढमासस्य दशम्या मुदितेन्दुना ॥ १४२ ॥
वासुदेवाख्यमन्त्रेण तोय मादाय पाणिना ।
भगवन्पुण्डरीकाक्ष सर्वभूतपते ऽच्युत ॥ १४३ ॥
व्रतं मे त्वत्प्रसादेन निष्पद्य तु तवाग्रये ।
ततो र्चये द्वासुदेवं द्वादश्यां कमलोदरे ॥ १४४ ॥
प्रागाद्यावथ पत्राणां त्रयं संकर्षणादिकम् ।
प्रादक्षिण्येन विन्यस्य यावद्रक्षः पदच्छदम् ॥ १४५ ॥
ईशानपद् पत्राख्या प्यनिरुद्धादिकत्रयम् ।
अप्ययेन तु सम्पूज्य याव त्पश्चिम दिग्दळम् ॥ १४६ ॥
भूतावासं पुनर्मध्ये तत श्चक्रारकेषु च ।
क्रमेण पूर्वा दारभ्य न्यासं पूजनमाचरेत् ॥ १४७ ॥
वामनं चाथ तद्देवीं भूमन्त्वंच तत शिरः ।
श्रीधर स्त्वथ तत्कान्ता शिखाकवचमेवच ॥ १४८ ॥
हृषीकेशश्च तत्पत्नी ह्यस्त्रं तदनु लोचनम् ।
ध्यानं स्नानं तथा पूजां होमं जपसमन्वितम् ॥ १४९ ॥
क्रमेणानेन सर्वेषां सर्वदैव समाचरेत् ।
द्वादश्यां श्रवणस्याथ मध्ये संकर्षणं यजेत् ॥ १५० ॥
तत्पत्राभ्यां वासुदेवं चक्रारेष्वधपूर्ववत् ।
तृतीयं पद्मनाभाद्यं तथा देवीं हृदादियत् ॥ १५१ ॥
ततो नभस्य द्वादश्यां प्रद्युम्नः कर्णिकागतः ।
आद्यस्तत्पत्रगो ऽराणां त्रयं नारायणादिकं ॥ १५२ ॥
देव्यश्चैवांगषट्कंतु पूर्ववच्चारकान्तरे ।
ततस्तदग्र द्वादश्या मनिरुद्धं यथापुरं ॥ १५३ ॥
पत्रयुग्मे तदीयेतु चादिदेवं यजेत्क्रमात् ।
त्रिविक्रमान्तं विष्णवाद्यं शक्तिरंगान्यथाद्विवत् ॥ १५४ ॥

तत्रा लिङ्गे मन्त्रवरैः कर्म निःशेष माचरेत् ।
द्वादश्यां पूर्ववन्मध्ये षड्कुन्दुलयरूपधृक् ॥ १५५ ॥
मूर्तयोऽरान्तरस्थाश्च नेमिस्था देवतागणाः ।
पूजाहोमा विशेषेण पूर्णान्तं पूर्वचोदितम् ॥१५६॥
इत्येतत्तद्विशेषंच व्रतमुक्तं समासतः ।
यत्कृत्वा पुनरप्यत्र जायते न पुनर्भवे ॥१५७॥

इति श्रीपाञ्चरात्रे श्री सात्वतसंहितायाम्
संवत्सरविधि नाम
अष्टमः परिच्छेदः ॥८॥

अथ नवमः परिच्छेदः ।

श्रीनारदः ।

अथकाङ्क्षिनादेव अक्षय्य कपरिचोदितः ।
यत्तच्छृणुत विप्रेन्द्राः कथ्यमानं मयाधुना ॥ १ ॥

संकर्षणः ।

सूक्ष्मव्यूह विभागेन सबाह्याभ्यन्तरंस्थितत् ।
परस्य ब्रह्मण स्तम्य ज्ञातमाराधनंमया ॥ २ ॥
इदानीं श्रोतुमिच्छामि विभोस्तद्विभवात्मनः ।
आराधनं यथावच्च भक्तिनामीप्सितप्रदं ॥ ३ ॥

भगवान् ।

वैभवीयो महाबुद्धे देवतानिचयोमहान् ।
पद्मवतस्ते मयापूर्वं मेकैकं विद्धि तत्त्विधा ॥ ४ ॥

चतुर्णां युगसन्धीनां गुणानाञ्च तथैवहि ।
विश्वविप्लव दोषाणां विनाशाय समुद्यतं ॥ ५ ॥
सितरक्तादिरूपेण स्वकदस्त्र कराङ्कितं ।
कार्यारम्भे तथामध्ये ह्यवसानेतु सर्वदा ॥ ६ ॥
सन्धत्ते रूपमात्मीय मेकएव त्वनेकधा ।
श्रेयसे सर्वलोकानां स्थूलवत्कामरूपधृत ॥ ७ ॥
मनुष्येनेनवपुषा कुन्देन्दुधवलेनच ।
वीरासनादिनाचैव स्थितम्मुदितमानसं ॥ ८ ॥
लीलाविधृतसर्वास्त्रं सौम्यवक्त्रमनाकुलं ।
धियादोषगणंसर्वं ध्वंसयन्तंच मोक्षिणां ॥ ९ ॥
तद्वचक्तं शान्तसंज्ञंच रूपंरूपवतांवरं ।
प्रकाशयतिसन्मार्ग समाधिनिरतात्मनां ॥ १० ॥
तेजोमयं यत्तद्रूपं वैभवं शान्तसंज्ञकं ।
उपासकानां भक्तानां सर्वसर्वफलप्रदाः ॥ ११ ॥
आमोक्षाद्विर्विचारेण त्वेकैकस्य महामते ।
आराधनार्थविहितो वाचकोहि चतुर्विधः ॥ १२ ॥
संज्ञानामापदमयः पिण्डाख्यो बीजलक्षणः ।
एभ्योमध्यात्त्वथैकेन वाच्यमामन्त्रयभक्तितः १३॥
यत्रैकपिण्डवाक्योत्थ मन्त्रेणाथो भयात्मना ।
अभिन्नलक्षणोवाच्य एकएवोपचर्यते ॥१४॥
तत्रैवेविधिनानेन कुर्यात्ताभ्यां द्विकल्पनां ।
कृत्वादौनाममन्त्रस्य बीजं पिण्डाक्षरन्तुवा ॥१५॥
नयसेनाभिमुख्यञ्च वाच्यमाद्यन्तगेनवा ।
सतन्त्रचपदमन्त्रन्तु विधिनानेनवैततः ॥ १६ ॥
कुर्या त्प्रणवपीडस्थं नमस्कारध्वजान्वितम् ।
आभ्यां शान्तस्वरूपत्वा देकत्व मत एव हि ॥ १७ ॥

संज्ञाख्यं पदमन्त्रं च विद्धि संविद्धिलक्षणम् ।
स्व [स्वा] रोत्थं व्यञ्जनोत्थं वा बीज मेकाक्षरं स्मृतम् ॥१८॥
स्वरव्यञ्जनसंयोगा द्वर्णाः पिण्डमन्त्रराट् ।
द्वाभ्यां माद्या तथान्ताश्च स्वरवर्गा न्महामते ॥ १९ ॥
स्वरूपेण हि मन्त्रस्य मन्येषां सह बिन्दुना ।
स्वरेणैकेन युक्तस्य स्वरयुग्मान्वितस्य वा ॥ २० ॥
सानुस्वारस्य बीजत्वं व्यंजनस्यापि लाङ्गलिन् ।
य ॐकाराख्यशब्दस्य विवर्तो दीधितिप्रभः ॥ २१ ॥
चिल्लक्षण स्तथा [ना] कारो विद्धि तद्वाचकं त्रिधा ।
क्वचि त्पिण्डं क्वचि द्बीजं क्वचि च्छब्द मनाहतम् ॥ २२ ॥
तस्य चोद्दीयमानस्य परिणाम स्स्फुटो हि यः ।
बह्वक्षरो बहुपद स्स्तुतिसम्बोधलक्षणः ॥ २३॥
अविनाशी स ॐकारो बीजादीनां महद्विदः ।
प्राग्द [वि] द्या त्प्रणवेनातः सत्याख्येना सनं [खिलं]महत् ॥२४॥
तस्मा द्वै सत्पभिन्नन्तु रूपं तदुपरि न्यसेत् ।
स्वविवर्तेन बीजस्य मृत्युस्थानं प्रकल्पयेत् ॥ २५ ॥
ग्रामे व्याप्तपुरे नित्यं सम्पन्ने यजने सति ।
तलोपले जलं यद्व त्तद्व त्प्रविलयं स्मरेत् ॥ २६ ॥
भानुप्रसवसंकोच स्तुल्य मेत न्महामते ।
क्रियावशात्तु किन्त्वत्र भेदमात्रोपलक्षणम् ॥ २७ ॥
न यत्र बीजं पिण्डं वा तत्र वै प्रणवान्तु ।
प्रा ग्वर्ण पदमन्त्रस्य यत्तदालोकवाचकम् ॥ २८ ॥
सच्चिद्धं वि [धेर्वि] ग्रहं वर्णै स्तस्मा त्तुल्याप्य दृक्षयत ।
केवलं यत्र वै बीजं पिण्डं वा पदवर्जितम् ॥ २९ ॥

तत्राकाराख्यवर्णस्य क्षेत्रज्ञत्वं विधीयते ।
क्षेत्रत्व मवशिष्टानां वर्णानां पिण्डरूपिणाम् ॥ ३० ॥
केवलस्य हि बीजस्य स्वास्थिति र्ब्रह्म वर्ण [र्णि] ता ।
स्वभावप्रच्युति र्बीजं बीजोङ्कार स्तथाकृतिः ॥ ३१ ॥
बीजत्र (?) पिण्डमन्त्राणां परिज्ञेय स्तदोदयः ।
य द्बीजलक्षणं मन्त्रं स्वाराध्यं [सामर्थ्ये] वैष्णवं महत् ॥३२॥
असंख्येय मसंख्यानां वाच्यानां भिन्नरूपिणाम् ।
तद्यथावत्परिज्ञाना ज्जपाद्ध्याना त्समर्चनात् ॥ ३३ ॥
हुतना त्तन्मयत्वाच्च निर्बीजं पद मृच्छति ।
सर्वाभिमतसिद्धि स्स्या त्साधकस्य सदैव हि ॥ ३४ ॥
पिण्डादि भ [भं] गवन्मन्त्र मूर्तीनामेव मेवहि ।
परिज्ञाना द्भवे त्किन्तु पिण्डा त्तत्स्थैर्य मुत्तमम् ॥ ३५ ॥
नानात्वं नाममन्त्राश्च नानालोकान्तरो स्थितम् ।
भवे त्सर्वपद प्राप्तिः परिज्ञाना त्पदाभिधात ॥ ३६ ॥
सबीजंवा सपिण्डं वा मन्त्राणां यत्परं द्वयम् ।
विदध्यातिपदं स्वं स्वं किन्त्वाद्यं भावयेत्परम् [दं] ॥ ३७ ॥
मन्त्रक्षेत्रज्ञ रूपत्वा द्यस्मा त्सर्वेश्वरो ऽच्युतः ।
व्याप्य व्यापकरूपेण वर्तते ऽनुग्रहेच्छया ॥ ३८ ॥
व्याप्यरूपेण भूलोका द्भोगा दारभ्य चाखिलात् ।
षाड्गुण्यमहिमान्त [भिमान] श्च ददाति फलमुत्तमम् ॥ ३९ ॥
स्वपदं भोगखिन्नस्य क्षिण्यदेहस्य कर्मिणः ।
क्षेत्रज्ञ बीजपिण्डात्मा निरावरण लक्षणः ॥ ४० ॥
ज्ञानं यदमलं शु [चि] द्धं संयच्छत्यात्म लाभदम् ।
शक्तिव्यक्ति मयत्वं च जाग्रद्वृत्तेः परात्मनः ॥ ४१ ॥
एवं संज्ञात्मन स्स्वप्न वृत्ते रेकत्व मस्ति च ।
सुषुप्तिवृत्तेः पिण्डाख्य मन्त्रस्यैव महात्मने ॥ ४२ ॥

बीजात्मन स्तस्य वृत्ते शक्तिव्यक्तिरथ मस्तिवै ।
व्यक्तिस्थान वद्धोविता नियतां यद्यपि स्मृता ॥ ४३ ॥
भगव न्मन्त्रमूर्तीनां तथापि परमात्मनः ।
भाग्यस्य चातुरात्म्यस्य केवलस्या थवा विभोः ॥ ४४ ॥
चतुष्प्रकारं यन्मन्त्रं विद्धि तन्मोक्ष भूतिदम् ।
अतो न्यथा यदुद्दिष्ट ममिश्रं मिश्रमेघांद ॥ ४५ ॥
फलं भागवशा च्चैव त तथा विद्धि नान्यथा ।
ज्ञात्वैव मर्चये त्पश्चा थानामन्त्रै र्महामते ॥ ४६ ॥
गौणमुख्यादि [ति] गुणैस्तु प्रादुर्भावगणं विभोः ।
महाज्योति स्स्वरूपस्य सहैव चतुरात्मना ॥ ४७ ॥
प्राग्जाग्र त्पदसंस्थस्य लेशेनोक्तं तदर्चनम् ।
इदानीं १ विशेषेण मन्त्रध्यान क्रियान्वितम् ॥ ४८ ॥
प्रवक्ष्यामि समासेन शृणुष्वायत लोचन ।
विशाखयूपो भगवान् स्वयं विश्वाविलक्षणा ॥ ४९ ॥
अध्यक्षेण स्वरूपेण समुद्वेत्यकल्पवाह ।
महिमानन्तु निश्शेषं शुद्धसंवि त्पुरस्सरम् ॥ ५० ॥
आद्यायाघप [द्यार्थं] दस्यस्व चातुरात्म्यस्य च विभोः ।
यथाचाधारभूयि[सयाचासारभूमि]ष्ठ देवानां चेष्टितं हि रम् ॥५१॥
सितादयः कान्तयोयत् श्चादिक मा महामते ।
स्व लाञ्छनं वैभर्यायं सायुधं बीजमेवतु ॥ ५२ ॥
ज्ञानाद्यं गुण षट्कश्च तदुक्ता श्शक्तयो खिलाः ।
अणिमा द्यष्टकं चैव स्थित्युत्पत्ति लयो दयाः ॥ ५३ ॥
शक्ति स्सा चातुरात्मीया त्वै श्वरी त्यभिधीयते ।
यथार्क किरण व्रात न्यस्तता तेजः कणो महान् ॥ ५४ ॥
स्व कारणं विना सर्वं मा पूरयति गोचरम् ।
स्वातन्त्र्या त्परिपूर्णत्वा सद्वत्स परमेश्वरः ॥ ५५ ॥

विहाय वासुदेवाद्यं मूर्तिशाखाचतुष्टयम् ।
वेभवीयस्य बुधस्य पतित्मेना प्रतिष्ठते ॥ ५६ ॥
सम्भूति स्थिति संहार भोग कैवल्य लक्षणम् ।
भेरयन्वै धिया चक्रं पंचार मिद मुत्तमम् ॥ ५७ ॥
समतंत्र स्स्वपद्मस्थ स्स्व बीजेन स्वामळात्मना ।
भामूर्द्धतो प्रियवन्तं तदीयं गात्र मण्डलम् ॥ ५८ ॥
रसत्र द्वैभवीयेस्तु बीजे भाव्य मलंकृतम् ।
क्रमा दुच्चार्यमाणे रते स्मृतोयेन पूर्ववत् ॥ ५९ ॥
पुलना स्वरमेशस्व मन्दिरा देव गच्छति ।
शृणुतद्बीज निचयं सावधानेन चेतसा ॥ ६० ॥
यत्प्रसादा त्परां सिद्धिं प्रयान्ति भगवन्मयाः ।
शुचौ देशे मनोज्ञेच रुळिते पुष्प भूषिते ॥ ६१ ॥
घनानक्षोद संयुक्ते सुरूपेना धिवासिते ।
विलिख्यमातृका चक्रं भेदे नानेन वै पुनः ॥ ६२ ॥
येन सन्दृष्ट मात्रेण शतधायाति कल्मषम् ।
प्रागादौ पंचवर्गान्तं मध्यान्तं मध्यतो लिखेत ॥ ६३ ॥
यादयो नव नाभिस्था आदय ष्षोडशारगाः ।
कादयो नेमिगा स्सर्वे पूर्वंचक्रे यदक्षाणम् ॥ ६४ ॥
तदास्मि न्प्राथ भूस्तन्तु पूजयं द्विधिना ततः ।
शब्दब्रह्म मयं चक्र मर्घ्य पुष्पादिभिः क्रमात् ॥ ६५ ॥
तन्मध्या दुद्धरेदादौ सर्वेषां कारणं हि यत् ।
हृदकस्थ मक्षरं चाक्षा दरान्तायेन भूषितम् ॥ ६६ ॥
विद्धि परमेश्वरस्येदं बीजं निर्बीज कारणम् ।
एतदेवाब्ज नाभस्य विसर्ग सहितं स्मृतम् ॥ ६७ ॥

नेमिवर्गा द्वितीयं वै ततोश त्सप्त मक्षरम् ।
अष्टमं नाभि देशाच्च तात्संख्यं नेमि मण्डलात् ॥ ६८ ॥
नेमिपूर्व मतोनाभे स्सप्तमं पंचमारगम् ।
अरा श्चतुर्दशं त्वशा त्पश्चिमाशा गतं हि यत् ॥ ६९ ॥
नेमे रेकादशं चाथ षोडशंच त्रयोदशं ।
पंचमं नाभिदेशाच्च नेमे रेकोन विंशकम् ॥ ७० ॥
तदन्तं सप्तमं चैव नवमं हि महामते ।
नाभे स्त्रितीयं तदनु नेमे स्तत्संख्य मेवच ॥ ७१ ॥
द्वादशंच बहिष्टेभ्यो दशमं षोडशा त्परम् ।
नाभिपूर्व ततो वर्ण नेमेः पंचदशं हिवत् ॥ ७२ ॥
तुर्यसंख्य मराद्बीजं ततो नाभि चतुर्थकम् ।
षष्ठं नेमे श्चतुर्थश्च मध्यम [मा] क्षा त्तथा हरेत् ॥ ७३ ॥
तत्रैव पूर्वदिक्स्थंच द्वाष्टा द्वै पंचमं ततः ।
अक्षा दक्षिणदिक्संस्थं नेमेरष्टादशं ततः ॥ ७४ ॥
द्वितीयंनाभि देशाच्च तदन्ते सप्तमारगम् ।
चतुर्दश मथोनेमे ष्षष्ठंनाभे रधा हरेत ॥ ७५ ॥
सर्वे कारणव न्मूर्धा योजनीया स्समासतः ।
प्रणवाद्यानमोन्ताश्च तेजसातीव निर्भराः ॥ ७६ ॥
पद्मनाभादयो देवा वाच्या स्तेषां क्रमेणतु ।
पद्मनाभो ध्रुवोनन्त श्शक्त्यात्मा मधुसूदनः ॥ ७७ ॥
विद्याधिदेवः कपिलो विश्वरूपो विहंगमः ।
क्रोडात्मा बडबावक्त्रो धर्मो वागीश्वर स्तथा ॥ ७८ ॥
देव एकार्णवशयः कूर्मःपातालधारकः ।
वराहो नरसिंहश्चा प्यमृता हरणस्तुवै ॥ ७९ ॥
श्रीपति र्दिव्यदेहोथ कान्तात्मा मृतधारकः ।
राहुजित्कालनेमिघ्नः पारिजातहरोमहान् ॥ ८० ॥

लोकनाथस्तु शान्तात्मा दत्तात्रेयो महाप्रभुः ।
न्यग्रोध शायी भगवा नेकशृंगतनुस्ततः ॥ ८१ ॥
देवोवामनदेहस्तु सर्वव्यापीत्रिविक्रमः ।
नरोनारायण [नारायणोनरः] श्चैव हरिः कृष्णस्तथैवच ॥८२॥
ज्वलत्परशु धृग्रामो रामश्चान्यो धनुर्धरः ।
वेदविद्भगवान् कल्की पाताळ शयनःप्रभुः ॥ ८३ ॥
प्रादुर्भाव गणोमुख्य इत्युक्तस्ते समासतः ।
शक्तिसङ्घ प्रधानोय श्शक्तिसङ्घ स्सउच्यते ॥ ८४ ॥
लक्ष्मीः पुष्टिर्दयानिद्रा क्षमाकान्ति स्सरस्वती ।
धृतिर्मैत्री रतिस्तुष्टि र्मतिर्द्वादशमीस्मृता ॥ ८५ ॥
प्रधानभूतो भगवान् नकंकारात्रिबोधमे ।
किरीटः कौस्तुभोभास्यः ? श्रीवत्सो मृतलक्षणः ॥ ८६ ॥
एतस्मात्सितगरुडः प्रधानान् हेतिकान् शृणु ।
चक्रं शङ्खो गदापद्मं लाङ्गलं मुसलंशरः ॥ ८७ ॥
शार्ङ्गश्च खड्गखेटौतु दण्डः परशुरी रितः [तिद्दा] ।
पाशाङ्कुशौ मुद्गरश्च वज्रश्शक्ति समन्वितः ॥ ८८ ॥
इत्येत द्दैवताचक्रं मन्त्रमन्त्रगणान्वितं ।
विग्रहेदेवदेवस्य सर्वोनमवतिष्ठते ॥ ८९ ॥
वक्ष्येभावोपकरणं गीर्वाणगणमुत्तमं ।
नानाविभव मूर्तीनां योवतिष्ठेत शासने ॥९०॥
कालोत्रियग्नियन्ताच शास्त्रं नानाङ्ग लक्षणं ।
विद्या चित्तयश्चैव समुद्रास्सगणा श्शिवाः ॥ ९१ ॥
प्रजापति समूहश्च इन्द्र स्सपरिवारकः ।
मुनय सप्तपूर्वेन्ये ग्रहास्ताराद्भिर्वृताः ॥ ९२ ॥
जीमूताश्चा खिलानागा स्त्वप्सरोगण उत्तमः ।
औषध्यश्चैव पशवो यज्ञास्साङ्गा खिलाश्रये ॥९३॥

विद्याचैवा पराविद्या पावकश्चैवमारुतः ।
चन्द्रार्कौ वारिवसुधे इत्युक्तममलेक्षण ॥९४॥
चतुर्विंशतिसंख्यश्च भवोपकरणं महत् ।
भवस्साक्षात्प्रधानन्तु व्यापकोजडलक्षणः ॥९५॥
मन्त्रमन्त्रेश्वरन्यासा त्सोपिपूज्यत्व मेतिच ।
इत्येवमादि सर्वेषां भविनां परमेश्वरः ॥९६॥
स्थितोन्तर्यामिभावेन रूपमासाद्य निष्कळं ।
आप्तकामस्तभगवान् स्वव्यापारवशेनतु ॥९७॥
स्वांशक्तिमवलंब्यास्ते पद्मनाभात्मना पुनः ।
धराम्बुहुतभुग्वात मूलनाळदळोदरे ॥९८॥
चतुस्तत्वमयेपद्मे गगनैकार्णवोदरे ।
मानसे ऽनन्तशयने दिव्यबोधतनुर्विभुः ॥९९॥
सहस्रांशु सहस्राभ उत्तानस्थोहिलीलया ।
ततो विविधरत्नाभे तदीये नाभि पुष्करे ॥१००॥
भोद्भवंस्तु स्ववीर्येण विद्यासामर्थ्य विग्रहाम् ।
मूर्तैर्ध्वजादिकैस्सर्वै रावृतस्तत्परायणैः ॥१०१॥
अनन्तचेष्टस्यविभो रित्येवं त्वीश्वरात्मनः ।
भोगापवर्गदं रूपं शान्तव्यक्तंच वैभवम् ॥१०२॥
प्राग्वत्तुर्यपदावस्थं स्मरेद्धृत्कमलाम्बरे ।
तदधःकर्णिकामध्ये त्वभिजातो [शान्तो] पलद्युतिम् ॥१०३॥
दिशोदश द्योतयन्तं नानागात्ररुहैश्चितम् ।
सौम्यंद्विरष्टवर्षंच राजीवदळलोचनम् ॥१०४॥
भ [भा] चक्र चक्रयुग्दे [हदे] वं गदा देहं [हारं] तथैवच ।
शक्ति माधार संज्ञांच भोद्भवन्तं स्मरेद्ध्रुवम् ॥१०५॥

स्थितोयस्तम्भभूतस्तु अस्मिन्वै विश्वमन्दिरे ।
नभोनिलात्मनाचैव भूमिका भिन्नलक्षणे ॥१०६॥
प्रागाद्यावीशकोणान्तं संस्मरे त्कर्णिकोपरि ।
द्विषट्कं यदनन्ताद्यं सरश्शाद्यन्त मग्निगम् ॥१०७॥
तत्संख्यं केसरोर्ध्वस्थं तद्व त्कूर्मादिकं न्यसेत ।
न्यग्रोधशायिपर्यन्त ममृताधारमण्डले ॥ १०८ ॥
सूर्यचन्द्र [क्र] समारूढं दळभूमिगमं [तं] ततः ।
पाताळशायिपर्यन्त मेकश्शृंगादिकं हि यत् ॥ १०९ ॥
न्यस्यैव समूर्तोर्थैस्तु भोगै रभ्यर्च्य मानसैः ।
यथावद्ध्यानयोगेन प्राग्व त्सृष्टिक्रमेण तु ॥ ११० ॥
पुन स्संहृतियोगेन पाताळशयना त्तु वै ।
यावद्गगनशाय्यंत मर्चनीयं फलाप्तये ॥ १११ ॥
य उक्त स्समुदाये स्मिन् ह्यागे देवतागणः ।
यजे द्विस्रक्रमेणैव विधिना नेन तं पुनः ॥ ११२ ॥
त्रिकं [त्रयं] यद्वै द्विषट्कानां त्रिस्थानस्थं प्रकाशितम् ।
पृथ क्पृथ क्तदेकैकं न्यस्य न्यस्य यजे त्क्रमात् ॥ ११३ ॥
प्रतिद्वादशकस्याद्यः प्रागुक्तेन क्रमेण यः ।
तं निष्कळात्मना पूर्व मिष्ट्वा वै कर्णिकोदरे ॥ ११४ ॥
समुत्थाप्य ततो मध्या त्तमेव सकळात्मना ।
न्यस्ये दाधारभूतश्च सर्वत्र कमळा दधः ॥ ११५ ॥
तमेवार्घ्यादिना ऽभ्यर्च्य कमळच्छदकोटिगम् ।
द्वितीयं कर्णिकामध्ये तदग्रे केसरोर्ध्वगम् ॥ ११६ ॥
ध्यात्वा न्यस्य तृतीयन्तु ततः पत्राष्टकेष्टकम् ।
द्वादशाख्यादि सर्वत्र गगने पद्मनाभवत् ॥ ११७ ॥
मन्त्रोपकरणीयाभि र्देवताभि स्समावृतः ।
य स्स्वङ्गदेवतासंघ स्सर्व स्स [त्र] कमळा द्बहिः ॥ ११८ ॥

न्यस्यैव मर्चनं कुर्या द्दिव्ये भोगे रतु पूर्ववत् ।
मूर्तौ मण्डलमध्येच वहि रम्रौ जलाशये ॥ ११९ ॥
स्वमन्त्रेणाम्बरस्थस्य मूर्त स्रक्चन्दनादिकम् ।
दातव्यं कर्णिकामध्ये न्यस्तमन्त्रस्य मूर्धनि ॥ १२० ॥
प्रतिविम्बति तद्यस्मा त्तद्वद्धारदर्पणे ।
यस्य यस्य यदा यस्मि न्नाकारे रमते मनः ॥ १२१ ॥
भोगाप्तये वा मोक्षार्थं तं तं मध्ये ऽर्चयेत् तदा ।
तदुद्देशेर्चनं कुर्या त्तत्स्थानमच्युतस्य वा ॥ १२२ ॥
नानासिद्धिप्रदानाच्च सह संहारमूर्तिना ।
एव मेवांगमन्त्राणा मर्चना दीप्सितं लभेत् ॥ १२३ ॥
तत्रायं हि विशेष स्स्या द्दिव्याले तन्निबोध मे ।
भूलोकाखिलसिद्धीना माप्तये तात्र दुच्यते ॥ १२४ ॥
प्राग्वद्द्वादशकाद न्या [न्या] देकश्रृंग मधो यजेत् ।
आद्यं यदंगमन्त्रन्तु कर्णिकायां न्यसे त्ततः ॥ १२५ ॥
अथ केसरकोटिस्थं स्मरे त्तत्पुरतो परम् ।
पश्चा द्दला त्क्रमांतस्थं दळाग्रस्थं द्विरष्टकम् ॥ १२६ ॥
पाताळ शायिनं [शयनं] मध्ये मन्त्रस्योपरि पूर्ववत् ।
ध्याये न्निश्शेषपाताळसिद्धीना माळयं परम् ॥ १२७ ॥
तच्छकयनुगृहीतस्तु मन्त्रेशः कर्णिकागतः ।
समस्तसिद्धिदाने स्या दाश्रितस्यांगसंज्ञकः ॥ १२८ ॥
एव मेव भुव र्लोकसिद्धीनां माप्तये सदा ।
स्मरे दूर्ध्वं सरश्शायी त्वनन्तः कमला दधः ॥ १२९ ॥
यजे द्गगनसिद्धीना मशेषाणा मथाप्तये ।
खस्थंन्यग्रोधशयनं कूर्मं कमलमूलगम् ॥ १३० ॥

एते षाम पि संचारो नानासिद्धिव्यपेक्षया ।
प्रधानमन्त्रव स्कुर्या त्प्राग्व त्सर्वत्र सर्वदा ॥ १३१ ॥
एव मार्चेस्तु विधिव द्रागै नानाविधोत्थितैः ।
यः स्थित स्त्रिविधे सर्गे विभवः पारमेश्वरः ॥ १३२ ॥
पौष्कराख्ये च वाराहे प्राजापत्ये महामते ।
सूक्ष्मत्वेन च निश्शेषं प्रत्येकस्मि न्हि वर्तते ॥ १३३ ॥
समाश्रित्य बृहत्त्वं च तृतीयांशेन तिष्ठति ।
यथोक्तक्रमयोगेन युक्त स्सर्गत्रयेतु वै ॥ १३४ ॥
परिवारं समादाय भवोपकरणान्वितम् ।
दिक्पालकगणोपेतं समाक्रम्य तमेव हि ॥ १३५ ॥
अभिधानाक्षरं पूर्वं मरान्ताद्येन भूषितम् ।
योक्तव्य मभिधानेन पूर्वोद्दिष्टेन वर्त्मना ॥ १३६ ॥
पूजार्थं चैव सर्वेषां क्रमे स्मिन् सम्प्रकाशितम् ॥ १३६॥ ॥

इति श्रीपाञ्चरात्रे श्रीसात्वतसंहितायाम्

विभवदेवतान्तर्यागो नाम

नवमः परिच्छेदः ॥ ९ ॥

अथ दशमः परिच्छेदः ।

नारदः ।

अथव्लाङ्गाढिनाविप्रा श्चोदितःपरमेश्वरः ।
यत्तदाकर्ण्यतामद्य चेतसा संयतेनतु ॥१॥

सङ्कर्षणः ।

मण्डलेऽग्नौ बहिर्नाथ जलमध्ये त्वयार्चनं ।
नोक्तं विभवदेवानां व्यक्तं कृत्वा तदादिश ॥ २ ॥

भगवान् ।

सुलक्षणेतु भूभागे समेपूर्वो क्तलक्षणे [तग्प्लवे] ।
तत्रमण्डल [प] मालेख्यं सर्वेषामेकमर्चने ॥३॥
चतुरश्रं चतुर्द्वारं पीठा घवयवान्वितं ।
षट्त्रिंश द्दळपद्मेन मध्यतश्चाप्यलंकृतं ॥ ४ ॥
वितानध्वजसंवीतं किंकिणीदर्पणान्वितं ।
तोरणव्यजनच्छत्र चामर स्रग्विमण्डितं ॥५॥
उक्तानुक्तमशेषन्तु कृत्वापूर्वोक्तलक्षणं ।
ततस्तु करयोर्न्यस्य विग्रहे बीजमेश्वरं ॥ ६॥
समालम्ब्यच तादात्म्य महिमानंतु निश्चलं ।
बध्वाचवैभवीं मुद्रां स्पृशेत्सर्वांगकंतया [था] ॥ ७ ॥
समुच्चार्यधियासर्वं म्मन्त्रग्रामं क्रमास्थितं ।
सर्वदेवमयंदेह मेवंस्मृत्वा स्वकम्पुरा ॥८॥
अन्तश्चक्र निविष्टन्तु संस्मरे द्भद्रपीठवत् ।
मण्डलं देवताधारं चक्रमन्त्रेण तद्यजेत् ॥९॥
ततस्तु सर्वमन्त्राणां विन्यासं तत्रचेतसा ।
समाचरे द्यथायोगं पुष्पदान पुरस्सरं ॥१०॥
ध्रुवात्मा भगवान्मध्ये कर्णिकाया मतःक्रमात् ।
दिक्चक्र मभिवीक्षन्तं प्राग्दळादादितोन्यसेत् ॥ ११ ॥
पाताळशायि पर्यन्त मनन्ताद्यं म्महामते ।
न्यसे न्कमळ बाह्येतु ईशा द्दिक्ष पदावधि ॥१२॥

चतुष्टयं किरीटाद्यं मन्त्राणां पूर्वचोदितम् ।
उदग्दक्षिण आप्याद्ये पैठीये दिक्चतुष्टये ॥ १३ ॥
द्वंद्वद्वयन्तुलक्ष्म्याद्यं विनिवेश्यं यथाक्रमम् ।
तत्रैवेशकोणात्तु यावद्वायुपदावधि ॥ १४ ॥
द्वयंद्वयंक्षामाद्यंच मत्यन्तं सन्निवेश्यच ।
बहिः पीठस्यनिकटे चाग्रतोवैपतत्रिराट् ॥ १५ ॥
चक्रा त्कमक्र पर्यन्तं चतुष्कं शाङ्करात्पदात् ।
वायुकोणावधेर्यावत्पीठबाह्येतु योजयेत् ॥ १६ ॥
सौम्ययाम्याप्य पूर्वांशा वस्थितंच द्वयंद्वयम् ।
लांगलाद्यं परश्वन्त मष्टकं तद्वदेवहि ॥ १७ ॥
याम्यसौम्याप्यपूर्वांशा गतं दया चतुष्टयम् ।
पाशाद्यं वज्रपर्यन्तं शक्ति कोण चतुष्टये ॥ १८ ॥
आईशकोणनिकटात पदात्तन्निकटेस्थितम् ।
प्रदक्षिण क्रमेणैव पदं याव द्वितीयकम् ॥ १९ ॥
कालादीनाञ्चविन्यासः कार्यश्चानुक्रमेणतु ।
यज्ञान्ताना म्महाबुद्धे षोडशानां यथास्थितम् ॥ २० ॥
क्रमात्पूर्वोत्तरेकोणे न्यसेद्दक्षिणपश्चिमे ।
विद्या ऽविद्या द्वयं यद्वै स्वपदस्थे भिमारुते ॥ २१ ॥
चन्द्रादित्या वुदग्याम्ये द्वारयो विनिवेश्यच ।
प्रत्यग्द्वार गत न्तोयं प्राग्द्वारे निन्यसेदराम् ॥ २२ ॥
चतुर्णामथकोणाना मव्यक्त म्मण्डला द्बहिः ।
सम्यजे द्भवनाम्नावै यस्मा न्नान्यो भवःस्मृतः ॥२३ ॥
ततःकामात्मतत्वानां दशकं सिद्धतांगतं ।
भगवत्तुल्यसामर्थ्यं सार्वज्ञ्याद्दि गुणैर्युतम् ॥ २४ ॥
वियुक्तं प्राकृताद्दुःखा न्नियुक्त ञ्चेश्वरेणतु ।
भवसन्तारकत्वेन मण्डलस्य बहिर्न्यसेत् ॥ २५ ॥

उपेन्द्रः पूर्वदिग्भागे दक्षिणेदुरतिक्रमः ।
महाहृदः पश्चिमेतु वसुरेता स्तथोत्तरे ॥ २६ ॥
न्यस्यस्तेजो धराख्यस्तु पूर्वदक्षिणमध्यगः ।
नैरृतेतु महाकर्मा स्वग्राह्यः पश्चिमोत्तरे ॥ २७ ॥
पूर्वोत्तरे वर्धमान स्साक्षी गगनगोचरे ।
आधारनिळयं नाम्ना सर्वस्याधोगतं स्मरेत् ॥ २८॥
तेषां बहि स्स्वमन्त्रेण दिक्क्रमेणतु हेतिराट् ।
स्वमरीचिगणेनैव भासयन्तं निवेश्यच ॥ २९ ॥
न्यस्यैव मर्चनं कुर्या न्मन्त्रमुद्रान्वितेन च ।
निरीक्षणादिशुद्धेन अर्घ्यस्रक्चन्दनादिना ॥ ३० ॥
यथाक्रमेणोदिताना मादिदेवं यजे ततः ।
उपरिष्टात्तु सर्वेषां स्वपदस्थन्तु पूर्ववत् ॥ ३१ ॥
प्राग्वत्सुसंस्कृते कुण्डे तत स्संस्कृत्य पावकम् ।
तन्मध्ये सर्वमन्त्राणां न्यासं कुर्याच्च यागवत ॥ ३२ ॥
प्राक्समिस्सप्तकेनैवं तर्पये द्वै यथाक्रमम् ।
मन्त्रपूतं हि निश्शेषं हवनान्तं सकृ त्सकृत् ॥ ३३ ॥
भवन्ति सम्मुखा मन्त्रा स्साधकस्याग्निमध्यगाः ।
सन्तर्प्याथ तथा कुर्या त्सहस्रशतसंख्यया ॥ ३४ ॥
एकैकस्य तु वै होमं तिलै राज्यसमन्वितैः ।
दद्या त्पूर्णाहुतिं पश्चा त्सर्वेषां तर्पणे कृते ॥ ३५ ॥
पुन रभ्यर्चनं कुर्या देत्य वै मण्डलान्तरे ।
यथाक्रमेण सर्वेषां पुष्पधूपै स्तु केवलैः ॥ ३६ ॥
सकृ द्ध्यानसमेतन्तु चतुर्थाप्यथवाप्यथा ।
क्रमा त्समस्तमन्त्राणां प [पु] रावर्तन माचरेत ॥ ३७ ॥

सुशुभेनाक्षसूत्रेण स्वके र्वा करपर्वभिः ।
ततोऽर्घकुसुमै र्गन्धैः पूरयित्वा करांजलिम् ॥ ३८ ॥
सर्वदेवमयं मन्त्रं स्मृत्वोच्चार्य च तं क्षिपेत ।
सर्वत्र सर्वदानेन क्रमेणेत्थाच भक्तितः ॥ ३९ ॥
प्रदर्श्य सर्वमन्त्राणा मेकां मुद्रां च वैभवीम् ।
प्रणवेन सहस्रांशुसन्निभां सर्वसिद्धिदाम् ॥ ४० ॥
श्लेष्यपाणितले द्वे प्राङ्नम्रं कुर्या ल्लतागणम् ।
विविक्त मन्तरीकृत्य सहांगुष्ठद्वयेन तु ॥ ४१ ॥
मणिबन्धद्वयं कुर्या त्सुलग्न मतिनिश्चलम् ।
करयुग्मं सगर्भन्तु सन्धार्य स्वधियाचलम् ॥ ४२ ॥
ऊरुमध्ये निवण्णेतु कुर्याद्वे बाहुकूर्परे ।
गुप्तं कृत्वा प्रयत्नेन बन्ध मस्या स्समाचरेत् ॥ ४३ ॥
सर्वधा सर्वसिद्धीना मालये स्वमलेक्षण ।
तीर्थमध्ये स्वहृत्पद्मे बिम्बे वेद्यां स्थलेतु वा ॥ ४४ ॥
वह्निगर्भेतु निर्धूमे नित्य मस्मि श्चतुष्टये ।
मन्त्राणा मर्चनं कुर्या त्सिद्ध्यर्थमपि मुक्तये ॥ ४५ ॥
सजलाञ्जलिपूरे स्तु तीर्थेष हृद्याम्बुजे ।
भावनामृतजे भोगे मूर्ते रघ्र्यादिकै र्बहिः ॥ ४६ ॥
समित्सप्तकपूर्वै स्तु याज्यै र्वह्निगतं तिलैः ।
पूजयित्वा यथान्यायं प्रत्येकस्मि न्पदे क्रमात् ॥ ४७ ॥
संन्यासं संचयं वापि कृत्वा सम्य क्कृतस्य वै ।
मन्त्ररूपानुकारिण्या मुद्रणीयंच मुद्रया ॥ ४८ ॥
फलार्थं प्रसवं येन नैति संन्यासकारिणाम् ।
फलपर्यवसानं च काल मागमचोदितम् ॥ ४९ ॥

भर्तुं नो युज्यते येन सिद्धा थे[यै] स्तु फलार्थिनाम् ।
कालानुकालमुद्राणां यो बन्धः परिचोदितः ॥ ५० ॥
उक्तप्रयोजना दन्य स्सविघ्नविनिवृत्तये ।
मुदं कर्मात्मतत्वानां ददत्यमलयाजिनाम् ॥ ५१ ॥
द्रावयित्री च दोषाणां बाह्याभ्यन्तरचारिणाम् ।
तेन मुद्रा स्समाख्याताः कृतस्यापि च मुद्रणात् ॥ ५२ ॥
तस्मा त्स्वाभाविकं कृत्वा बद्धं वा मानसं पुरा ।
स्वेन स्वेन तु मन्त्रेण स्मरे त्प्रातं[द्व्याप्यं] सदैवहि ॥ ५३ ॥
चैतन्येनानुविद्धो य श्शाखासंघश्च यद्यपि ।
तत्रापि मन्त्रो ऽ त्राध्यक्ष स्स्वकार्यं सम्प्रयच्छति ॥ ५४ ॥
एवं कृते ततः कुर्या न्मन्त्राणां म्मण्डलान्तरात् ।
पूर्ववच्चोपसंहार मेकस्मिन् गगनास्थिते ॥ ५५ ॥
स्मृत्वा परात्मना तंच स्वसंविद्गगने हृदि ।
विश्रान्तं भावये द्देवं स्वभावेन समन्वितम् ॥ ५६ ॥
द्विजातेर्दत्तशिष्टस्य पुष्पपत्रादिकस्य च ।
विहित स्त्वाम्भसि त्यागो विष्वक्सेनार्च ने कृ [नाद्द] ते ॥ ५७ ॥
धर्तव्यं न चिरं चाग्रे यत्पुरा विनिवेदितम् ।
नैवेद्यं मन्त्रमूर्तीनां किंचित्पुष्पफलादृते ॥ ५८ ॥

इति श्रीपांचरात्रे श्रीसात्वतसंहितायाम्
विभवदेवतार्चनं नाम

दशमः परिच्छेदः ॥ १० ॥

अथ एकादशः परिच्छेदः ।

नारदः ।

श्रुत्वैव मच्युतमुखा द्वनमाली मुनीश्वराः ।
पुन स्सञ्चोदयामास यदाकर्णयता च तत् ॥ १ ॥

संकर्षणः ।

यथावत् ज्ञातु मिच्छामि मण्डलध्यानलक्षणम् ।
भगवन् भवभीताना मुपकाराय तद्वद ॥ २ ॥

श्रीभगवान् ।

संसाध्य यष्टियोगेन सूत्रा [यो] त्पूर्वापरे पुरा ।
तद्दिग्द्वयान्तरे दद्या त्मार्ग्ये सूत्रचतुष्टयम् ॥ ३ ॥
समांशेन द्विधा कृत्वा स्फुटं [ट] मध्या त्तदं [ततः ।] स्यच? ।
साधितेना र्धमानेन मा कमत्यकस्येन तन्तुना ॥ ४ ॥
दक्षिणोत्तरभागाभ्यां समुत्पाद्य चतुष्पथो ।
सूत्रं पूर्वापरसमं कृत्वा तदुपरि क्षिपेत् ॥ ५ ॥
पुन रर्धसमं दिक्षु दत्वा कोणचतुष्टयम् ।
चतुष्पथचतुष्केण नयेद्द्य [द्र] क्कि प्रसार्य [ध्य] वै ॥ ६ ॥
समसूत्रचतुष्कञ्च चतुरश्राश्रसिद्धये ।
तद्विभज्या ष्टदशभि श्चतुर्दिक्षु पदै स्समैः ॥ ७ ॥
क्षिपे त्सूत्रगणं तत्र घटिका रेणु [कण] रञ्जितम् ।
मध्ये पद्मावनिं कुर्या द्भागपङ्क्तित्रये क्रमात् ॥ ८ ॥
तद्बहिः पदपङ्क्त्या तु पीठ मष्टदिगन्वितम् ।
तस्य भागचतुष्कोत्थ दिक्चतुष्कं प्रकल्प्य च ॥ ९ ॥

विदिक्चतुष्कं त्रिपदं पङ्क्त्या पीठप्रदक्षिणम् ।
प्रदक्षिणांक्षिते बोह्या चतुष्कं दिक्चतुष्टयात् ॥ १० ॥
चतुर्णान्तु चतुर्णान्तु बाह्या द्वाह्यं द्वयं द्वयम् ।
शोधयित्वा तु सद्वाह्या चतुष्कं द्वारसिद्धये ॥ ११ ॥
चतुष्टयं क्रमेणैव भूयो दिक्षु पदं पदम् ।
सबाह्याभ्यन्तरगतं शोधनीयं प्रयत्नतः ॥ १२ ॥
पुन स्सर्वपदाभ्यां तु षट्कं षट्कं तु चान्तरात् ।
सम्माज्यं पूर्णशोभार्थं तत्र रक्तोत्पलाष्टकम् ॥ १३ ॥
यथा दिक्षु स्थितं कुर्या त्पूजनाय दिवौकसाम् ।
बाह्यस्थपद पार्श्वा (पीठा) त्तु त्रीणि त्रीणि च कोपयेत् ॥ १४ ॥
त्रयाणा मन्तरस्थं य त्पद मेकात्मतां नयेत् ।
उपशोभं तु तं विद्धि कुर्या च्छीलाब्जभूषितम् ॥ १५ ॥
पंचकं पंचकं कोणा द्वीथी नीत्वा लयं पुरा ।
शेषैः कोणन्तु निर्वंश सान्तरं च ततो बहिः ॥ १६ ॥
दद्या त्सूत्रत्रयंचैव मध्येथ कमलं लिखेत् ।
षट्त्रिंश द्दळसंयुक्तं तस्य लक्षण मुच्यते ॥ १७ ॥
पीठावधि समीपेतु चतुर्थांश पदात्पुरा ।
समुद्धृत्य भ्रमं कुर्या द्ब्रह्मस्थानाच्चतन्तुना ॥ १८ ॥
दिक्सूत्राणां चतुर्णांतु एकैकं हि यदन्तरम् ।
वृत्तावधे स्समैर्भागैः पत्रसंधे विभज्यच ॥ १९ ॥
षड्भिर्हीनं शतं सार्धं सूत्राणां तत्र निक्षिपेत् ।
सूत्रंप्राक्पदसंस्थं य त्तदाश्रित्याब्जपल्लवं ॥ २० ॥
कुर्या द्भाग चतुष्केण यथा तदवधारय ।
सव्यापसव्येयेसूत्रे अन्तरस्य निरन्तरे ॥ २१ ॥

तयोरंश समं कुर्या द्दळाग्रादंकमन्तरे ।
तदुद्देशात्तु सूत्रेण तदंकान्तर्गतेनच ॥ २२ ॥
अर्धचन्द्र द्वयंकुर्या त्तेन सूत्रेणवैसमं ।
पुनरभ्यन्तरे सूत्रं तत्सूत्राभ्यां निरोध्यच ॥ २३ ॥
पत्राग्र मानयेत्तस्मा द्वद्वि स्वं श्रृंगसन्निधेः ।
द्वांछयमानं दळाग्रन्तु विधिना नेन सिध्यति ॥ २४ ॥
दळाग्र ब्रह्मदेशाभ्यां तुरीयांशेनचान्तरात् ।
भ्राम्यवैकर्णिकावृत्तं द्वयंशमानेन केसरं ॥ २५ ॥
दळाग्रगांशंवै मध्या द्वयोमार्ध भ्रामयेत्ततः ।
कृत्वैवं वर्णकैःपूतैः पूरणीय स्महोज्वलैः ॥ २६ ॥
दळ्यायविततां पीतां सबीजां विद्धिकर्णिकां ।
रेखान्वितानि पत्राणि सर्वाणि सुसितानिच ॥ २७ ॥
केसर त्रितयं कुर्या त्पत्रेपत्रे रुणप्रभम् ।
दळान्तराळसमितं वृत्तबाह्यं ज्वलत्प्रभं ॥ २८ ॥
सितानि पीठकोणानि रक्तं तद्दिक्चतुष्टयम् ।
राजोपळप्रभांवीथीं पत्रमाला ह्यलंकृतां ॥ २९ ॥
पश्चिमांशा द्विनासर्व द्वाराण्यम्बुजपत्रवत् ।
कृष्णानि सर्वशोभानि द्वारोद्देश स्थितानिच ॥ ३० ॥
तदर्धा कृतितुल्यानि सूपशोभानि गर्भवत् ।
कोणानि केसराभानि सितशंखा न्वितानिच ॥ ३१ ॥
शोण हेमादिवर्णञ्च क्रमाद्रेखागणंबहिः ।
कृत्वैवमनुसन्धाय स्वात्मत्वेन देहवत् ॥ ३२ ॥
रजांसिविद्धिभूतानि सितपीतादिकानिच ।
तन्मात्रा ण्युपशोभानि शोभानिकरणानितु ॥ ३३ ॥

एवं सर्वाणि कोणानि स द्वाराणीन्द्रियाणिच ।
बहिरावरणं यद्वै सत्त्वाद्य त्रितयं हि यत् ॥ ३४ ॥
मन स्सुविततावीथी गर्वपीठ मुदाहृदं ।
धीःपद्मं तदधिष्ठाता बीजात्मा चिन्मयःपुमान् ॥ ३५ ॥
अमूर्त ईश्वर श्चात्र तिष्ठ त्यानन्दलक्षणः ।
यस्य सन्दर्शनादेव शश्वद्भावः प्रसीदति ॥ ३६ ॥
ससंगाना मसंगानां वपुष्पातं कृते सति ।
प्रायशो मुक्तिभाजां च त्विह जन्मैकशेषिणाम् ॥ ३७ ॥
देव आस्ते ह्युतां हित्वा बहि रन्तश्च कर्मिणाम् ।
अन्यथा ह्यष्टमात्रा द्वै कथ माह्लाद मेति वै ॥ ३८ ॥
अत स्संवेदनसम मस्तित्व [त्वं] प्रतिपादकम् ।
यथात्स्वलक्षणं तत्वं तत्त स्सर्वत्र सिद्धिगम् [सन्निभं] ॥ ३९ ॥
वस्तुत्वेन गृहीत्वैवं मण्डलं पूर्वनिर्मितम् ।
नाम्नाब्जनाभभुवनं सर्वदुःखक्षयंकरम् ॥ ४० ॥
तत स्तस्मिन् क्रमेणैवं स्थात्वैकैकं निवेशयेत् ।
पूर्वोद्दिष्टेन बीजेन स्वाकारं परमेश्वरम् ॥ ४१ ॥
अथैवं भाजिता स्क्षेत्रा च्चतुरश्रा न्महामते ।
पूर्वोद्दिष्टानि धिष्ण्यानि यथा कार्याणि तच्छृणु ॥ ४२ ॥
पंचमं ब्रह्मकर्माद्या न्मम प्राग्दिश्यवस्थितम् ।
अंशं दीर्घेन तस्थेन कुर्या त्सूत्रेण लांछनम् ॥ ४३ ॥
अर्धचन्द्रसमाकारं भागयुग्मस्य चान्तरे ।
दक्षिणोत्तरभागाभ्यां तदध स्तत्समं तथा ॥ ४४ ॥
लांछनद्वितयं कुर्या त्तिर्यक्संस्थानसंस्थितम् ।
भागद्वादशकस्यैक्यं स्या त्पङ्क्तिद्वितया तथा ॥ ४५ ॥
ब्रह्मकर्म चतुर्थं य त्संख्यामानं च पूर्ववत् ।
मर्मतस्य च पक्षस्था वेककर्मान्तरीकृतौ ॥ ४६ ॥

ताभ्यां मर्मस्थितेनैव सूत्रेणैतत्प्रजायते ।
पुनर्मध्या द्वितीयं यत मर्म चोर्ध्वं प्रवर्तते ॥ ४७ ॥
तस्माद्वेऽन्तरीभूतं चतुर्थं पक्षयो द्वयोः ।
मर्म तत्स्थेन सूत्रेण वृत्तार्धं पूर्ववल्लिखेत ॥ ४८ ॥
ब्रह्मकर्माणि षष्ठस्य प्रत्यग्दिक्संस्थितस्य च ।
मर्मणो ऽथ वै सूत्रं कृत्वा तत्सम्प्रसार्यंच ॥ ४९ ॥
यावद्वृत्तार्धकुम्भस्थ शृंगकोटे स्तु सन्निधिः ।
एवं सूत्रद्वये दत्ते धिष्ण्य शंखाकृति र्भवेत ॥ ५० ॥
तस्य भागसमा कार्या लांछनै मेखला बहिः ।
पूर्वोक्तमर्मगे स्सूत्रे यथा तदवधारय ॥ ५० ॥
द्व्यंशर्दैर्घेण सूत्रेण नवचन्द्र कलासमम् ।
चतुर्णा मन्तरेशानां प्राग्दिक्कुर्याच्चलांछनं ॥ ५२ ॥
इत्यवहि पद्माभ्यान्तु वृत्ततुर्यांश सम्मिते ।
द्वेलांछने समंकुर्या दकभागादिके तथा ॥ ५३ ॥
तत्समे ह्यपरे द्वे वै यदालांछनंचलांछनैः ।
दक्षिणोत्तरभागाभ्यां पश्चात्सूत्रद्वयंक्षिपेत ॥ ५४ ॥
कृत्वासमम मर्मस्थं पूर्वोदिशु क्रमेणतु ।
जीवसूत्रस्य पाश्चात्ये भागे पार्श्वद्वयेस्थितम् ॥ ५५ ॥
भागद्वयं द्वयं लांछयं योन्यर्धचार्धवृत्तवत् ।
तच्छृङ्ग कोटिगेसूत्रे कृत्वा ते सम्प्रसार्यंच ॥ ५६ ॥
खातभूभागपर्यन्तं तत्पदा द्वटपत्रवद ।
जायते सर्वकुण्डानां योनिरेवंविधाशुभा ॥ ५७ ॥
भागार्धमान सूत्रेण योनेराभ्यन्तरेपुनः ।
अर्धवृत्त द्वयं दद्या त्तद्व स्सूत्रद्वयान्वितम् ॥ ५८ ॥
खातस्यान्तर्गतोध्वर्यं श्चतुर्थांशस्तु कोष्ठकात ।
कोष्ठार्धं निखनेच्छेषं तत्समंवापुरोदितं ॥ ५९ ॥

द्वैर्घ्यात्पादाधिकाकार्या योनिर्वै पृष्ठ उन्नता ।
गजोष्ठ सदृशी चाग्रा त्स्पृशन्ती दशनच्छदम् ॥ ६० ॥
पुरोभाग चतुर्थांशं योने रग्रा द्विसृज्यतु ।
दद्यात्भावसूत्र सम्बन्धं सूत्राणां द्वितयम्परं ॥ ६१ ॥
अनुपातेनवै ताभ्या मग्रात्संकोचमाचरेत ।
भागपङ्क्ति त्रयेणैव मेखलात्रितयम्बाहिः ॥ ६२ ॥
सम्पाद्य चतुरश्रन्तु शंखं सन्नतयो(तृत्रितयो] परि ।
आशांखंमेखलानान्तु प्रोन्नतत्वं स्वविस्तृतेः ॥ ६३ ॥
मेखलानान्तु शंखस्य यन्मध्येश्रिचतुष्टयं ।
तच्चक्रचिह्नितंकुर्या त्तल्लक्षण मथोच्यते ॥ ६४ ॥
ब्रह्म मर्म निरुद्धेन चतुर्भाग समेनतु ।
खातार्थं भ्रामयं दद्या त्क्षेत्रमध्ये महामते ॥ ६५ ॥
वहिर्भाग समानाभि स्तद्वहि द्व्यंशविस्तृतं ।
अरक्षत्रञ्च तस्यापि नेमिभाग समा वहिः ॥ ६६ ॥
भागेनतद्वहिस्त्वेका चतुरश्राच मेखला ।
भ्राममध्यावरक्षेत्रं वृत्तेनैकेन वैपुनः ॥ ६७ ॥
ततस्सूत्राष्टकंदद्या द्दिग्विदिक्संस्थितम्पुरा ।
तस्यचान्तर्गतंपश्चा दष्टकं पातयेत्परं ॥ ६८ ॥
ततस्तेषां समापाद्य मराख ममलेक्षण ।
अन्तर्वृत्त निरोधेन प्रतिसूत्रस्य पक्षयोः ॥ ६९ ॥
सूत्रेण लांछने कुर्या न्नाभिनेमिभ्रमावधेः।
एकांशा दर्धमानं च नेमिवृत्तस्य चान्तरे ॥ ७० ॥
द्वाभ्यां द्वाभ्या मराभ्यां तु मध्ये कुर्या त्प्रधि प्रधिम् ।
विस्तारप्रोन्नता नाभिः कूर्मपृष्ठोपमाऽरकः ॥ ७१ ॥
नेमिं दर्पणवत्कुर्या त्स्वीय निम्नावसानतः ।
शिष्टं पुरोदितं सर्वं मथ पद्माकृतिं शृणु ॥ ७२ ॥

भागार्धं भ्रामये भ्राभे बहिः केसरसिद्धये ।
भ्रामये दपरं चार्धं मरक्षेत्रस्य बाह्यगम् ॥ ७३ ॥
नीत्वा लोपं मनेनैव विधिना नेमिमण्डलम् ।
अरसूत्राश्रितं कुर्या त्ततः पद्मदळाष्टकम् ॥ ७४ ॥
केसरभ्रमदद्धेन सूत्रेणार्धेन्दुळक्षणम् ।
तच्छृंगकोटिसंस्थेन परिधे र्बाह्यकेन तु ॥ ७५ ॥
सूत्रद्वयेन पत्राग्रं कुर्या द्वाह्यभ्रमावनेः ।
निरन्तराणा मामूला त्केसराणा ममहामते ॥ ७६ ॥
कर्णिकोच्छ्रयतुल्यानां विभागं जनये त्स्फुटम् ।
शंखं कोणचतुष्के तु शेषं पूर्ववदाचरेत् ॥ ७७ ॥
योनि मेकेन भागेन चतुर्भि र्मेखलागणम् ।
खातं पूर्वसमं किन्तु वृत्ते वृत्तास्तु मेखलाः ॥ ७८ ॥
चतुरश्रे तदाकारा इत्युक्तं कुण्डपंचकम् ।
काल माहुतिसंख्यां च होमद्रव्यप्रभूतताम् ॥ ७९ ॥
ज्ञात्वैव मेकहस्तात्तु कुर्यां दष्टकरावधि ॥ ७९॥ ॥

इति श्रीपाञ्चरात्रे श्रीसात्वतसंहितायाम्
यागकुण्डविधि र्नाम

एकादशः परिच्छेदः ॥ ११ ॥

अथ द्वादशःपरिच्छेदः ।

नारदः ।

एवमाकर्ण्य सत्वेव मुखळी मुनिनायकाः ।
कृताञ्जलिपुटेभूत्वा पप्रच्छ जगताम्पतिं ॥ १ ॥

सङ्कर्षणः ।

यथाक्रम स्थितानाञ्च सर्वेषां [मन्त्राणां] लक्ष्मिनन्दन !
रघतोहं श्रोतुमिच्छामि मन्त्राणां [सर्वेषां] ध्यानलक्षणम् ॥२॥

भगवान् ।

त्रयाणां मुख्यपूर्वाणां ध्रुवान्तानां पुरोदितं ।
शेषादीनामशेषाणा मिदानीं मवधारय ॥ ३ ॥
ध्यानं पाताळ निलय पर्यन्तानां यथास्थितम् ।
एक एव जगन्नाथ स्स्वरूपाद्यैस्तु शक्तिभिः ॥ ४ ॥
नानात्वेना ष्यनन्तोयो भक्तानुग्रह काम्यया ।
तस्याभिमानिकं रूपं श्रुणुसर्वेश्वरस्यतु ॥ ५ ॥
तुहिनाचलसंकाशं पूर्णचन्द्र समाननं ।
स्व [सु] मणि व्यंजितेनैव युक्तं फणगणेनतु ॥ ६ ॥
प्रोद्वहन्तं हलंचक्र मपसव्य द्वयेनतु ।
वामहस्त द्वयेनैव शंखं मुसलमेवच ॥ ७ ॥
नित्यसन्निहिताशेष शक्ति सर्वज्ञमच्युतम् ।
मनस्यन्त र्मुखानांच स्वकर्मणां पुरयेन्नतत ॥ ८ ॥
शक्तीशोप्यधसंचिन्त्यः पुण्डरीकनिभेक्षणः ।
इच्छारूप धरश्चैव सौम्यः प्रहासिताननः ॥ ९ ॥
व्यक्तयेच फलादीनां भक्ताना मनुकम्पया ।
पीडयन् स्वांघ्रियुग्मेन वसुधांच करद्वयं ॥ १० ॥
युगानुसारिकांतिश्च श्चतुर्वक्त्र श्चतुर्भुजः ।
मूर्तंचक्र गदाहस्तः स्वमूर्ता श्छाम्बुजांकितः ॥ ११ ॥
शमं नयतिसन्तापं कमले नेन्दुकान्तिना ।
नानामन्त्र मयींविद्यां भाव [व्यंज] पत्पमलात्मनां ॥ १२ ॥
सम्यग्वाक्पतिनाचैव कम्बुनाशब्दमूर्तिना ।
आज्ञा प्रतीक्षकेणैव गदाचक्र द्वयेनतु ॥ १३ ॥

गरितेन हिनस्त्याशु साधुसन्तापकारिणम् ।
नारसिंहेन चक्रेण भवभीति विघातकृत् ॥ १४ ॥
पुष्णाति सर्वभूतानि वाराहेणा मृतात्मना ।
कुरुते पश्चिमस्थेन कापिळे नोपसंहृतिम् ॥ १५ ॥
भक्ति श्रद्धापराणांच स्मृतमात्रः समेत्यवै [दैवहि] ।
हृन्मध्ये गगनेभूमौ वह्निमध्ये जलान्तरे ॥ १६ ॥
चतुर्णां ब्राह्मणादीनां स्वयमेवानुकम्पया ।
चातुरात्म्येन रूपेण चतुर्धाव्याकृतमेतिच ॥ १७ ॥
आत्मतुल्येनदेहेन शंखपद्मांकितेनतु ।
मूर्तिमद्भिर्हेत्यर्थैस्तु युक्तेनवदनैर्विना ॥ १८ ॥
वर्णानुरूपवर्णेन समेनाप्यसमेनतु ।
अन्योन्यानुगतेनैव पूर्वोद्दिष्टेननान्यथा ॥ १९ ॥
प्रळयानलसूर्याभः स्मर्तव्योमधुसूदनः ।
अष्टबाहुर्विशाळांसो व्यक्षीष्टो मकरांकितः ॥ २० ॥
शंखचक्रधरश्चैव बाणकार्मुक धृक्तथा ।
रजस्तमोभ्या मूर्ताभ्यां सम्प्रवृत्ति निवृत्तये ॥ २१ ॥
कर्णपीठ निविष्टंच ध्येयं पाणि युगं विभोः ।
विद्याधिदैवं भगव च्चतुर्वक्त्रं चतुर्भुजम् ॥ २२ ॥
दृष्टकूर्च [कर्ण] जटा दण्ड कमण्डलवक्ष सूत्रिणम् [त्रकं] ।
फुल्लरक्ताम्बुजाभासं श्वेतपद्म करांकितम् ॥ २३ ॥
श्रुतिरङ्गाश्च वक्त्रेभ्यः मोद्गिरंतमनुस्मरेत ।
निर्धूमांगारवर्णाभं शांखपद्माक्षसूत्रिणम् ॥ २४ ॥
फुल्लरक्ताब्जविभवं देवताद्यात्मसूत्रकम् ।]
ध्याये दभयपाणिं तं कापिलं तेजसां निधिम् ॥ २५ ॥
योन्त स्सर्वेश्वरो देव स्साक्षिभूतो व्यवस्थितः ।
स्फटिकोपलवच्छ्रीमान् स्वशान्त्युत्था न्विभर्ति च ॥ २६ ॥

अविद्याविष्कृतानां तु भक्तानां सत्प [म्प] दामये ।
त मनादिं जगन्नाथं : बहिस्स्थूलतरात्मनाम् ॥ २७ ॥
द्यावापृथिव्यो रन्तस्स्थं विश्वरूप मनुस्मरेत् ।
अनेकवक्त्रांघ्रिकर मनेकमकरांकितम् ॥ २८ ॥
यद्यप्यनेकवदन मनेकभुजभूषितम् ।
तथापि वै त्रयस्त्रिंशं द्वदनै र्विविधै र्युतम् ॥ २९ ॥
चतुरभ्यधिकै र्दिव्यै श्चत्वारिंश न्महाभुजैः ।
ब्रह्मरुद्रेन्द्रदक्षार्क चन्द्रसिद्धा स्तथा शुचिः ॥ ३० ॥
पौरुषस्य तु वक्त्रस्य चोर्ध्ववक्त्रस्थिता स्त्वमी ।
निशाच्चाग्निमरुच्छैल द्विपगन्धर्ववारिभिः ॥ ३१ ॥
वक्त्रैरूर्ध्वं स्थितै र्ध्याये द्दक्षिणं वदनं विभोः ।
पाताळादि द्रुमहामेघ लोकराशिग्रहोस्थितैः ॥ ३२ ॥
वर्णे स्तार [रास्स] लगेतै स्तु ध्याये द्वक्त्रं तु पश्चिमम् ।
यक्षान्तकाब्जनाभाद्यै र्वसुनक्षत्रगोगणैः ॥ ३३ ॥
वक्त्रै र्वाहवक्त्रोर्ध्वं स्थितै र्ध्यायेच्च दक्षिणम् ।
पश्चाद्यं चातुरात्मीयं मद्यानां दशकं महत् ॥ ३४ ॥
प्रोच्छ्रितं हि सुवर्णाभं तल्लांछनचतुष्टयम् ।
लोकेशाख्यात्मकं चैव पुस्तकं चाक्षसूत्रकम् ॥ ३५ ॥
दर्वी कमण्डलु र्हैम श्चाभयं हि वरान्वितम् ।
दर्भाजिनं वत श्छत्रं सुशुभं चामरं सितम् ॥ ३६ ॥
स्रुक्स्रुवौ चापि कलशो वेदि र्वह्निसमन्विता ।
चन्द्रार्कमण्डले पूर्णे नागेन्द्रो मणिदर्पणम् ॥ ३७ ॥
पुष्पस्रग्व्यजनं दिव्यं विश्वपत्रलतातथा [पात्रं तथा तथा] ।
स्मर्तव्यास्तु भुजेश्वरस्य विभोस्संस्थानकैस्समैः ॥ ३८ ॥
यथोदितक्रमेणैव व्यत्ययो नभवेद्यथा ।
भाभिर्नानाप्रकाराभि र्देहोत्थाभि रिदंजगत् ॥ ३९ ॥

भासयन्तं जगन्नाथं स्मरेद्धृक्कमलादिषु ।
हंसमूर्ति मथास्मानं ज्ञानयज्ञभुजंस्मरेत् ॥ ४० ॥
कुन्देन्दु स्निग्धकान्तिंच होमकुण्ड महातनुम् ।
रजस्तमोघ्नांघ्रि सत्त्वस्त्व विग्रहं परमेश्वरं ॥ ४१ ॥
धर्माधर्मेक्षणंध्याये दग्नीषोमात्मकेनतु ।
दक्षिणोत्तरसंस्थेन पक्षयुग्मेनराजितम् ॥ ४२ ॥
बहिस्तमेवोदकस्थ न्तुहिनाचलसन्निभम् ।
ध्यात्वार्चयेत्तुविधिव द्धंसविग्रह मच्युतम् ॥ ४३ ॥
बहिर्द्रव्यमयस्त्वेक स्सामान्येनैकलक्षणः ।
सम्यङ्क्रिवर्तितस्स्वर्ग पूर्वमृच्छति चार्थिनाम् ॥ ४४ ॥
अन्तर्वेद्यां चतुर्धाय स्त्वेकएव महामखः ।
तपोयागजपध्यान स्वरूपश्शाश्वदेवहि ॥ ४५ ॥
याजिनामपवर्गन्तु विदधाति समापनात् ।
तंयज्ञ पुरुषं [वपुषं] ब्रह्म वासुदेव मजंहरिं ॥ ४६ ॥
ध्याये द्वै सूकरात्मान मञ्जनाद्रि समप्रभं ।
यज्ञाङ्गचिह्निताङ्घ्रिंच महाव्याहृतिदंष्ट्रिणम् ॥ ४७ ॥
भूर्भुवस्स्वश्शरीरंच शब्दब्रह्मैकमानसम् ।
निर्नुदन्तं प्रपन्नाना मविद्यापंकमंजसा ॥४८॥
वैद्येनपोत्र मान्तेन त्वक्षयेनामलेनच ।
वासनावासितानांच जीवानां भवशान्तये ॥४९॥
महाविभूति भंगवान् पूर्णषाड्गुण्य विग्रहः ।
स्वकराब्जान्तराद्ब्रह्म तत्पादादाय चांजलिं ॥५०॥
करोतिसेचनंदोषं दधानांचस्वतेजसा ।
स्थूलरूपेणतमजं बहिराराधनाविधौ ॥५१॥
आध्मातंवायुनायद्व न्निर्धूमांगारपर्वतम् ।
ध्यायेत्तद्वन्महादीप्तं वाजिवक्त्रमलांछनं ॥ ५२ ॥

बद्धब्रह्मांजलिकस्थं द्रवत्कनकलोचनम् ।
घोणाग्रेणाहरन्तंच त्रैलोक्योत्थमलेन्धनम् ॥५३॥
कृत्वातद्भस्मसात्सम्य क्फूत्कुर्वन्त स्मुखेनतु ।
धर्मसामान्य ममल मनादिनिधनंविभुं ॥५४॥
दुर्लभं यत्प्रबुद्धानां यत्प्रसादाधियाविना ।
तस्यथूलतरंरूपं शृणुतत्प्रागयेपरं ॥५५॥
तुहिनाचलसंकाशं सौम्यवक्त्रं चतुर्भुजं ।
कामार्थौ चुद्रहन्तंच शंखपद्मच्छलेनतु ॥५६॥
साधुमार्गे स्थितानान्तु प्रयच्छन्तं धियावतो ।
सिताक्षमालं धर्मन्तु वरपाणि मतस्मरेत् ॥५७॥
वाङ्मयन्निखिलंयस्य वस्तुजात मनश्वरम् ।
शक्तित्वेन स्वभावस्थं चिद्रूपस्यामलद्युतेः ॥५८॥
वरवाजिमुखंध्याये द्धवागीश्वरंविभुम् ।
सूर्यकान्ताग्नि संकाश मनेकभुजभूषितम् ॥५९॥
कमलंचाक्षसूत्रंच योदिन्त्रेताग्निभूषितो ।
साज्यधारौ स्रुक्स्रुवौतु विष्टरंसोमसंयुतम् ॥६०॥
दर्भाजिनं मेखलांचा प्यपसव्येषु षट्स्वमूः ।
स्मरेद्वामकरेष्वस्य पुस्तकं शंखमेवच ॥६१॥
दण्डंकमण्डलुंदर्वी मेकस्मिं स्त्रितयंकरे ।
पूर्णग्राम्ये स्तथारण्ये अरुर्वाजेस्तु पंचमे ॥६२॥
स्नुङ्मूलफलपत्रैस्तु यज्ञद्रव्ये स्सदक्षिणैः ।
सर्वाश्रमोपकरणे र्युक्तं चमसभाजनं ॥६३॥
ध्येयमस्य भुजेषष्ठे प्रतमूर्तै र्ऋगादिभिः ।
वेदांगैरुपवेदैस्तु संस्कार स्समखैस्तथा ॥६४॥
विकारवस्तुधाधारे द्धभावेतु गुणोदधौ ।
स्वशक्ति भावितंकृत्वा मनःपूर्व चतुष्टयम् ॥६५॥

प्रकुर्वन्तं समास्तेय स्सर्वज्ञः पुरुषात्मना ।
निषण्णं भोगिशय्यायां तपनीयरुचिस्मरेत् ॥६६॥
देवमर्णवशाय्याख्यं मूर्तैश्चक्रादिकैर्वृतम् ।
लक्ष्म्यासंवाह्यमानंच समाक्रान्तंच निद्रया ॥६७॥
वीज्यमानंहिवैभीत्या गीयमानंहिविद्यया ।
कूर्मात्मा कूर्मवद्बुध्या ध्यातव्यस्सवधलांगलिन् ॥६८॥
द्रवत्कनकवर्णाभ स्स्वसामर्थ्यो जलाश्रयः ।
शक्त्यादिक कलाद्वंद्व द्वितीयांघ्रिस्सनातनः ॥६९॥
शक्त्यादिक कलाद्वयश्च भोद्गिरंस्तु श्रुतित्रयम् ।
अतसीपुष्पसंकाश श्शंखचक्र गदाधरः ॥७०॥
महोपकरणांगश्च निमग्नोद्धरणक्षमः ।
स्वशक्तिविभवाधार मिच्छाज्ञानक्रियात्मिकम् ॥ ७१ ॥
नानाविशेषविज्ञान स्फुलिंगोर्मिसमुद्दोदितम् ।
धारयन्तं स्थितं हार्दं मनूनं मोह मुलवणम् ॥ ७२ ॥
नदन्नाद मनाख्येयं त मजं परमेश्वरम् ।
निष्टमकनकाभं च ध्याये देवं नृकेसरिम् ॥ ७३ ॥
ज्वलदग्निस्फुलिंगाभि स्स्वदेहोत्थाभि रावृतम् ।
रथांगशंखधातारं बृह न्मूर्तिं सुभीषणम् ॥ ७४ ॥
सासरयकरजश्रेणि दीप्तिनाभयपाणिना ।
सम्यच्छन्तं धिया सम्यक् भविनां साभयं वरम् ॥ ७५ ॥
अमृताध्मातमेघाभ ममृताहरणं विभुम् ।
पीतांबरधरं ध्याये देकवक्त्रं चतुर्भुजम् ॥ ७६ ॥
श्रोणीतटार्पितकरं शंखचक्रविभूषितम् ।
मध्यतो दक्षिणेनैव वहन्तं गिरिरूपधृत् ॥ ७७ ॥
शुद्धज्ञानानुविद्धं च कर्मसम्भवभीतिहम् ।
दिशन्तं स्वधिया सम्यक् भक्तानां भक्तवत्सलम् ॥ ७८ ॥

मंथामथितदुग्धाब्धि क्षोभयित्वा प्रकाशितम् ।
अमृतं क्षुत्तृषादीनां प्रतिपक्ष मनामयम् ॥ ७९ ॥
शुद्धं चानश्वरं भाव्यं मायाख्यार्णवमध्यगम् ।
आत्मामृतमनौपम्य माहारध्वंसकर्मणा ॥ ८० ॥
ध्याये त्कमलगर्भाभं देवदेवं श्रियः पतिम् ।
कमलालयहेतोश्च विभूषितकरद्वयम् ॥ ८१ ॥
द्वयं देवीपरिणये लीलयैव समर्पयन् ।
प्रकाशय ननादिव मात्मनः प्रकृते स्सह ॥ ८२ ॥
मात्करे स्तुविद्धेयं प्रकृतिः प्राकृते रहम् ।
यतोह माश्रय श्चास्या मूर्ते र्मध्येतदात्मिका ॥ ८३ ॥
या माक्रम्य सुखेनेमं दुस्तरं हि गुणोदधिम् ।
निस्तरं त्यचिरेणैव व्यक्तध्यानपरायणाः ॥ ८४ ॥
मदविह्वलनेत्रं च देव मुद्भिन्नयौवनम् ।
फुल्लरक्ताम्बुजाभास मत्यजन्तं निजां स्मृतिम् ॥ ८५ ॥
त्रैलोक्यविस्मयकरं कान्ताकृतिधरं स्मरेत् ।
आनन्दामृतसंपूर्णवदने नेन्दुकान्तिना ॥ ८६ ॥
कलशाकृतिरूपेण करस्थेन विराजितम् ।
लीलाकटाक्षवाग्बाणै स्सुदयन्तं सुरद्विषः ॥ ८७ ॥
द्विरेफपटलाक्रान्त सहकारलताकरम् ।
कलामूर्त्यभिमानात्म राहुसंज्ञो विभीषणः ॥ ८८ ॥
मूर्तामूर्तेन रूपेण संग्रसत्यनिशंकिल ।
अग्निषोममयीं मूर्तिं कर्मिणा मुपकारिणाम् ॥ ८९ ॥
योन्तःप्राणादि रूपेण चन्द्रादित्यात्मनाबहिः ।
स्थितस्तद्विजयेध्यक्षः सत्यध्यानरतात्मनाम् ॥ ९० ॥
निष्पन्दं बोधभावेन तन्तुव्यक्तं स्मरेद्बहिः ।
नीलनीरदवर्णाभं पद्मपत्रनिभेक्षणम् ॥ ९१ ॥

मध्याह्न भास्कराकारं द्वादशारकरोद्यतम् ।
श्रोणीतटनिविष्टेन वामहस्तेन लीलया ॥ ९२ ॥
ध्रियमाणंगदांगुर्वीं निषण्णां धरणीतले ।
अविद्याख्याचपानेमिः कालचक्रस्य दुर्धरा ॥ ९३ ॥
समाधीयं समाश्रित्य विग्रहं विधुनोतिच ।
जयद्य क्रियादीनां तामसेन बलेनच ॥ ९४ ॥
ध्यायेतत्प्रसरग्रंच देवराजोपलक्ष्युतिम् ।
विज्ञानरश्मिभिर्दीप्तं सत्सत्व गरुडासनम् ॥ ९५ ॥
नानास्वरूप भूताम सद्विद्याभुजभूषितम् ।
चक्रं पद्मं गदां बाण मंकुशं कुंत मेवच ॥ ९६ ॥
षट्सु दक्षिण हस्तेषु शक्ति पाशौ च कार्मुकम् ।
मुसलं मुद्गरं भीमं खेटकं वाम बाहुषु ॥ ९७ ॥
देवश्चामृदलाभश्च स्मर्तव्यः पारिजातजित् ।
अक्लिष्ट कर्मा देवेश सवनेका द्भुतविक्रमः ॥ ९८ ॥
प्रबन्ध प्रतिपन्नानां भक्तानामपिदेहिनाम् ।
योबोध भूमौ संरूढो ह्यनित्यश्चानुरंजकः ॥ ९९ ॥
न्यग्रोधविटपाकारो व्यविद्या बन्धलक्षणः ।
कर्मवृक्षस्सुविततो मोहमाया फलावृतः ॥ १०० ॥
तदुत्पाटन सिध्यर्थ मनुग्राह्यजनंसदा ।
आविश्यास्तेंशमात्रेण कृपयास जगत्प्रभुः ॥ १०१ ॥
सविवेकात्मनाभूत्वा ह्यानबाहु विज्ञानभृक् ।
ऐश्वर्यं धर्म वैराग्य श्चामास्य क्षितिशक्तिभृत ॥ १०२ ॥
आदाय संयमास्त्रोघं नियमास्त्रगणं तथा ।
इन्द्रियादिगणं जित्वा कर्मिणां दोषहोह्यियः ॥ १०३ ॥
यद्रस्य सुराजिद्रूपं तद्द्वादशभुजं स्मरेत ।
दिव्यमाल्याम्बरधरं दिव्याभरणभूषितम् ॥ १०४ ॥

चतुर्वक्रं सुनयनं वामोत्संगार्पितप्रियम् ।
खड्गं चक्रं गदां बाणं मुसलं च तदुत्तमम् ॥५॥
षट्सु दक्षिणहस्तेषु शंख मंकुश कार्मुके ।
छत्रं च फणभृत्पाशं विभो वामभुजे ष्वमी ॥ ६ ॥
षष्ठेनाऽऽलिंगिता देवी सारविन्देन बाहुना ।
सदंसलग्नकरया देव्या तच्चितया ऽनिशम् ॥ ७ ॥
संवीज्यमानं विनया श्चामरेण सितेन तम् ।
लोकनाथं विशालाक्षं सर्वदेवनमस्कृतम् ॥ ८ ॥
वरसिंहासनारूढं ध्याये न्मीलितलोचनम् ।
पद्मासने नोपविष्टं पद्मगर्भोपमद्युतिम् ॥ ९॥
करुणाविष्टबुद्धिं च शंखपद्मकरांकितम् ।
ज्ञानवैराग्य सद्धर्म मार्गत्रयनिदर्शकम् ॥ ११० ॥
संस्मरे द्य दत्ताख्यं ज्ञानमूर्तिमकल्पकम् ।
मनुष्यमुनिदेवानां समाधिनिरतात्मनाम् ॥ ११॥
ईषल्लब्धरसानां च ब्रह्ममार्गानुसारिणाम् ।
स्वप्रभानिकरेणैव भासयन्तं च तत्पथम् ॥ १२ ॥
मनसा सह वापूना माकृतिप्रतिषेधकृत् ।
श्रुतीना म्मानसानां चा प्याचाराणां तथैव च ॥ १३ ॥
वर्णाना माश्रमाणां च परिरक्षक एव हि ।
मानसैकार्णवान्तस्थे निष्कल्पे बुद्धिपादपे ॥ १४ ॥
अभिमानलताढ्येवा प्युपरिस्थ मनुस्मरेत् ।
मातृङ्गिरि रिव श्यामं तेजसा ज्वलनोपमः ॥ १५ ॥
ध्वंसकृ द्विघ्नजालस्य निद्रालस्य चयस्य यः ।
उत्कृष्टद्विजरूपेण विकसत्पद्मरूपिणा ॥१६॥
स एव द्विभुजो ध्येयो दण्डदर्भाक्षसूत्रधृत् ।
दन्तज्योत्स्नाजिताज्ञानं न्यग्रोधशयनं विभुम् ॥ १७ ॥

निषण्ण मीषदुत्तानं द्विभुजं शिशुरूपिणम् ।
एए एव (?) निरस्ताक्षं शान्तनिद्रारसं स्थितम् ॥ १८ ॥
अनुज्झित स्वभावंच योगमाया बलेनच ।
त्यजन्तमाहरंतंच श्वासोच्छ्वास द्वयेनतु ॥ १९ ॥
आब्रह्म भवनं सर्वं कर्मसाधानिकांक्षियत् ।
अपौरुषेण रूपेण संवृतावयवात्मना ॥ १२० ॥
स्वमायाजलमध्यस्थ मध्यक्षमधलंस्मरेत ।
ज्ञानादिगुणवृन्देन पक्षभूतेन भूषितम् ॥ २१ ॥
स्वोत्थंसन्निस्सृतं ब्रह्म मेकशृंग विराजितम् ।
कल्पावसान समये वहन्तश्चैव चिन्तयेत् ॥ २२ ॥
नौरूपां विततां क्षोणिं प्रजापति गणान्वितम् ।
मुक्ताफलगणेनेव वपुषा निर्मलेनच ॥ २३ ॥
अनिर्मीलितनेत्रस्स मीनात्मा भगवा नथ ।
यो नित्यं भवभीतानां बुधानां कृपया स्वयम् ॥ २४ ॥
हृत्स्थो नियतिदण्डेन मार्ताण्डायुतसन्निभः ।
जित्वा ज्ञानबलं भीम मिन्द्रियारिगणान्वितम् ॥ २५ ॥
सर्यच्छ त्यचिरा द्ब्रह्म नन्दनं सत्सुखाय च ।
ध्याये त्तमेव हृत्वांगं श्यामं पद्मदळे क्षणम् ॥ २६ ॥
अन्तर्निविष्टभुवनं जटावल्कलभूषितम् ।
छत्रं तद्वामहस्ते स्य दण्ड मन्यत्र षेष्णवम् ॥ २७ ॥
आक्रम्य जायदादित्य सूर्येन्दुहुतभुक्प्रभाम् ।
तिष्ठत्यनन्तो भगवां स्तुर्याख्य श्विद्विभूतिभृत ॥ २८ ॥
संप्रेरय न्निनिच्छात स्स्वपदा दमृतप्रभाम् ।
आह्लादजननीं शक्तिं कर्मिणां भावितात्मनाम् ॥ २९ ॥
त्रैलोक्यपूरकं ध्याये त्तमेव हरितद्युतिम् ।
नानामुद्राक्षयुक्तेन भुजवृन्देन भूषितम् ॥ १३० ॥

खेटकेनांत्रिदण्डेन वहंत मरिसूदनम् ।
वहन्तं सद्वैजयन्तीं देवानां च जयार्थिनाम् ॥ ३१ ॥
खड्गचक्र[अब्जखड्ग] गदादण्ड बाणांकुशसमुद्गराः ।
शक्तिः परशुशैलेन्द्रो दशदशभुजेष्वमी ॥ ३२ ॥
शंखतोमरशार्ङ्ग च पाशशूलमहीरुहाः ।
कुलिशं क्षुरिका चैव लांगलं मुसलं मद्दव ॥ ३३ ॥
वामहस्ते ष्वमीध्येयां अत्येमुद्रान्वितादश ।
भयविस्मय मृद्धेणी कण्ठग्रहण लक्षणाः ॥ ३४॥
ध्येया मुद्रा विभोःपंच सव्येतु करपंचके ।
वराख्यां भूतिसंज्ञांच मुक्ताख्यां साभयान्तुवै ॥ ३५ ॥
गोपनीन्दक्षहस्तेषु तत्संख्येषु च संस्मरेत ।
जगत्सूत्रं सदा [भा] क्षेस्तु येनोक्त ममितात्मना ॥ ३६ ॥
गुणषट्क स्वरूपेण पूर्वोक्ताकृतिभिर्विना ।
स्मर्तव्य स्तचतुर्धावे लाञ्छनाद्य विवर्जितः ॥ ३७॥
सर्वदापरिरक्षन्तु जपपूर्वं चतुष्टयम् ।
योगक्रिया तपोन्तंच सद्विभूत्यपवर्गदम् ॥ ३८ ॥
नराद्यः कृष्णनिष्ठश्च पृथगे कचचेच्छया ।
नरन्तत्र मवालाभ मर्धोन्मीलित लोचनम् ॥ ३९ ॥
अन्तर्निविष्टभावंच शब्दब्रह्मैकमानसं ।
यदोपलक्षणम्मन्त्रं जपमानमलक्षितम् ॥ १४० ॥
स्फाटिकेनाक्ष सूत्रेण करस्थेनचशोभितम् ।
गणयन्नक्षसूत्रीया नावर्तान् वामपाणिना ॥४१ ॥
अथनारायणन्देवं ध्यायेत कुमुदपाण्डुरम् ।
बद्धब्रह्मांजलिशान्तं हृत्पद्मार्पितमानसं ॥४२ ॥
युञ्जानश्च स्वमात्मानं परस्मिन्नव्ययेपदे ।
कमण्डलुधरंध्यायेत कांचनाभमतोहरिं ॥ ४३ ॥

विष्टराविष्टपाणिंच क्रियाकाण्डप्रदर्शकम् ।
पठन्त मनिशं शास्त्रं पंचरात्रपुरस्सरम् ॥ ४४॥
कृष्णमिन्दीवरश्याम मूर्ध्वबाहुं जटाधरं ।
पादेनैकेनतिष्ठन्त माहरन्तंच मारुतं ॥ ४५ ॥
एकत्रिषड्द्विषड्रात्रा यतिकृच्छ्रपरायणम् ।
पक्षमासोपवासांश्च दिशन्त मनुचिन्तयेत् ॥ ४६ ॥
कृष्णाजिनोत्तरीयाश्च सर्वेकाषायधारिणः ।
ब्रह्मलिंगधरास्सर्वे सर्वेब्रह्मपरायणाः ॥ ४७॥
मुख्यकर्म परिक्रान्ता स्साधूनां प्रेरणायच ।
काळानुकाळ माश्रित्य सर्वेसर्वपरायणाः ॥ ४८॥
अखंगशातयाभगवान् सत्कुठाराभिधानया ।
छिनत्ति बद्धमूलान् यः कर्मवृक्षांस्तु कर्मिणाम् ॥ ४९॥
तमेव द्विभुजंध्याये दुद्यादित्यवर्चसं ।
कृष्णेणचर्मवसनं सत्कुठारकरांकितम् ॥१५०॥
दशेन्द्रियाननंघोरं योमनोरजनीचरम् ।
विवेकशरजालेन शमं नयतियोगिनां ॥ ५१॥
ध्येय स्सएव विश्वात्मा सतोय जलदप्रभः ।
रक्तराजीवनयनो धनुश्शरकरांकितः ॥ ५२॥
रागद्वेष ममलं योवे स्वरूप यतिलक्षणम् ।
स्वयंस्वोत्थंविभजति त्रिधापश्यन्ति पूर्वकम् ॥ ५३॥
बोधमारुतहृत्पूर्वं स्थानेष्वभ्युदितंक्रमात् ।
स्मर्तव्य स्सोपिभगवा नतसीकुसुमद्युतिः ॥ ५४॥
वहन्वै वामहस्तेन सर्वशास्त्रार्थ पुस्तकं ।
दक्षिणेनतुशास्त्रार्थ मादिशंश्च यथास्थितम् ॥ ५५॥
युगानुसारिबोधानां मखेद जननायच ।
विभजंस्तु चतुर्धावे वेदमेकं त्रिकालवित् ॥ ५६॥

दानधर्मरतानांच यागयज्ञातु याजिनाम् ।
तपस्स्वाध्याय सक्तानां मुक्तानां वै पुनर्भवात् ॥ ५७॥
संरक्षणाययोग्यत्व विज्ञानव्यक्तये ऽपिच ।
समुदेति जगन्नाथ स्तेषां हरकमलावनेः ॥ ५८॥
मनोवाजिन माक्रम्य त्वादायात्म गुणायुतान् ।
नूनमुत्पादयत्याशु जन्मान्तर शतोत्थितम् ॥ ५९॥
वैषयं वासनाजालं नाशयत्यात्म सिद्धये ।
ध्यायेद्भगवन्तंवै तनुत्रावृत विग्रहम् ॥१६०॥
सितोष्णीषललाटंच नातिदीर्घजटाधरं ।
द्रवत्कनकवर्णाभ मिषुधि द्वयमध्यगम् ॥ ६१॥
शरचापकरव्यग्रं खड्गकुन्त कुठारिणम् ।
यज्ञाध्ययन दानादि परिरक्षन्तमेवाहि ॥ ६२॥
शातयन्त मवर्णाश्चा स्वधर्मनिरतात्मनः ।
सर्वसत्वाश्रयन्तत्वं सर्वशक्तिमयंविभुम् ॥ ६३॥
सर्वेन्द्रिय गुणाभासं सर्वेन्द्रिय विवर्जितम् ।
आधारं भुवनानांच ध्यातव्य स्तदधस्स्थितः ॥ ६४॥
अनन्तशयनारूढः कल्पान्तहुतभुक्प्रभुः ।
ज्वलज्ज्वालावलीयुक्तः ज्वलनांशुकवेष्टितः ॥६५॥
चक्राद्यायुधबृन्देन मूर्तेन परिवारितः ।
स्थितांघ्रिदेशतो लक्ष्मी श्चिन्त्या दक्षिणतो विभोः ॥ ६६ ॥
मूर्धदेशगता निद्रा पुष्टि स्तद्वामत स्स्थिता ।
प्रधानदेवताध्यान मिद मुक्तं समासतः ॥ ६७ ॥
यज्ज्ञात्वा विनिवर्तन्ते जन्ममृत्युजराऽऽरुजः ।
नाळे वंशे ध्वजे येषां व्यक्ति व्यंक्ता जगत्त्रये ॥ ६८ ॥
तेपि लांछनबृन्दं तु धारयन्त्यग्निगोचरे ।
ललाटे चापपट्टं तु पृष्ठे पाणितलद्वये ॥ ६९ ॥

तनूरुहचये मूर्ध्नि कर्मिणां प्रतिपत्तये ।
अपि संसारिणो जन्तो स्स्वभावा द्वैष्णवस्य च ॥ १७०॥
न जहा त्यच्युतं लिंगं किं पुन र्विभवाकृतेः ।
सर्वेषां कामचारित्वं यदुक्तं वै मया पुरा ॥ ७१ ॥
तदंघ्रिभुजवर्णास्य बृहन्मध्याणुलक्षणम् ।
एकाद्यनेकसंख्यं च दृश्यं सर्वत्र सर्वदा ॥ ७२ ॥
नत्वन्यरूपता कार्या कारणं कामरूपताम् ।
यस्मा दस्ति पृथग्भूतो व्यापारो विश्वमन्दिरे ॥ ७३ ॥
देवानां स्थितिसंहार सृष्टिकाले स्वक स्स्वकः ।
सत्येवं नियमे सिद्धे तथापि भगवद्वशात ॥ ७४ ॥
चातुरात्म्यसमूहात्तु यत्पद्मदळभूस्थितम् ।
तथा विभवदेवाना मध्या त्पद्मदळेक्षण ॥ ७५ ॥
एक स्त्वनुगृहार्थं तु शक्त्यात्मा भावितात्मनाम् ।
बिभर्ति बहुभेदोत्थं रूपं सद्वाहनस्थितम् ॥ ७६ ॥
यदनुस्मरणा द्ध्याना दर्चना दाचिरा त्पुमान् ।
प्राप्नोति मनसो ऽभीष्टं तन्मे निगदत श्शृणु ॥ ७७ ॥
सत्य स्सुवर्णो गरुड स्ताक्ष्र्य श्च विहगेश्वरः ।
पञ्चात्मकस्य प्राणस्य विकार स्सैष पंचधा ॥ ७८ ॥
आद्यांत्रिगोच्चरा स्सर्वो यस्य देह स्तु पौरुषः ।
द्विभुज स्तुहिनाभ श्च स सत्यः प्राणदैवतम् ॥ ७९ ॥
सुपर्णः पद्मरागाभो निर्मल स्स्वर्णलोचनः ।
गरुडः कांचनाभ स्तु कुटिलश्वरुणेक्षणः ॥ १८० ॥
केकराक्ष स्तु तार्क्ष्यो वै प्रावृड्जलदसन्निभः ।
द्रुतरकनकनेत्रस्तु शबळाभश्च पंचमः ॥ ८१ ॥
चतुर्भुजा स्सुपर्णाद्या स्सौम्यरूपास्त्वनाकुलाः ।
पतत्रि चरणास्सर्वे पक्षमण्डल मण्डिताः ॥ ८२ ॥

लम्बोदरास्सुपीनांगाः कुण्डलाद्यैस्तु भूषिताः ।
कुटिलभ्रुसुवृत्ताक्ष पत्रतुण्डा स्स्मितानना: ॥ ८३ ॥
अपानादि समीराणा माधिपत्येन संस्थिताः ।
महाबला महाकाया रक्ततुण्डोत्र पंचमः ॥ ८४ ॥
आधेय चरणाधस्स्थ स्सव्य आद्यस्य वैकरः ।
दक्षिणश्चाक्षसूत्रेण सुसितेनच भासितः ॥ ८५ ॥
एवमेवसुपर्णस्य परिज्ञेयम्भुजद्वयं ।
नाभ्युद्देश परोवाम ऊत्तानस्तुसविस्मयः ॥ ८६ ॥
आधेयचरणाधस्थ स्सव्यआद्यस्य वैकरः ।
पुष्पस्तम्बकसम्पूर्ण ऊर्ध्ववक्त्रस्तु दक्षिणः ॥ ८७ ॥
गरुडस्य द्वयंविद्धि हृद्देशेंजलिरूपिणम् ।
तत्रैव सम्पुटाकारं चतुर्थस्य करद्वयं ॥ ८८ ॥
दक्षिणे ऽमृतकुम्भस्तु वामेतु विषमःफणी ।
पंचमस्य द्वयंशेषं त्रयाणांच द्वयोस्समम् ॥८९ ॥
आधेय चरणाक्रान्तो यदिवै दक्षिणःकरः ।
संचारोविहितोवामे स्वक्षसूत्रस्य वैतदा ॥१९०॥
आधेयचरणाधस्स्थं यस्यपाणितलद्वयं ।
निरस्तसूत्रन्तंविद्धि वाहनंभगवन्मयं ॥ ९१ ॥
अनुग्रहपरस्सवास्ते पक्षिपक्षाब्ज विष्टरे ।
स्वतेजो निजसामर्थ्यं संसूचक करा[स्वा]न्वितः ॥ ९२ ॥
पद्मासनादिनाचैव केवलंवा श्रियान्वितः ।
सुव्यक्तावयवस्थित्या विद्धि तं गरुडासनं ॥ ९३ ॥
मेढ्रभूस्सोदरास्यैव गोपितावेगगामिना ।
वीर्यपाता स्स्वशिरसा गच्छतश्चाण्डजेनतु ॥ ९४ ॥
लोकान्तराणां कार्यार्थं वात्सल्यात् ध्यायिनामपि ।
प्रत्यक्षदर्शनार्थन्तु स्मृतोगरुडवाहनः ॥ ९५ ॥

तस्माद्भगवतोविष्णो रेवंरूपधरस्यतु ।
समाहूतस्य सिद्ध्यर्थं मासीनं संस्मरेत्स्थितिम् ॥ ९६ ॥
उपसंहृतवामांघ्रिः कञ्जस्थोवा खगस्थितः ।
वाममिच्छाफलानांयो ध्वंसयत्यन्याचिन्तितम् ॥ ९७ ॥
आजानो दक्षिणस्यैव मविक्षिप्त स्स्मृतोच्युतः ।
आमोक्षा स्सर्वसिद्धीनां दक्षिणोध्यायिनां भवेत् ॥ ९८ ॥
सर्वमेव ऋजुस्थित्या संस्थित श्चार्थिनां स्मृतः ।
स्वस्तिकार्थे भवत्येष किन्तु से वाहनं विना ॥ ९९ ॥
विहिवाः पीठ कल्हार सिंहासन गतस्यच ।
विहगाधिपविश्वात्र योगेश्वर्या द्विभंतिच ॥ २००॥
सचक्रं भुजवृन्दन्तु नागेंद्राख्यवरान्वितम् ।
विभो राज्ञावशेनैव तुष्ट्यर्थं वा स्वयं विभोः ॥ १ ॥
जगज्जयोदयार्थंतु शान्तये शरणैषिणाम् ।
विभिन्नेनच रूपेण नाना लोकान्तरेषुच ॥ २ ॥
अनिरुद्ध गति धीरो विचरत्येकएवहि ।
सदारूढस्य यद्रूपं शक्तीशस्यच सम्मति ॥ ३ ॥
अनेक भेदभिन्नन्तु निबोध गदतो मम ।
संयच्छन्तं सदाशान्ति भाविनां दक्षिणेनतु ॥ ४ ॥
प्रोद्वहन्तं च वामेन शंखं पूर्वोक्तलक्षणम् ।
द्विभुजस्य त्विदं रूपं शक्तीशस्यतु केवलम् ॥ ५ ॥
रूपेणानेन च पुन स्त्वोहासमुपयान्तिच ।
सह कान्तागणे नैव त्वेकाधेन पृथक्पृथक् ॥ ६ ॥
प्रागव लक्ष्म्या समेतं य तदेकं रूप मैश्वरम् ।
श्रीपुष्ट्यो रथमध्यस्थं द्वितीयं परिकीर्तितम् ॥ ७ ॥
श्रियादि माया निष्ठेन चतुष्केण वृतं परम् ।
शुद्ध्यादिकेन षट्केण चतुर्थं विद्धि साम्प्रतम् ॥ ८ ॥

पुष्टयन्तेन श्रियाद्येन त्वष्टकेनतु पंचमम् ।
लक्ष्म्याद्येन द्विषट्केण षष्ठं विद्धि समन्वितम् ॥ ९ ॥
श्रीदेवी कीर्तिदेवीच जयादेवी हलायुध ।
चतुर्थी भगवन्माया विश्वस्यास्य निबन्धनी ॥२१० ॥
शुद्धि निरञ्जना नित्या ज्ञान मुक्ति [त्वेत्य] पराजिते ।
प्रकृति स्सुन्दरी षट्क मित्युक्तं सर्वसिद्धिदम् ॥ ११ ॥
लक्ष्मीश्शब्दनिधिस्सर्व कामदा प्रीतिवर्धनी ।
यशस्करी शान्तिदाच तुष्टिदा पुष्टिदाष्टकम् ॥ १२॥
द्विषट्कं वैभवे योगे देवीनां कीर्तिदंहि यत् ।
लक्ष्म्याद्यं तच्च बोद्धव्यं भेदेऽस्मिन् पारमेश्वरे ॥ १३ ॥
पुनश्चतुर्भुजस्यैवं विज्ञेयं भेदसप्तकम् ।
किन्तु ये शंखचक्रे द्वे वामहस्ते द्वयेन तु ॥ १४ ॥
जग त्यस्मिन् हि यच्छन्तं शान्ति माद्येन शाश्वतीम् ।
मोहहन्तं द्वितीयेन त्वपसव्येन वै गदाम् ॥१५॥
भूयःकरचतुष्केण पूर्वोक्तेन क्रमेण तु ।
चतुर्णां अब्जपूर्वाणा मन्योन्यत्वेन धारणात् ॥ १६ ॥
धत्ते द्वादशधा रूपं निश्शक्तिकं च केवलम् ।
पुन द्वादशकं तच्च सह शक्तिद्वयेन तु ॥ १७ ॥
स्थित मेकाधिकेनैव षोढा कमललोचन ।
एवं चतुर्भुजेनैव वपुषा बहुधा स्थितः ॥ १८ ॥
सप्तधा षड्भुजाद्येन भुजाधिक्येन वै पुनः ।
स्थित स्त्वनेकधा देवो यथा तदवधारय ॥ १९ ॥
षड्बाहु रष्टबाहु श्च दशद्वादशबाहुभृत् ।
द्विसप्त षोडशाकर स्तथाष्टादशभूषितः ॥ २२० ॥
केवलादिश्च सर्वेषां प्राग्वद्भेदस्तु सप्तधा ।
तन्मेशृणु यथावस्य मस्त्रविन्यास चिह्नितम् ॥ २१ ॥

षड्भुजो दक्षिणैर्धत्ते निस्त्रिंशं कमलं गदाम् ।
सशरं कार्मुकंशङ्खं वामैरस्त्रोत्तमन्त्रिभिः ॥ २२ ॥
गदा मुसलचक्रासी नष्टबाहुस्तु दक्षिणैः ।
शंखमंकुश पाशौच वामैस्तु सशरंधनुः ॥२३॥
खड्गबाण गदापद्म शक्तियुक्तास्तु दक्षिणाः ।
दशबाहोर्धनुश्शंख चक्रखड्गाश्च साभयाः ॥ २४ ॥
षण्णांदक्षिण हस्तानां द्विषट्क भुजभूषितः ।
सन्धत्ते कमलं खड्गचक्रबाणगदांकुशान् ॥२५॥
शंखपाशाभयान्शक्ति सव्यानाम्मुसलंधनुः ।
चतुर्दशभुजोधत्ते वामेतुभुजसप्तके ॥२६॥
शंखंगदांकुशौपाशं मुसलंमुद्गरंहलं ।
दण्डाब्जकुलिशान्चक्रं खड्गशक्तिपरश्वधान् ॥२७॥
बिभ्रत्षोडशभुजो मुख्यहस्तैस्समुद्गरान् ।
अभयंकमलंखड्गं शक्तिदण्डवरांकुशान् ॥२८ ॥
शंखचक्रगदावज्र पाशलांगलकार्मुकान् ।
वरंकराष्टकेनैव धत्तेसव्येनविश्वजित् ॥ २९ ॥
पद्मखड्ग गदावज्र चक्रबाण वरांकुशान् ।
दण्डंदक्षिणहस्तैस्तु धत्तेऽष्टादशबाहुधृत् ॥३०॥
शंखाभयौहलंशक्ति मुद्गरंमुसलं धनुः ।
कुठारमतुलंपाशं बिभुर्वामभुजैरमून् ॥ ३१ ॥
बिभर्तिदुष्टशांत्यर्थं साधूनांपालनायच ।
भूयोविशेषरूपाणि त्वेतान्येवविशेषतः ॥३२॥
स्वचक्रद्वयमात्रेण नयत्यमितविक्रमः ।
सिद्धतेजोसहिष्णूनां पितृयानरतात्मनां ॥३३॥
अंगनादिकसंसार भीतानांविहितायच ।
अमृतंवैयद्दैभागे स्तैजसेनित्यदक्षिणे ॥३४॥

वामदक्षिणवक्त्राभ्यां कुर्याद्वैत्यत्रयंप्रभुः ।
वृद्धयेपिच शांत्यर्थं तेजसःपद्मलोचन ॥३५॥
हेतुनानेनभगवान् बहिरंतर्गतेनवै ।
अग्नीषोमौसमीकृत्य त्वास्तेसाधारणात्मना ॥ ३६॥
व्यक्तिवागीशवक्त्रेन्तु नीत्वैवंशिरसोपरि ।
पंचवक्त्रेणवपुषा त्वामूलाद्यात्यनेकधा ॥ ३७॥
शब्दब्रह्मरतानांच ध्यायिनामात्मसिद्धये ।
आपातालाच्चसर्वेषां लोकानांपूरणायच ॥३८॥
नानावपुर्धरोभूय स्त्वधिकेनैश्वर्यातिच ।
भेदनरूपमाश्रित्य दशधाचलितान्दिकं ॥३९॥
विरावक्त्रैर्नृसिंहाद्यै स्सर्वज्ञमहिमान्वितः ।
बिभर्तिरूपाण्येतानि त्वनिरुद्धस्तुताक्ष्र्यकं ॥२४०॥
एवमाक्रम्यगरुडं प्रद्युम्नोविभूयात्तनुः ।
नानात्वमभिचात्येति संकर्षण सुपर्णगः ॥४१॥
देवस्सत्योपरिस्थित्वा विश्वात्मा यात्यनेकधा ।
सुरसिद्ध मनुष्यादि भूतानां दुःखशान्तये ॥ ४२ ॥
चतुर्णांयो निजावर्णा स्तेतुमूर्त्यंतरेषु च ।
चतुर्भुजस्यादि मूर्तं विष्णो मूर्त्यंतरस्यच ॥ ४३ ॥
वर्णलांछन तुल्यत्वे भेदकृत्स्वध्वजद्वयम् ।
अपसव्यास्थितेनैव तत्तालाख्य ध्वजेनतु ॥ ४४ ॥
स्वरूपमिदमाप्नोति स्वमूर्ति स्वहस्तयंदा ।
यस्मात्कार्यवशेनैव मूर्तीनामपि पाणिगाः ॥ ४५ ॥
चतुः पद्माद्योमूर्ता मूर्ताश्शान्ता स्तथोद्यताः ॥ २४५॥

इति श्रीपाञ्चरात्रे श्रीसात्वतसंहितायाम्
विभवदेवताध्यानं नाम
द्वादशः परिच्छेदः ॥ १२ ॥

अथ त्रयोदशः परिच्छेदः ।

भगवान् ।

योगोस्मिन् स्वेनपीठेवै सर्वसामान्यलक्षणे ।
ध्येयाविशेषरूपेण किरीटाद्याखिलास्तुवै ॥ १ ॥
चतुर्भुजाश्चतुर्वक्त्रा वस्त्रस्रग्भूषणान्विताः ।
पुनर्विशेषयोगाना मर्चनावसरेपुनः ॥ २ ॥
एकाननंचसर्वेषां द्विभुजं विहितंसदा ।
किरीटस्सौम्यवदनः कांचनाभोमहातनुः ॥३॥
भाभिराकृतियुक्ताभि र्नानारूपाभिरावृतः ।
स्थितोवैव्याधरायेन स्थानाकेनान्तरिक्षगः ॥ ४ ॥
पद्मरागाचलाकारं कौस्तुभं रत्ननायकम् ।
दिशोदशद्योतयन्तं संळग्नांघ्रिं स्थितंस्मरेत् ॥ ५ ॥
वहन्तंवक्षसोमध्ये स्वहस्तकृतसम्पुटम् ।
सन्धारयन्तमपरं तथावैशिरसोपरि ॥ ६ ॥
स्फटिकाद्रिप्रतीकाशं श्रीवत्समथभावयेत् ।
बद्धपद्मासनासीनं न्यस्तहस्तंस्वपार्श्वयोः ॥ ७ ॥
वहन्तंकूर्ममुद्रांच मुख्यहस्तद्वयेनतु ।
ध्येयाभगवतीमाला चित्ररूपामनोहरा ॥ ८ ॥
सर्वगन्धान्वितासौम्या ईषद्विकसितानना ।
स्वरश्मिमण्डलान्तस्थं वल्गन्तं हेतिपंस्मरेत् ॥ ९ ॥
विभोराज्ञांप्रतीक्षन्तं ह्रस्वाङ्गं रक्तलोचनम् ।
कुन्दा [न्ता] वदातं कमलं सौम्यमीष त्स्मिताननम् ॥१०॥
रवं सुवन्तं मधुरं श्रोत्रेन्द्रिय सुखावहम् ।
गदांहेमाद्रिसंकाशां तन्वीं कुवलयेक्षणाम् ॥११॥

स्वेतयेनरश्मिजालेन भायसन्तीं नभस्स्थलम् ।
तुहिनाचलसंकाशं शंखं कमललोचनम् ॥१२॥
सदागमादिसारन्त मुद्गिरन्तं स्वकैर्मुखैः ।
सन्ध्याजलदसंकाशं लांगलंभीमलोचनम् ॥१३॥
क्षो [क्षा] मांग मुन्नतांसंच वज्रकायं बलोत्कटम् ।
कृशोदरंच मुसलं रश्मिज्वालावलीवृतम् ॥१४॥
अंगारराशिसदृशं प्रलम्बमतिनिष्ठुरम् ।
नीलोत्पल दलश्याम मिष्वस्त्रं बहु [बाल] विग्रहम् ॥१५॥
नानारूपंचनिशितं दीर्घदर्चण्डविक्रमम् ।
कार्मुकंहेमगौरंच किंकिणीजालमण्डितम् ॥१६ ॥
आस्फोटयन्तंस्वकरं महाजलदनिस्वनम् ।
स्वरश्मिखचितंध्याये न्नृत्यमानंच नन्दकम् ॥ १७ ॥
शारदाकाश संकाशं दधान्तंदशनावलिं ।
सूर्यमण्डलसंकाशं खेटकं सौम्यमूर्तिकम् ॥१८॥
प्रसन्तमस्त्रपूगानि स्ववक्त्रेणा निशम्बलात् ।
बद्धमुष्टिस्मरेत्खण्डं रक्तांगं रक्तलोचनम् ॥१९॥
क्रोधमूर्तिं स्वदशनै र्दशन्तमधरंस्वकम् ।
शक्रकार्मुकवर्णंच परशुंभीमविक्रमम् ॥२०॥
प्रवरकनकनेत्रंच ज्वलज्ज्वालाजटाधरम् ।
पाशंफणगणाकीर्णं विद्युज्जिह्वं भयानकम् ॥ २१ ॥
हेमालिपाण्डराभंच घोरास्यंरक्तलोचनम् ।
कृशांगंदीर्घबाहुंच पिंगलाक्षन्तुचांकुशं ॥ २२ ॥
विकरालमुखंरौद्रं भिन्नाञ्जनगिरिप्रभम् ।
मुद्गरंशतधामाभं पीनांसं पृथुविग्रहम् ॥ २३ ॥
जटाकलाप धृत्सौम्यं पुण्डरीकनिभेक्षणम् ।
वज्रंवज्रोपलाभन्तु सितदीर्घ नखान्तिकम् ॥ २४ ॥

दंष्ट्राकराळवदनं ज्वलत्कनकलोचनम् ।
सौदामिनीप्रभाशक्ति शान्ताग्निवदनेक्षणम् ॥ २५ ॥
घनघर्घरनिर्घोष मुद्गिरन्तीम्मुहुर्मुहुः ।
एते ऽत्र नायकास्सर्वे विभोराज्ञाप्रतीक्षकाः ॥ २६ ॥
प्रोत्थिताविचलंतश्च कुसुमैस्स्थानकै[सुसंस्थैर्ध्यानकैः] स्थिताः ।
श्रोणीतटार्पितकरा श्चामरव्यजनोद्यताः ॥ २७ ॥
सपन्नन्तुकिरीटाद्यं वर्जयित्वाचतुष्टयत् ।
तर्जयन्तंच दुष्टौघ मन्येषां दक्षिणंकरं ॥ २८ ॥
स्मर्तव्यं ध्यानकालेतु सर्वेषामधमस्तके ।
ध्येयंस्वकंस्वकंचिह्नं सुप्रसिद्धं निराकृति ॥ २९ ॥
किरीटोहुतभुग्वेद्यः कौस्तुभस्तुप्रभाकरः ।
स्वयंशशांकः श्रीवत्सो मालाचैवपतत्रिराट् ॥ ३० ॥
काळश्चैवमहाबुद्धे विद्धिचक्रन्तु हेतिपं ।
अपाम्पतिर्वैकमलं गदादेवीसरस्वती ॥ ३१ ॥
स्वशंखस्क्षीरमोबध्यो मुसलं ना [न] गनायकः ।
शब्दादयस्साधकास्तु धनुर्विद्धिसमीरणम् ॥ ३२ ॥
नन्दकं सर्वशास्त्राणि खेटकं वसुधास्मृता ।
ज्ञेयोहि दण्डो नियति वैराग्यं परशुस्स्मृतः ॥ ३३ ॥
पाशोमायांकुशःकामो ऽप्यहंकारस्तु मुद्गरः ।
विज्ञानममळं वज्रं समाधि श्शक्तिरुच्यते ॥ ३४ ॥
भिन्नरूपस्यचविभो र्यउक्त स्सुन्दरीगणः ।
साधारश्चाप्यना [सा] धार स्तासां ध्यानं क्रमाच्छृणु ॥३५॥
चिन्ताखण्डलचापाभा लक्ष्मीरक्तांबुजप्रभा ।
पुष्टिः कनकगौराच कीर्तिः कुमुदपाण्डुरा ॥ ३६ ॥
जयार्ककान्तिसदृशी मायाञ्जननिभास्मृता ।
शुद्धिः किंशुकसंकाशा गुञ्जाभातु निरञ्जना ॥ ३७ ॥

बन्धुजीवोज्वलानित्या ज्ञानशक्ति स्सिताहणा ।
फुल्लेंदीवर वर्णाच परिज्ञेया पराजिता ॥ ३८ ॥
रक्तोत्पलाभा प्रकृति स्सितपीता सरस्वती ।
सर्वकामप्रदां विद्धि त्विन्द्रनील समप्रभाम् ॥ ३९ ॥
सिन्दूर पुञ्जवर्णाभा विज्ञेयाप्रीतिवर्धनी ।
यशस्करीच दुग्धाभा शान्तिदा विद्रुमोज्ज्वला ॥ ४० ॥
तुष्टिस्तुहिनसंकाशा दयावैडूर्यसन्निभा ।
निद्रायस्कान्तसदृशी क्षमापीतारुणप्रभा ॥ ४१ ॥
कान्तिर्दर्पणसंकाशा धृतिर्गोरोचनोज्ज्वला ।
मैत्रीबन्धूकपुष्पाभा रतिर्गैरिकसन्निभा ॥ ४२ ॥
मतिर्मरकताभाचै सर्वाःप्रमुदिताननाः ।
दिव्यमाल्याम्बरधरा नानालंकारभूषिताः ॥ ४३ ॥
दिव्यस्रग्वेष्टनोपेता वीक्षमाणास्स्वक पतिम् ।
चतस्रश्शक्तयोयान्तु विभोश्शयनकस्यतु ॥ ४४ ॥
प्रयुक्तास्तत्रपूर्वांशा वस्थितावीजयत्यजम् ।
त्वयंपाद्विकपस्थन्तु तत्संवाहनतत्परम् ॥ ४५ ॥
यत्रैकाश्रीर्विभोस्तत्र सन्निवेशपरोदिता ।
यत्रैकाश्रीर्विभोस्तत्र वामवादक्षिणेपिवा ॥ ४६ ॥
श्रीपुष्ट्याख्यद्वयंयत्र तत्रतद्दक्षिणोत्तरे ।
पद्मासनेनोपविष्टा पक्षिपक्षद्वयेस्थिता ॥ ४७ ॥
नलिनीनालहस्ताढ्या मृत्कुम्भकरापरा ।
अग्नीषोममयोदेह आद्योयस्सर्वगस्यच ॥ ४८ ॥
तस्यशक्तिद्वयंतादृ गमिश्रं भिन्नलक्षणम् ।
भोक्तृशक्तिस्स्मृतालक्ष्मीः पुष्टिर्वैकर्तृसंज्ञिता ॥ ४९ ॥
भोगार्थमवतीर्णस्य तस्यलोकानुकम्पया ।
उदितंसहतेनैव शक्तिद्वितयमव्ययम् ॥ ५० ॥

नानात्वेनहिवैयस्य परिणामः प्रकीर्तितः ।
दिक्पत्रचतुरन्तस्स्थं यद्वैदेविचतुष्टयम् ॥ ५१ ॥
शक्तिः परशु पाशाश्च मंकुशं तत्करेक्रमात् ।
षट्कंकेसरजालस्थं तत्प्राक्पश्चिमेद्वयम् ॥ ५२ ॥
द्वयं द्वयं सौम्ययाम्ये तासां वाम करेषु च ।
शंखं चक्रं गदा सीर मिष्वस्त्रं नन्दकं शिवम् ॥ ५३ ॥
पत्रमध्येनिविष्टन्तु यत्कान्ताष्टक मुत्तमम् ।
तस्यवामकराणाञ्च विज्ञेयन्त्वादितोऽष्टकम् ॥ ५४ ॥
श्रीफलंचाक्षसूत्रंस्त्र ग्दर्पणः पुष्पमंजरी ।
विष्टरं किंकिणीचाश्च संचयःकमळेक्षण ॥ ५५ ॥
विज्ञेयश्शान्तिदःपाणि द्वादशानान्तुसाभयः ।
अन्तरान्तरयोगेन सर्वाश्चामरलांछिताः ॥ ५६ ॥
स्वस्तिकेनोपविष्टाश्चा प्यन्तर्मुदितमानसाः ।
द्व्यादिकस्यास्यसंघस्य द्वादशान्तस्यकाङ्क्षिन् ॥ ५७ ॥
सितादिकेनवर्णेन लांछनव्यत्ययेनतु ।
तुल्यळाञ्छनयोगेन तन्निरासेचवैसति ॥ ५८ ॥
वराभयाभ्यामन्योन्य पाणिभ्यामथकेवलात् ।
बहुधाभेदवृन्दन्तु परिज्ञेयन्तुपूर्ववत ॥ ५९ ॥
शेषंभवोपकरणं देवानां निचयोहिसः ।
सुप्रसिद्धोमहाबुद्धे किन्त्वब्जाद्यैस्तु पूर्ववत् ॥ ६० ॥
ध्यातव्यालांछितास्सर्वे पाणिपादतलेषुच ।
भक्तिश्रद्धापरपर स्सर्वेषां यस्सदेवहि ॥ ६१ ॥
ध्यात्वैवमर्चनंकुर्यात भोगैस्संस्पर्शपूर्वकैः ।
सोचिरान्मोक्षनिष्ठन्तु फलंमाप्नोत्यभीप्सितं ॥ ६२ ॥
किरीटाद्यस्त्रनिष्ठेन परिवारेण चावृतम् ।
भक्त्या ह्यभीप्सितं रूप मर्चनीय मथापि वा ॥ ६३ ॥

निर्मुक्तपरिवारं वा स्वेन ध्यानेन लक्षितम् ।
विदधात्यर्चना नूनं स्वपदं फलसंयुतम् ॥ ६४ ॥
ज्ञात्वैवं साधकः कुर्या यथाभिमत मर्चनम् ।
आत्मशक्तिसमे भोगे ह्यखिले शुद्धविग्रहः ॥ ६५ ॥
हृदि वेद्यां वहिर्मूर्तौ प्रासादेस्वगृहेतुवा ।
वहुप्राकारनिर्मुक्ते धूमदाहादिनोज्झिते ॥६६॥
शरणेरमणीयेच निस्स्कम्पकेतु भाविते ॥६६॥

इति श्रीपाञ्चरात्रे श्रीसात्वतसंहितायाम्
भूषणाख्य देवताध्यानं नाम
त्रयोदशः परिच्छेदः ॥ १३ ॥

अथ चतुर्दशः परिच्छेदः ।

भगवान् ।

अखण्डयागनित्यस्य तथानैमित्तिकस्यच ।
कर्मणश्चोदयामास हरोविष्णुं मुनीश्वराः ॥ १ ॥
यैराजीवावधिकालं नित्यमाराधनंप्रति ।
धीःकृतापुण्डरीकाक्ष श्रद्धापूतेनचेतसा ॥२॥
तेषामाकस्मिकाल्लोपा द्भोगानामप्यसंभवात् ।
यत्स्यात्तस्योपशमनं ज्ञातुमिच्छामि साम्प्रतम् ॥ ३ ॥

भगवान् ।

क्षोभबुद्धिं विनाशस्य भोगाना मप्यसम्भवः ।
सामर्थ्येनविनाशस्य कृच्छ्रादीनां परिच्युतिः ॥४॥

ज्वरादिव्याधिदोषेण जातोयस्याह्निकक्षयः ।
चातुर्मास्यस्ययामाप्ति र्थस्यस्यातन्त्रयतोविना ॥ ५ ॥
तस्यतस्यमहाशुद्धे शृणुयद्विहितंहितम् ।
सांस्पर्शिकानां भोगानां मात्राचिरांहि पूरणम् ॥ ६ ॥
हृदयंगमसंज्ञाना मन्त्रैर्यद्विषाप्लुतम् ।
औपचारिकभोगानां बीजानिनिहितानिवै ॥ ७ ॥
कृच्छ्रचान्द्रायणादीनां व्रतानाम्परिपूरकः ।
विशेषार्चनसंयुक्त श्चातुर्मास्यस्तु संयमः ॥ ८ ॥
सौत्रंप्रतिसरंचित्र मुक्ताहारोपमंशुभम् ।
शमनयतिभक्तानां सर्वदालोपमाह्निकम् ॥ ९ ॥
तच्चमासचतुष्कस्य मध्येकुर्याच्छुभेदिने ।
आषाढंचद्दश्यास्तु यावद्वैकार्तिकस्यच ॥ १० ॥
सम्पूर्णश्चान्द्रदिवस स्सकाल श्चान्द्र उच्यते ।
आकर्कटकसंक्रान्ते स्तुलाभागक्षयावधि ॥ ११ ॥
पवित्रारोपणेचान्द्र स्त्वधमःपरिकीर्तितः ।
कालस्त्वचाष्टपक्षस्तु सौरोमध्यमसंज्ञितः ॥ १२ ॥
एकादश्यानिशान्तोय श्चातुर्मास्योपलक्षितः ।
कालन्तं वैष्णवंविद्धि नूत्तमंसर्वसिद्धिदम् ॥ १३ ॥
अमाभिरस्यकालस्य त्वन्तरायेण केनचित् ।
निर्वाहणीयोप्यपरः कालश्चान्द्रायणादिना ॥ १४ ॥
सम्पाद्यंचैवतन्मध्ये विधिवद्यागपूर्वकम् ।
दिनत्रयेतुपूर्वोक्ते पूर्णिमाद्युपलक्षिते ॥ १५ ॥
सोपवासैःक्रियापूर्वं कर्मप्रातिसरीमकम् ।
दशम्यामर्चनंकृत्वा हुत्वाग्निंचनिशामुखे ॥ १६ ॥
आनिमन्त्र्य च देवेशं धूपं दत्वा ऽर्घ्यपूर्वकम् ।
निजानन्दमये भोगे नित्यतृप्त स्त्वमव्ययः ॥ १७ ॥

तथापि भक्त्या तुष्टोऽहं त्वां यजाम्यात्मसिद्धये ।
निवेद्य मुखवासादीन् निरुक्त्वा दन्तधावनम् ॥ १८ ॥
संपूज्याथ सुगन्धैस्तु सितसूत्रसमुद्गनम् ।
शुभं प्रतिसरं त्वेकं तत्तुल्यानि बहूनि वा ॥ १९ ॥
कुंकुमाद्यै र्यथा योगं रंजयित्वा स्वशक्तितः ।
जाम्बूनदमयैः पुष्पै र्नानारत्नोपशोभितैः ॥ २० ॥
सनाळै र्भूषणीयश्च रम्यैर्वा रजतोत्थितैः ।
धूपिते भिनवे भाण्डे कृत्वाच्छाद्यास्तरेणतु ॥ २१ ॥
प्रणवेना र्चयित्वा तु संस्थाप्य पुरतो विभोः ।
देवागारं बहि र्धाम्ना मन्त्रिं [?] यागमन्दिरम् ॥ २२ ॥
संवेष्ट्य सितसूत्रेण चतुर्धा तद्गुणेन तु ।
ततोऽभ्यर्च्य समूहन्तु पंचकाळपरायणम् ॥ २३ ॥
षट्कर्मनिरतं चापि यतिबृन्दन्तु वैष्णवम् ।
समक्षं भवतां भक्त्या श्वः प्रभुं पूजयाम्यहम् ॥ २४ ॥
सन्निधान मतः कार्यं म्मदनुग्रहकाम्यया ।
स्नानाद्य मेकादश्यांवै सविशेषं समाचरेत् ॥ २५ ॥
हवनान्तं क्रियाकाण्डं जपस्तुतिपरस्ततः ।
आराध्यस्या ग्रतः स्थित्वा जागरेण नये न्निशाम् ॥ २६ ॥
पुन रभ्यर्च्य देवेशं प्रभाते विधिपूर्वकम् ।
भूषये द्भूषणेनैव त्वा मूर्ध्नः प्रणवेन तु ॥ २७ ॥
यथा रूपै श्च बहुभि र्मया द्रष्टाञ्जलिस्त्विदम् ।
नावलेपा न्न मोहाच्च कर्मत्यागो मया कृतः ॥ २८ ॥
त्वमेव सर्वं जानासि सर्वेश [मां] हृदये स्थितः ।
यथा शक्त्या त्वमिच्छात स्तथापि परमेश्वर ॥ २९ ॥
तन्निमित्त मिदं कर्म कृतं त्वत्प्रीतये मया ।
एव मुक्त्वा समभ्यर्च्य चतुरः पांचरात्रिकान् ॥ ३० ॥

भगवत्प्रतिपत्त्या तु शक्त्या प्रावरणैर्धनैः ।
यथा प्रतिसरान्तैस्तु ब्रह्मचारियतीन् गुरून् ॥ ३१ ॥
तर्पयित्वाथ चान्नेन पूतेन विविधेन तु ।
क्षान्त्वानुव्रज्य नैवेद्य पूर्वं कुर्याच्च भोजनम् ॥ ३२ ॥
अपरेह्नि सन्यासं मात्रेर ह्विधिपूर्वकम् ।
अपनीयतु माल्यार्दान् भद्या ह्वे दिने दिने ॥ ३३ ॥
नो याति म्लानतां याव च्चतुर्थे ऽह्निवा त्यजेत् ।
विशेषयागपूर्वन्तु कारिभ्यो वत्सरे स्वके ॥ ३४ ॥
एवं कृते सति तदा सिद्धि र्भवति शाश्वती ।
सर्वधाराधकानां तु चेतसो भीप्सितं तथा ॥ ३५ ॥

इति श्रीपांचरात्रे श्रीसात्वतसंहितायाम्

पवित्रारोपणविधि र्नाम

चतुर्दशः परिच्छेदः ॥ १४ ॥

अथ पंचदशः परिच्छेदः ।

भगवान् ।

तपोदानव्रतानांच विहितस्याह्निकस्यच ।
निःशेषयागभोगानां कृत्वासम्पूरणक्रियाम् ॥ १ ॥
अपरेह्निचैकुर्यां च्चतुर्थेसप्तमेतुवा ।
स्नपनम्पूज्यमन्त्रस्य तीर्थोद्देशेचसङ्गमे ॥ २ ॥
नद्यां समुद्रगामिन्यां देवखातेह्रदेतथा ।
प्रीतयेपरमेशस्य स्वात्मनोदुःखशान्तये ॥ ३ ॥

आह्लादायामराणांच पितॄणां तृप्तयेतुवै ।
आप्यायनार्थं भूतानां भुवनानांचभूतये ॥ ४ ॥
देशदोषप्रशान्त्यर्थं गोब्राह्मणहितायच ।
बहुशाखमभग्नाग्रं समूलंयदपुष्पितम् ॥ ५ ॥
प्राङ्मुखोदर्भमादाय प्रणवेनपुराक्षितः ।
ततस्तेनैवतन्मूलं प्राग्वत्कुर्यादधिष्ठितम् ॥ ६ ॥
तस्यमध्यमनाळंच त्र्यग्भूतमवतिष्ठते ।
आराध्यमन्त्रनाथेन स्मरेद्व्याप्यमहात्मना ॥ ७ ॥
विवर्तपारमात्मीय मध्यक्षंचापिविद्धितम् ।
अनेकगर्भमुख्यंच त्काण्डंकाण्डेषुचोत्तमम् ॥ ८ ॥
अणिमादिगुणैर्युक्तं पुंस्कत्वं तेनकल्प्यते ।
वाचकन्तस्ययोक्तव्यं हंसयुक्तन्द्विलक्षणम् ॥ ९ ॥
बहिःकाण्डचतुष्केण चित्तपूर्वचतुष्टयम् ।
कथ [ग्रन्थ] नीयमधोवक्त्र मव्यक्तान्तंस्वकैः पदैः ॥ १० ॥
प्रणवादिनमोऽ तैस्तु व्यापकंसूक्ष्मलक्षणम् ।
एवंश्रोत्रादिकान्पंच स्वनाम्नाग्रथ [न्थ] येत्तथा ॥ ११ ॥
कर्मेन्द्रियाणि तद्वत्तु ततस्तन्मात्रपंचकम् ।
पंचकन्त्वथभूतानां वध्यावेक्ष्मावसानिकम् ॥ १२ ॥
अवशिष्टैस्तु तत्काण्डे र्वर्ग्रीयात्त तद [स्कर] ण्डघत् ।
विनाशिखास्सदेन समुत्तानावधेरथ ॥ १३ ॥
किंचित्तदूर्ध्वदेशाच्च यथानोयातिवैपुनः ।
बहुधाकाण्डसंघस्तु कल्पितस्तत्वसंख्यया ॥ १४ ॥
विनिघ्नानां च काण्डानां भंगादेकतमस्यच ।
उत्पद्यते ऽन्यथात्वंच तस्मात्तद्रूपयेद्दृढम् ॥ १५ ॥
दर्भमञ्जरिजन्त्वेवं सम्बाद्यादौपवित्रकम् ।
अनुसन्धीयंतत्र मन्त्रव्यासं यथास्थितम् ॥ १६ ॥

पूजयित्वार्घ्यपुष्पाद्यै रलंकृत्यपठेदिदम् ।
त्वमेवतीर्थंभगवं स्त्वमेवायतनंपरम् ॥ १७ ॥
त्वय्येवाधिष्ठितंसर्व मितिजानामितत्त्वतः ।
तत्रापित्वत्प्रयादिष्टं क्रियाकाण्डं शुभप्रदम् ॥ १८ ॥
यत्तन्निर्वाह्यया स्यद्य त्वदनुग्रहकाम्यया ।
विज्ञाप्य एवं भगवान् मन्त्रमूर्तिः परावरः ॥ १९ ॥
तं पत्रपात्रगं कृत्वा ब्रह्मयानगतन्तु वा ।
वेदगेयध्वनीशंख शब्दमङ्गळपूर्वकम् ॥ २० ॥
नीत्वा तीर्थान्तिकं तत्र तीरदेशे निधाय च ।
पूर्वामुखं च तं यान मथादाय पवित्रकम् ॥ २१ ॥
वामहस्ते तले कुर्या त्क्ष्मामण्डळगतन्निव ।
निधृया न्मध्यभागाञ्च पाणिना दक्षिणेन तु ॥ २२ ॥
अवतीर्याम्भसो मध्ये निमज्जे त्सह तेन वै ।
सन्निधिं तत्र तत्काळं प्रकुर्वन्त्यचिरात्तु वै ॥ २३ ॥
निश्शेषाणि च तीर्थानि ळोकत्रयगतानि च ।
मन्त्रात्मा यत्र रक्षार्थं क्षण मास्ते जळाशये ॥ २४ ॥
तत्रायतनतीर्थानां सर्वेषां स्या त्समागतिः ।
किं पुन र्यत्र भगवान् मन्त्रमूर्ति रधोक्षजः ॥ २५ ॥
साधकाभ्यर्थित स्स्नाया त्सर्वानुग्रहया धिया ।
विद्वान्योनेन विधिना तीर्थं मासाद्य तत्त्ववित् ॥ २६ ॥
स्नापये द्बन्धुमित्रादीन् प्राप्नुवन्त्यचिरा च्च ते ।
तैर्थं फलमानायासा न्मन्त्रमूर्तेः प्रसादतः ॥ २७ ॥
किन्तु तत्रामवादित्र वर्जितस्तु भवे द्विधिः ।
इमं विद्धि महाबुद्धे विशेषं चात्र कर्मणि ॥ २८ ॥
सामान्य मविन्यासं य च्चिन्मयं रूप मैश्वरम् ।
विशेषसंज्ञासम्बन्धं जीवहंसं विभाव्यतान् ॥ २९ ॥

पवित्रकं तथाकारं स्मृत्वा स्नाप्य ततोम्भसा ।
एवं तेनैव चान्येषां बहूनां बहुभि स्तु वा ॥ ३० ॥
सम्पाद्य विष्टरैः स्नानं दूरस्थानां सदैव हि ।
सम्पन्ने स्नपने त्वेवं द्वितीये ऽह्नि महामते ॥ ३१ ॥
रथे कृत्वा चिते तं वै प्रपूज्य च यथाविधि ।
यात्राख्य मुत्सवं कुर्या दन्नदानपुरस्सरम् ॥ ३२ ॥
सनृत्तगेयवादित्रं जागरेण समन्वितम् ।
एकरात्रं द्विरात्रं वा त्रिरात्रं भक्तिपूर्वकम् ॥ ३३ ॥
सकृ त्संवत्सरस्यान्ते पुत्सवस्नपनादिकम् ।
कुर्या द्योमन्त्रनाथस्य स सिद्धिं लभते पराम् ॥ ३४ ॥

इति श्रीपाञ्चरात्रे श्रीसात्वतसंहितायाम्
पवित्रस्नानविधि नाम

पंचदशः परिच्छेदः ॥ १५ ॥

अथ षोडशः परिच्छेदः ।

नारदः ।

प्रभुर्मुनीश्वराभूय प्रोदितोवनमालिना ।
सर्वलोकहितार्थन्तु यत्तद्वक्ष्याम्यतःपरम् ॥ १ ॥

सङ्कर्षणः ।

देवसम्प्रतिपन्नाये क्रमेस्मिन्ब्राह्मणादयः ।
दीक्षणीयाःकथन्तेवा एतदिच्छामिवेदितुम् ॥ २ ॥

भगवान् ।

यथाक्रमेणोदितानां वर्णानांशृणुलांगलिन् ।
त्रिविधंदीक्षणोपायं संक्षेपात्सर्वसिद्धितम् ॥ ३ ॥
पूर्वोक्तलक्षणोज्ञात्वा कश्चिद्दृढतरःपुमान् ।
संसारभयभीतस्तु निर्वाणमभिवांछति ॥ ४ ॥
वैराग्यधी रचपल श्चिरकालंगुरोर्गृहे ।
संस्थितोदासभावेन खेदोद्वेग विवर्जितः ॥ ५ ॥
ज्ञात्वातस्यार्थितानून माहूयाग्रेनिवेश्यच ।
कृताकृतंच पृष्टव्य आस्मृतेस्तत्क्षणावधि ॥ ६ ॥
ज्ञात्वादोषबलंतस्य प्रायश्चित्तैर्यथोदितैः ।
कृच्छ्रातिकृच्छ्रपूर्वैस्तु शोधनीयं प्रयत्नतः ॥ ७ ॥
बहूमांपरिपीडाभा तत्सामर्थ्यांसुलांगलिन् ।
मनःप्रसादपर्यन्तं कालंवा द्वादशाह्निकम् ॥ ८ ॥
नियोक्तव्योमितेपुसे ऽ याचितेनक्तभोजने ।
स्तुतिसम्मार्जनस्नान पुष्पाद्याहरणोद्यमैः ॥ ९ ॥
आश्रमेषेष्वदानान्तु दिव्योष्वायतनेविभोः ।
अनिशम्भगवद्विम्ब स्थापीठाद्यवलोकने ॥ १० ॥
अभिजातसदुर्गन्धा गुग्गुलैर्मलिनीकृतः ।
साम्प्रतंभगवत्सेवया पवित्रीकृतमानसः ॥ ११ ॥
अहोरात्रोपितोभूत्वा नखकेशादि लुण्ठ [ञ्छि] तः ।
पंचगव्यतथापात्वं दर्भैस्सकुशोदकम् ॥ १२ ॥
मन्त्रैसद्योगुरुःपापी स्त्रमासर्यचतुश्शतम् ।
एवंदिनचतुष्कान्तु क्षपयेदेन तंसुधीः ॥ १३ ॥
प्रत्यहंचतुरोधारा नाप्रभातनिशागमम् ।
ब्रह्मतीर्थ चतुष्कंस त्वाष्टयापूर्वसम्पिबेत् ॥ १४ ॥
क्रमात्संप्रोदितैर्मन्त्रै स्समाचम्यान्तरान्तरा ।
अष्टममष्टानंकुर्या द्दत्तेक्षाराज्यभाजितम् ॥ १५ ॥

क्षपयेत्फलमूलैर्वा अहोरात्रचतुष्टयम् ।
इतिभक्त्याप्रपन्नानां मार्जावमपि दुष्कृतात् [निष्कृतिः] ॥ १६ ॥
कथितंविरतानांच देहशुद्धिकरम्परम् ।
ब्रह्मकूर्चसमेतन्तु प्रायश्चित्तं मयाद्यते ॥१७॥
ज्ञात्वामहत्त्वं दोषाणां त्रिविधानान्तुवैपुरा ।
सम्भवसतिहेमादि दानंसततमाचरेत् ॥ १८ ॥
पूर्वोक्ताद्विहितात्काला लघुदुष्कृतिनाक्रमात् ।
चतुर्थांशेन ह्रासस्तु ब्रह्मकूर्चं पिबेत्ततः ॥१९॥
कालेनवर्णोत्कर्षेण सहसामाम्यनुच्यते ।
प्रायश्चित्तंहिसर्वेषां सर्वकल्मषनाशनम् ॥२०॥
उत्तरोत्तरताम्बुध्वा प्रथमंदुष्कृतस्यच ।
क्षपयेत्तद्विजेन्द्रस्तु मासैर्द्वित्रिचतुर्गुणैः ॥ २१ ॥
नृपविट्शूद्रजातीय एकैकवर्धयेत्क्रमात् ।
मासमेकादिकात्कालात् स्वमारभ्ययथाक्रमम् ॥ २२ ॥
दुराचारोपिसर्वाशी कृतघ्नोनास्तिकः पुरा ।
समाश्रये दादिदेवं श्रद्धया शरणंयदि ॥ २३ ॥
निर्दोषं विद्धितंजन्तुं प्रभावात्परमात्मनः ।
किम्पुनर्योनुतापार्तं शासनेऽस्मिन्हिसंस्थितः ॥ २४ ॥
विरतो दुष्कृताच्चैव भक्तिच्छायां समाश्रितः ।
एवंसंशुद्धदोषाणां बहुजन्मार्जितस्यच ॥२५॥
कल्मषस्यविघातार्थं नास्तिहीं महामते ।
कृत्वावैतांमतं दीक्षां दद्याद्विमंत्रपूर्वकम् ॥ २६ ॥
आराधनंहि तस्यैव वैभवीयस्यवैविभोः ।
सबाह्याभ्यन्तरंचैव सम्यङ्मासचतुष्टयम् ॥२७॥
मासाष्टकं वत्सरंवा बुध्वा भाववलम्पुरा ।
ज्ञात्वाभ्याशयानांच प्रसादम्पारमेश्वरम् ॥ २८ ॥

विभवव्यूहसूक्ष्माख्यां दीक्षांकुर्यादनन्तरम् ।

संकर्षणः ।

परिज्ञेयोहिकैर्लिंगै स्साधकानामपक्षयात् ॥ २९ ॥

सम्यगाराधनान्मन्त्र प्रसादःकमळापते ।

भगवान् ।

चित्तप्रसादस्त्वतुल स्तेजोवृद्धिरतीवहि ॥ ३० ॥

धैर्यमुत्साहसन्तोषा वकार्पण्यादयोगुणाः ।
येषां तेषां हि बोद्धव्यं मन्त्रात्माभिमुख स्स्थितः ॥ ३१ ॥
प्रयुक्ति श्शान्तिकादीनां कर्मणा मचिरादपि ।
प्रयाति यदि साफल्यं विज्ञेयं तेन हेतुना ॥ ३२ ॥

सम्पन्नः पापदाहश्च प्रसन्नश्चापि मन्त्रराट् ।
ददाति धर्मकामार्था नाचिरा द्यदि योजितः ॥ ३३ ॥

अणिमाद्यष्टकं चापि विविधा योगसिद्धयः ।
आत्मसिद्धिसमेताश्च परितुष्टा स्तदा स्मृताः ॥ ३४ ॥
यस्मि न्वै वैभवे रूपे यस्याभिरमते मनः ।
तस्य कल्मषशान्त्यर्थं दीक्षां कुर्या च्च तेन वै ॥ ३५ ॥
तमाराध्यहिपूर्वोक्त काळं तमनुयोज्य च ।
योग्यतायाः परीक्षार्थ माशान्ते स्सर्ववस्तुषु ॥ ३६ ॥
नारसिंह्मेन वान्येन मन्त्रेणा भिमतेन च ।
दीक्षया ऽऽराधनेनैव होमजापव्रतादिना ॥ ३७ ॥
कर्मणा केवळेनैव शान्तिकाद्युच्छ्रितेन च ।
विनाणिमादिसिद्धिभ्यो बुध्वा पापं क्षयं गतम् ॥ ३८ ॥
भावये तेन काळेन ततः पद्मदळेक्षण ।
सिद्धीनां वैभवीयानां षाड्गुण्यमहिमाप्तये ॥ ३९ ॥

निश्श्रेयस विभूत्यर्थं ग्राह्यं दीक्षात्रयं वरम् ।
अभ्यर्थिता त्सुप्रसन्ना त्प्रतिपन्नाच्च देशिकात ॥ ४० ॥
सानुकम्पेन वा तेन नि [स्व] यमप्रार्थितेन च ।
कार्यं संशुद्धपापानां भीतानां शरणैषिणाम् ॥ ४१ ॥
संस्कृतानां हि युक्ताना मघक्षाळनकर्मणि ॥ ४१ ॥

इति श्रीपांचरात्रे श्रीसात्वतसंहितायाम्
अघशान्तिकल्पो नाम

षोडशः परिच्छेदः ॥१६॥

अथ सप्तदशः परिच्छेदः ।

नारदः ।

अथ संचोदितो भूय श्श्रीपति र्मुनिसत्तमाः ।
हितार्थं भवभीतानां विभुनाक्षीरपाणिना ॥ १ ॥

संकर्षणः ।

भगवन् विधिना केन प्रसाद मधिगच्छति ।
नृणा माराधकानां तु विश्वत्राता नृकेसरी ॥ २ ॥
श्रुत्वैव प्राह भगवा न्शृणुष्व गदतो मम ।
सिद्धिमोक्षप्रदं मन्त्रं वैभवं मूर्तिमोहजित् ॥ ३ ॥
कामरूपधरं नित्यं नृसिंहस्य महात्मनः ।
वर्णचक्रन्तुपूर्वोक्त संगुप्तं [क्त लक्षणं] वसुधातळे ॥ ४ ॥
उपाकिसेत्तु संलिख्य पूजयित्वा यथाविधि ।
समुद्धरे त्ततो मन्त्र मनेकाद्भुतविग्रह [क्रम]म् ॥ ५ ॥

प्रणवं पूर्व मादाय तदन्ते विनियोज्य च ।
नवमं नाभिवर्णेभ्य स्तदूर्ध्वं ऽप्यष्टुतुर्दशम् ॥ ६ ॥
तस्योपरि तदन्तस्स्थं वर्णं गोळकवन्नयसेत् ।
नमोन्तं वर्णमेतद्धि वाचकं परमात्मनः ॥ ७ ॥
ज्ञानादयो गुणा ष्षड्वै प्रागुक्ता हृदयादयः ।
तदर्थमेव वर्णं तं षोढा संलिख्य केवलम् ॥ ८ ॥
द्वितीयतुर्यषष्ठैश्च द्वादशेनान्तिमेन च ।
चतुर्दशेनाराद्वर्गा त्क्रमाद्वै विनियोजयेत् [हन्तिवै शयेत् (?)]॥९॥
बीजवच्छिरसा सर्वान् लांछये त्पंचमं विना ।
स्सर्वेषां प्रणवः पूर्वं स्स्वसंज्ञां ते नियुज्य च ॥ १० ॥
स्वकीयजातय श्चान्ते वषडन्ताः क्रमेणतु ।
ॐ नमो भगवते ना रसिंहायेत्यनेन तु ॥ ११ ॥
द्वादशाक्षरमन्त्रेण स्मृत्वा विग्रहवत्पुरा ।
सबाह्याभ्यन्तरस्थेन सांगेना द्येन पूजयेत् ॥ १२ ॥
अथ लब्धाधिकारस्तु मन्त्रेणा नेन दीक्षितः ।
भक्तिश्रद्धापरो नित्यं मतिमांश्छिन्नसंशयः ॥ १३ ॥
गुर्वाज्ञानिरतो नित्यं तर्कवाग्जालवर्जितः ।
स्वकर्मनिरतो नित्यं [धर्मनिरतो] वानप्रस्थो ऽथवा गृही ॥१४॥
मन्त्र माराधये द्येन विधिना तं निशामय ।
उपार्ज्य भोगा नखिला न्न्याय्यो पायेन वै पुरा ॥ १५ ॥
स्नातो बद्धकचो मौनी शुद्धवासो ऽर्घ्यपुष्पभृत् ।
कृत्वा द्वार्स्थार्चनाद्यन्तु उपविश्यासने ततः ॥ १६ ॥
सायामां भूतसंशुद्धिं धारणाभ्यां समाचरेत् ।
केवलेन तु मन्त्रेण भावनासहितेन तु ॥ १७ ॥
नाभिदेशस्थितं ध्यात्वा देवं संगृह्य कल्मषम् ।
निस्सृतं वायुमार्गेण द्वादशान्ता बधो क्षिपेत् ॥ १८ ॥

निरस्तपाप माकृष्य वात[शंख]चक्रसमन्वितम् ।
नासाग्रेण तु मन्त्रेशं देहसम्पूरणाय च ॥ १९ ॥
तं ध्याये द्धृदयस्थं च गतिरुद्धेन वायुना ।
चित्तोपशमनार्थन्तु नूनं वायुजयाय च ॥ २० ॥
शनै श्शनै रथ बहिः केवल म्मारुतं क्षिपेत ।
विनान्यरेचकेनैव मन्येषा मुत्तरोत्तरम् ॥ २१ ॥
कालाद्ध्रासं यथाशक्ति नित्यमेव समाचरेत ।
द्वादशान्तेथ मन्त्रेशं तप्तहाटकसन्निभम् ॥ २२ ॥
सहस्ररविसंकाशं वृत्तमण्डलमध्यगम् ।
स्मृत्वाथ मुक्त स्तन्मात्रे र्निर्दहे द्विग्रहं स्वकम् ॥ २३ ॥
दक्षिणांघ्रे रथांगुष्ठ प्रान्तदेशे शिखाक्षरम् ।
ध्यात्वा युगान्तहुतभु ग्रूपज्वाला समा[शता]वृतम् ॥ २४ ॥
तेन स्वविग्रहं ध्याये त्प्रज्वलन्तं समन्ततः ।
देहजां भावये ज्ज्वाला म्मन्त्रनाथे लयं गताम् ॥ २५ ॥
तत स्समन्त्रं तद्बिम्ब माकृष्य हृदि विन्यसेत् ।
अथ हस्तद्वये न्यस्ये द्वादिमद्वादक्षरम् ॥ २६ ॥
दिव्यं प्रशातांगार [न्तरागं]न्तु तमधिष्ठाय चेतसा ।
स्वमन्त्रा दमृतौघेना सेचये द्विग्रहं स्वकम् ॥ २७ ॥
मणिबन्धा न्नखाग्रन्तु मूलमन्त्रपुरस्सरम् ।
हृदादयो ऽस्त्रपर्यन्ता अंगुष्ठाद्यंगुलीषु च ॥ २८ ॥
सर्वासु युग्मयोगेन नेत्रं नखमुखाश्रितम् ।
आमूर्ध्नेश्चरणान्तन्तु द्वादशार्णं न्यसे त्तनौ ॥ २९ ॥
जीवभूतं तदन्तस्स्थं मूलमन्त्रं तथा न्यसेत् ।
हृदाद्यं नेत्रपर्यन्त मंगषट्कं स्वगोचरे ॥ ३० ॥
स्वस्वांगुलियुगेनैव तेजोरूपं विना कृते ।
श्रीवत्सं वक्षसो वामे पूर्णेन्दुसदृशद्युतिम् ॥ ३१ ॥

कौस्तुभं हृदये न्यस्ये च्चण्डदीधितिळक्षणम् ।
नानाऽऽजवनपुष्पोत्थां वनमाळां च कण्ठतः ॥ ३२ ॥
पद्मं दक्षिणपाणौतु शंखं वामकरे न्यसेत् ।
गदां पद्मकरे भूयश्शंखपाणौतु चक्रराट् ॥ ३३ ॥
खड्गं दक्षिणहस्तेथ धनु र्वामकरे न्यसेत् ।
आचांसा दक्षिणे भागे न्यस्या श्री रुत्तरे तथा ॥ ३४ ॥
पुष्टिं गुल्फावसानं च वक्त्रमध्ये सरस्वती ।
पृष्ठतो विन्यसे त्रिद्रां ततः पाणिद्वयेनतु ॥ ३५ ॥
मुद्रां बध्वा स्मरे द्ध्यानं देवोहमिति भावयेत् ।
अथ प्रणवपूर्वेण स्वनाम्ना नतिना सह ॥ ३६ ॥
शेषपूर्वन्तु वह्न्यंत मासनं परिकल्पयेत् ।
[शेषन्तु पूर्ववन्न्यस्यासनं च परिकल्पयेत् ।]
तदाक्रम्याथ तस्यैव कार्या स्वहृदि कल्पना ॥ ३७ ॥
ब्रह्मस्वरूप ममलं स्वचैतन्यं तदूर्ध्वतः ।
विकल्पोपरतं कृत्वा इच्छयातु विवर्तते ॥ ३८ ॥
परध्वनिस्वरूपेण तत्प्रकाशात्मना पुनः ।
व्यक्तिभावेन तत्रापि एवं प्रविलये सति ॥ ३९ ॥
विसर्जनन्तु बोद्धव्यं संपन्नेतु क्रिया क्रमे ।
क्रम एष क्रमोक्तानां मन्त्राणा मवतारणे ॥ ४० ॥
लांछनादिक्रियाध्यान मेषां चैवहि कल्पना ।
ज्ञातव्याराधकेनैव नित्यं कर्मणि कर्मणि ॥ ४१ ॥
मन्त्रन्यास मतः कुर्या द्धस्तन्यासं विना विभोः ।
ध्यात्वाथ भावनाजातै र्भोगैः परमपावनैः ॥ ४२ ॥
पूजयित्वा जपान्तं चा प्यवतार्य बहि र्यजेत् ।
दक्षिणोत्तरहस्ताभ्यां हृद्बीजेन विचिन्त्यच ॥ ४३ ॥

सूर्यसोमौततःकुर्या द्रव्यदाहसमुद्भवौ ।
तोयमादायपात्रेथ तत्रहन्मन्त्रितं क्षिपेत् ॥४४॥
पुष्पगन्धसमोपेतं सुसितं शालितण्डुलम् ।
मन्त्रयेत्प्रणवाद्येन बहुशोहृदयेनतु ॥ ४५ ॥
तदुद्धृते नाभसावा अस्त्रमन्त्रं समुच्चरन् ।
प्रोक्षयेत्स्वासनस्थानं यागोपकरणन्तथा ॥ ४६ ॥
चित्रस्थाद्भगवद्बिम्बा द्भुक्तपुष्पादिकंहियत् ।
अपनीयतुतत्कुर्या द्गात्रसारेणुमार्जनम् ॥ ४७ ॥
धातुद्रव्यमयेकुर्या त्क्षाळनंगन्धवारिणा ।
उपलिप्याथभूभागं सांभसागोमयेनतु ॥ ४८ ॥
तत्रमण्डलमालेख्यं सूत्रयित्वापुरासमम् ।
चतुरश्रंचतुर्द्वारं मार्गपीठाब्जभूषितम् ॥ ४९ ॥
त्रिनाभिनेमि षडरं चक्रन्तुकमलाद्बहिः ।
मध्यैस्सितादिकैरागैः पुष्पैर्वा तैश्चतैश्शुभैः ॥ ५० ॥
चन्दनाद्यैस्सुगन्धैस्तु सर्षपैस्तिलतण्डुलैः ।
सर्वौषधिमयेनैव चूर्णेनपरिपूर्यवा ॥ ५ ॥
पुष्पैरथार्घ्यपात्रन्तु मन्त्रैस्सम्पूज्यनिष्कळैः ।
पात्रेपरस्मिस्तस्माद्धि स्तोकमुद्धृत्यचोदकम् ॥५२ ॥
योगपीठार्चनंकुर्या दनुसन्धानपूर्वकम् ।
स्वनाम्नाप्रणवाद्येन नमोऽन्तेनयथाक्रमम् ॥ ५६ ॥
अनन्तेशंस्मरेन्मध्ये सर्वाधारमयंप्रभुम् ।
आग्नेयादौतुधर्माद्य मैशान्यन्तश्चतुष्टयम् ॥ ५४ ॥
प्रागादावप्यधर्माद्य मुत्तरान्तं न्यसेत्परम् ।
तदूर्ध्वंकमलंध्याये त्स्वनाम्नाथदयोपरि ॥ ५५ ॥
स्मरेत्पत्राश्रितंसूर्यं शशांकंकेसराचनौ ।
कर्णिकास्थंहुतभुजं ततोगन्धादिनायजेत् ॥ ५६ ॥

गणेशाद्यर्चनंकृत्वा प्रथमंगुरुसन्ततेः ।
प्राप्तानुज्ञोथकलश मादायशुभलक्षणम् ॥ ५७ ॥
तमम्भसाव्रजप्तेन सम्पूर्यादौतुनिक्षिपेत् ।
तद्गर्भे काञ्चनंरत्नं बीजान्योषधिसत्फलम् ॥ ५८ ॥
चूतादिविटपोद्भूतां सपत्रां पुष्प[फल] मञ्जरीम् ।
कौशेयवस्त्रसत्कण्ठं कृत्वार्चितचन्दनम् ॥ ५९ ॥
तन्मध्येपूजयेन्मन्त्रं सांगसावरणंक्रमात् ।
प्राग्दिङ्मण्डलबाह्येथ दत्वावैपुष्पचक्रिकां [पत्रपुष्पिकां] ॥ ६०॥
पीठमन्त्रोपजप्तांच तदूर्ध्वेस्थापयेच्छतम् ।
अथावतार्यां हृदया न्मन्त्रोविमलदीधितिः ॥ ६१ ॥
कर्मणामनसावाचा सिद्धिमार्गेणसाधकैः ।
अनुष्ठितस्वरूपंच सूर्यबिम्बमिवांभसि ॥ ६२ ॥
कर्मणाप्रेरयेच्चैव वाचातम्मन्त्रमुच्चरेत् ।
आगच्छपदसंयुक्तं संस्मरेन्मनसाकृतिम् ॥ ६३ ॥
एवमाहूयवैदद्या दर्घ्यपाद्यचभक्तितः ।
आमूलात्सर्वमन्त्राणां व्यक्तिस्थानांसमर्चनम् ॥ ६४ ॥
अर्घ्यपुष्पादिनाकुर्या त्स्वेनस्वेनस्वकेपदे ।
तदोदितं विभोर्देहा द्धृदयाद्यंचतुष्टयम् ॥ ६५ ॥
न्यसे त्कमलपत्राणा मापूर्वा दुत्तरान्तिकम् ।
अग्नीशरक्षो वाय्वादिदळे न्यस्त्रं यथाक्रमम् ॥ ६६ ॥
नेत्रं केसरजाळस्थं चक्रं नाभित्रयोपरि ।
श्रीवत्सकौस्तुभौ चैव वनमाळां तथैव च ॥ ६७ ॥
उदक्पश्चिमभागस्थे चार्क्राये त्वपर (त्वपरा) त्रये ।
कमलं निशिताग्रं च नन्दकं विन्यसे त्क्रमात् ॥ ६८ ॥
प्राग्भागदक्षिणस्थाभ्यां त्रितयं चाथ विन्यसेत् ।
कार्मुकं हेतिराट्छंख ततो देवस्य दक्षिणे ॥ ६९ ॥

नेमिभागे श्रियन्देवीं पुष्टिमुत्तरतोन्यसेत ।
पृष्ठदेशे स्थितां निद्रा मग्रभागेसरस्वतीं ॥ ७० ॥
वामदक्षिणभागाभ्यां विधिस्थ मिषुधिद्वयम् ।
द्वारेष्वस्त्रं न्यसेद्भूयो मुद्रांकोणचतुष्टये ॥ ७१ ॥
सायुधा नथ दिक्पाळान् स्वस्थाने मण्डलाद्बहिः ।
एवं न्यस्यततोध्याये न्मन्त्रव्यूहं यथास्थितम् ॥ ७२ ॥
सर्वदेवमयन्देवं सर्वेषां तेजसांनिधिम् ।
सर्वलक्षणसम्पूर्णं सार्वज्ञ्यादिगुणैर्युतम् ॥ ७३ ॥
निष्टप्तकनकाभंच सम्पूर्णांगं महातनुम् ।
घोरशार्दूलवदनं चण्डमार्ताण्डलोचनम् ॥ ७४ ॥
सौदामिनीचयप्रख्यै र्लोमभिःपरिपूरितम् ।
अरुणाम्भोजपत्राभं वज्राधिककरेरुहं ॥ ७५ ॥
चलत्फणीश्वरसटं चन्द्रकोटिशतद्युतिं ।
वमन्तमान्तरंवह्नि खरंध्रे [मन्त्रे] मांरुतानुगैः ॥ ७६ ॥
प्रळयाम्बुदनिर्घोष मुद्गिरन्तं स्ववाचकम् ।
युगान्तहुतभुग्ज्वाळा मण्डालान्त र्व्यवस्थितम् ॥ ७७ ॥
षडक्षंचाप्यष्टबाहुं[षडक्षभृच्चाष्टभुजं]व्याप्यलोकान्स्थितंप्रभुम् ।
दिव्यगन्धानुलिप्तांगं दिव्याम्बरधरंतथा ॥ ७८ ॥
दिव्यस्रग्वेष्टनोपेतं दिव्यालंकारमण्डितम् ।
कौस्तुभेनोरसिस्थेन श्रीवत्सेनाप्यलंकृतम् ॥ ७९ ॥
रत्नकांचनसंयुक्ता युक्तयावनमालया ।
सब्रह्मसूत्रपाचैव शोभितं परमेश्वरम् ॥ ८० ॥
भुजान्यस्त्रवरैर्दीप्तैः कमलाद्यैर्युतानिच ।
क्षीरसागरवच्छुभ्रं ततःपद्मन्तुदक्षिणे ॥ ८१ ॥
प्रणवध्वनिगर्भन्तु हिमाद्रिशतशोऽधिकम् ।
वामेशंखवरंध्याये द्गदाखड्गौ ज्वलत्प्रभौ ॥ ८२ ॥
दक्षिणेपाणियुग्मेथ चक्रंकालानलद्युतिम् ।
सधनुर्वामहस्ताभ्यां ततःपाणिद्वयेनतु ॥ ८३ ॥
अविद्यादळनीम्मुद्रां क [कु] र्माख्यां संस्मरेत्प्रभोः ।
एवमेषहि हृन्मन्त्रं ध्यायेत्कुमुदपाण्डरम् ॥ ८४ ॥
पद्मरागाचलाकार मारक्तं च शिर स्स्मरेत् ।

अंजनाश्मप्रतीकाशं शिखामन्त्रं तथाकृतिम् ॥ ८५ ॥
परित स्सूर्यसन्तप्तो यथा कनकपर्वतः ।
तथा कवचमन्त्रं च ध्यानकाले विचिन्त्य च ॥ ८६ ॥
वृतोज्वालासहस्रै स्तु भयस्कान्तसमद्युतिः ।
सर्वास्त्रशक्तिसंपूर्ण श्चास्त्रमन्त्रः प्रकीर्तितः ॥ ८७ ॥
निर्धूमांगारशिखर सदृशो नेत्रमन्त्रराट् ।
ध्येया स्स्वरुचिसंयुक्ता द्विभुजाः पुरुषोत्तमाः ॥ ८८ ॥
साश्राः कौस्तुभपूर्वा ये गदामालेऽगनाकृती ।
फुल्लपद्मोदराभा श्री र्नळिनीनाळसंयुता ॥ ८९ ॥
चन्द्ररश्मिप्रतीकाशा श्वेतचामरधारिणी ।
पूर्णेन्दुसदृशी पुष्टि रुद्वहन्ती च पाणिना ॥ ९० ॥
सम्पूर्ण ममृतेनैव कळशं कांचनोत्थितम् ।
विज्ञानपुस्तककरा स्फटिकाभा सरस्वती ॥ ९१ ॥
फुल्लेन्दीवरसंकाशा त्वक्षसूत्रकरांकिता ।
ध्येया भगवती निद्रा सर्वा श्चामरलांछिताः ॥ ९२ ॥
सम्मुखा देव देवस्य वस्त्रालंकारमण्डिताः ।
एवं ध्यात्वा ततः कुर्या त्पूजनं कुसुमादिकैः ॥ ९३ ॥
स्नाने विळेपने वस्त्रे माल्ये धूपे श्च दीपकैः ।
दध्ना च मधुमिश्रेण क्षीरेणाज्यान्वितेन च ॥ ९४ ॥
हृद्यै मृष्टै स्स्थिरै र्मध्यै र्नैवेद्यै र्विविधै श्शुभैः ।
यथा कालोद्भवै स्सर्वैः फलमूलै स्तु षड्रसैः ॥ ९५ ॥
पूजितै र्मुक्तदोषै स्तु मुद्रामात्रोपलक्षितैः ।
मूर्तै र्ध्यानै स्तथा स्विष्टै र्बीजैर्हां [हें] मादिना ऽथवा ॥ ९६ ॥
तत स्स्वहस्तौ संस्कृत्य भ्रमणा लंभनादिना ।
बध्वा प्रदर्शये न्मुद्रां त्रिशिखां सम्मुखे विभोः ॥ ९७ ॥
ध्यात्वा त्रेताग्निरूपन्तु दक्षिणा दंगुलित्रयम् ।
स्पष्ट मूर्ध्वशिखं चैव ज्येष्ठा त्क्रान्ता कनीयसी ॥ ९८ ॥
अथोखिलस्वरूप श्च ध्वान्तातीतो ऽग्निरूपधृत ।
देवो गुणत्रयातीत स्तथा मार्गत्रयातिगः ॥ ९९ ॥
धर्मै स्स्थूलतरै र्मुक्तो योयं व्यक्तो धियार्चितः ।
सम्पुटं हृदयोद्देशे वध्वा हस्तद्वयेन तु ॥ १०० ॥

निरन्तराभ्यां शाखाभ्यां मुद्रेषा हार्दिकी स्मृता ।
अंगुष्ठादि कनिष्ठान्तं शाखायुग्मं पृथक्पृथक् ॥ १॥
सान्तरं सम्पुटा द्यस्मात्कनिष्ठादौ तथा भवेत् ।
शिर शिखा तनुत्राख नेत्रमुद्रा यथाक्रमम् ॥ २ ॥
अस्या अंगुष्ठयुग्मन्तु मुद्रायां करमध्यगम् ।
प्रदेशिन्या ततो विद्धि कनिष्ठान्तं श्रियादिषु ॥ ३ ॥
स्वमन्त्रयुक्ता चान्येषा मर्चितानां यथाक्रमम् ।
पुनः पुनः प्रयोक्तव्या हार्दयं शिरसा सह ॥ ४ ॥
परस्परमुखोश्लिष्टौ शाखाक्रान्तौ परस्परम् ।
किन्तुवेदक्षिणंहस्त मूर्ध्वंचाप्यधरेपरम् ॥ ५ ॥
अविद्यादळनीह्येषा मुद्रापूर्वमुदाहृता ।
एवंमुद्राचयंकृत्वा पूजांकृत्वा पुनःप्रभोः ॥ ६ ॥
यथाशक्तिजपंकुर्या च्छतमष्टाधिकन्तुवै ।
एकैकंहृदयादीनां सर्वेषां विहितंत्वथ ॥ ७ ॥
क्रियांगत्वान्नदोषोऽस्ति अन्यथा तज्जपंविना ।
तमर्चयित्वाष्टांगेन प्रणम्यपरमेश्वरम् ॥ ८ ॥
स्मृत्वानुज्ञांसमादाय यजेद्वह्निगतंततः ।
कुण्डंसुलक्षणंकृत्वा संस्कारै स्संस्कृतंपुरा ॥ ९ ॥
पूजयित्वाऽर्घ्यं पुष्पाद्यै स्तत्राग्नि मवतार्यच ।
सुसमिद्धंच निर्धूमं संशुद्धं ताडनादिना ॥ ११० ॥
अर्घ्यैर्निरंबुकुसुमैः पूजयित्वाच भावयेत् ।
व्यस्तोगुणगणस्वद्य स्तेजोनाम गुणोह्ययः ॥ १ ॥
परस्यब्रह्मणस्सोयं सामान्यंसर्वतेजसा ।
ध्यात्वैवं नेत्रमन्त्रेण निक्षिपे त्कुण्डमध्यतः ॥ २ ॥
पावनैरिन्धनैश्शुष्कैः कृत्वानिर्धूममेवतम् ।
समिद्भिरर्चयित्वाथ तन्मध्येमन्त्रमण्डलम् ॥ ३ ॥
ध्यात्वाऽभ्यर्च्य यथापूर्वं सन्तर्प्य सघृतैस्तिलैः ।
परिवारयुतन्देवं सहस्रशतसंख्यया ॥ ४॥
दद्यात्पूर्णाहुतिंसम्य ग्घोमसंख्यांनिवेद्यच ।
ततश्शुचीन् सोपवासान् शोधितान् बद्धलोचनान् ॥ ५ ॥

भक्तान्प्रवेशये तत्र गृहीतकुसुमांस्तुवै ।
प्रक्षेपयेन्मण्डलान्त नैत्रबन्धं विमुच्यच ॥ ६ ॥
अष्टाङ्गप्रणिपातैस्तु प्रदक्षिणयुतैस्ततः ।
देवश्चाग्नि र्गुरुःकुम्भः पूजनीयःपुनःपुनः ॥ ७ ॥
तत्कालं भक्तिभावेन विज्ञातायोग्यतायथा ।
तीव्रमन्दादिकां तेषां तदादीक्षां समाचरेत् ॥ ८ ॥
जुहुयाद्व्यक्तसंशुद्धौ शतमष्टाधिकन्तुवै ।
तिळानान्सद्वदाज्यस्य द्वादशार्णेन बुद्धिमान् ॥ ९ ॥
दद्यात्पूर्णाहुतिंपश्चा न्मन्त्रमर्घ्यादिनार्च्येच ।
ततश्चांगसमूहेन प्रागुक्त पारि [दळ] संख्यया ॥ १२० ॥
कुर्यादव्यक्तशुद्ध्यर्थं दद्यात्पूर्णाहुतिंततः ।
स्वरूपापादनार्थन्तु मूळबीजेनवैतथा ॥ १ ॥
प्रणवादिनमोन्तेन कुर्या द्धोम मतन्द्रितः ।
ध्यात्वानिरस्तबन्धन्तं शुद्धंशान्ततु सर्वगं ॥ २ ॥
समस्तसंवित्पूर्णंच दद्यात्पूर्णाहुतिंततः ।
मूळमन्त्रेणमन्त्रज्ञो भक्तानामनुकम्पया ॥ ३ ॥
समयांश्रावयेत्पश्चा त्कुम्भे ऽग्नौ मण्डलेततः ।
भक्त्यानयातुसम्मास मैहिकामुष्मिकंत्वया ॥ ४ ॥
नास्याः कुर्याः परित्यागं कर्मणा मनसा गिरा ।
साध्यं विना न कुर्या स्तु स्नानादीनां च लोपनम् ॥ ५ ॥
याव जीवं यथाशक्ति संस्थितो यत्र कुत्र चित् ।
स्थानेषु हृदयाद्येषु कुर्या न्मन्त्रगणार्चनम् ॥ ६ ॥
द्रव्यैः पुष्पाम्बुपूर्वै स्तु तदभावे तु वै हृदि ।
मानसीं पूर्वव त्पूजां निर्वपेन्न्यासपूर्विकाम् ॥ ७ ॥
मन्त्रनाथं गुरु म्मन्त्रं समत्वेनाभिवीक्षयेत् ।
मन्त्रमण्डकमुद्राणां परां शुद्धिं समाचरेत् ॥ ८ ॥
दूरादेव नमस्कार्यो मृगराडुत्व्याघ्र एव वा ।
तदाकृतिर्मृगो ऽन्यो वा तच्चर्मकापि नारुहेत् ॥ ९ ॥
नचाक्रमेत पादेन नच तत्पावके क्षिपेत् ।
पद्मपत्रे स्तथाश्वत्थपर्णे र्भोजनभाजनम् ॥ १३० ॥

वर्जनीयं तथा शंख पद्माद्यंकित मासनम् ।
नक्तं वा परपिण्डं [परिपीडं] वा ह्येकादश्यां समाचरेत ॥ १ ॥
विशेषपूजनं कुर्या द्वादशी ष्वखिलासु च ।
अयनादिषु चान्येषु सूर्यसंक्रमणेषु च ॥ २ ॥
न भूतमहदुष्टानां व्याधीनां वा कदाचन ।
आसिद्धेन स्वमन्त्रेण कुर्यां दुत्सा रणं [दनं] तु वै ॥ ३ ॥
मन्त्रजं सिद्धिलिंगं य त्स्वप्ने प्रत्यक्षतोपि वा ।
अनुभूतं न वक्तव्यं कस्यचि द्गुरुणा विना ॥ ४ ॥
व्यक्तं नृसिंहबीजन्तु दृश्यते यत्र कुत्र चित् ।
नमस्कुर्या त्समभ्यर्च्य वाक्पुष्पै स्सप्रदक्षिणैः ॥ ५ ॥
कृत्वाश्रुपातं शोकं वा विप्रयोगनिमित्ततः ।
स्नानादृते न कुर्या द्वै देवाग्निपितृतर्पणम् ॥ ६ ॥
ज्ञानाभिवर्धना त्काला दन्यत्र सति संकरे ।
सूतकाद्ये न कर्तव्यं प्रागुक्तं चैव यत्नतः ॥ ७ ॥
स्वानुष्ठानं हि वै यस्मा दागमा त्समुपागतम् ।
तस्य सम्पूजनं यत्ना द्गोपनं च समाचरेत ॥ ८ ॥
ब्राह्मणादी न्यथाशक्ति दीनानाथां श्च पालयेत् ।
एवं हि समया न्दद्या द्भक्तानां भावितात्मनाम् ॥ ९ ॥
सम्पालनाच्च येषां वै प्राप्नुया न्मन्त्रजं फलम् ।
इष्ट्वैवंहि ततः कुर्या त्सेचनं कलशेन तु ॥ १४० ॥
आत्मन श्चानुभक्तानां नैवेद्यं प्रार्थये ततः ।
ब्राह्मणाय च तद्द्यात् हृद्यं मेध्यं च शोभनम् ॥ १ ॥
क्षमापये ततो देवं यत्र यत्रावतारितम् ।
अथ शिष्टे स्तु नैवेद्यै यंजे द्गणपार्ति प्रभुम् ॥ २ ॥
विष्वक्सेनाभिधानंचा प्यर्घाद्यै रर्चितोहि यः ।
चरुरूपेण चान्नेन सोदकेन हृदा ततः ॥ ३ ॥

वहिराराधनस्थाना त्प्रादक्षिण्येन निक्षिपेत् ।
पूर्वादीशानपर्यंतं मन्त्री भूतबलिंतदा ॥ ४ ॥
ततो विसर्जनंकुर्या दुपसंहृत्यचाखिलम् ।
विनिक्षिप्याम्भसोमध्ये पत्रपुष्पादिनिक्षिपेत् ॥ ५ ॥
निष्कामः पावनार्थन्तु स्तोकमुद्धृत्यवैपुरा ।
सन्धायमन्त्रपूर्वंमा क्रमश्नीयात्समोनवान् ॥ ६ ॥
भोजनान्तेततःकुर्या त्संमार्ष्टुनिशामुखे ।
मंत्रजापं ततोध्यानं तोयतर्पण पूर्वकम् ॥ ७ ॥
तथैवं रात्रिशेषन्तु कालं सूर्योदयावधि ।
कर्तव्यं सजपं ध्यानं नित्य माराधकेनतु ॥ ८ ॥
एवमेव विधानेन पूजयित्वा दिनेदिने ।
जपे लक्षाष्टकं मंत्री ततस्सिद्ध्यति मंत्रराट् ॥ ९ ॥
ददातिमनसो ऽ भीष्टा स्सिद्धीस्सर्वास्तु रूपकाः ।
रुद्रादिरयेंद्र ऋषिभ्यो भक्तेभ्यश्चमयोदितं ॥ १५० ॥
लोकचित्तानुसारेण शास्त्रंवै युगभेदतः ।
यागोयागोपकरणं विमलं प्रतिमादिकम् ॥ १ ॥
ज्ञातव्यं तत्वयासम्य गविरोधेन सर्वदा ।
आगमेभ्यो ऽ थतज्ज्ञेभ्य स्सकाशा दात्मसिद्धये ॥ २ ॥
यथोक्त मिहसंक्षेपा द्वदेदन्यत्र विस्तरात् ।
अथसंसाधितम्मन्त्रं ब्रह्मचर्यादिसंयमैः ॥ ३ ॥
पयोयावक शाकाद्य घृतमूलफलाशनैः ।
मन्त्रीयथाप्रयुंजीया च्छान्तिकादिषुतच्छृणु ॥ ४ ॥
ज्ञात्वादौ स्वशरीरोत्थै र्लौकिकै रपिलक्षणैः ।
प्रामेन स्वप्नयोगेन संस्थितिं जीवितस्यच ॥ ५ ॥
ततश्शल्यादि निर्मुक्तं स्थानमासाद्यशोभनं ।
संच्छन्नं शरजालेन साम्बरेणाथवागृहम् ॥ ६ ॥

तत्रमण्डलमालिख्य सर्वोपकरणान्वितम् ।
चन्दनक्षोदयुक्तेन शशिनासहितेनच ॥ ७ ॥
सुगन्धशालिचूर्णेन प्रागुदीरितलक्षणम् ।
निर्वृणं लक्षणाढ्यञ्च परिसंगालिताम्भसा ॥ ८ ॥
हेमरत्नौषधीवृक्ष शाखादूर्वाफलोदरम् ।
धूपिताहतयुग्मेन वाससापरिवेष्टितम् ॥ ९ ॥
सुसमाधारसंस्थंच बाह्यतोमण्डलस्यच ।
विन्यसेत्समसूत्रेण दिग्विदि कमलाष्टकम् ॥ १६० ॥
सुधाचन्दन लिप्तांग लाजतंडुलपूरितम् ।
श्वेतपट्टगलोपेतं सितपुष्पस्रगन्वितम् ॥ १ ॥
मुक्ताफलोदरं चैव बीजमल्लक (बीजामलक) भूषितम् ।
उपकुम्भाष्टकं त्वेवं कुम्भाना मुपरि न्यसेत् ॥ २ ॥
श्वेतचामरसंयुक्तं सित मूर्ध्ववितानकम् ।
बध्वा सितेन सूत्रेण समधा कलशाष्टकम् ॥ ३ ॥
संवेष्ट्य कण्ठदेशान्तं स्वच्छिन्नेन दृढेन च ।
कृत्वैवं च तत स्स्नाया त्कुर्या त्रयाचादिकं ततः ॥ ४ ॥
निशांबुना चन्दनेन श्वेतदूर्वांकुरेण च ।
सुश्लक्ष्ण भूर्जपत्रेतु नाम सान्तर्गतं लिखेत् ॥ ५ ॥
अरान्तोपगतेनैव कुर्यां द्वीजेन संयुतम् ।
कमलं तद्बहिर्लिख्य मष्टपत्रं सकर्णिकम् ॥ ६ ॥
नाभितुर्यं मधोवक्त्रं वर्णपत्राष्टकं लिखेत् ।
तदन्त स्तच्चतुर्थ्यन्तं मन्त्रेशं च लिखे त्परम् ॥ ७ ॥
नतिप्रणवगर्भन्तु ततः कमलबाह्यगम् ।
विलिख्य नेमिनवमं द्विधोर्ध्वाधोमुखं तु वै ॥ ८ ॥
संवेष्ट्य सितसूत्रेण अपि कुम्भे निवेशयेत् ।
आधारं शालिचूर्णोये मण्डलाग्रे निधाय तम् ॥ ९ ॥

आवाह्य मण्डले मन्त्रं प्राग्वद्धृदयकोटरात् ।
तत श्चेतोपचारेणा तन्त्रम्मन्त्रेश्वरं यजेत् ॥ १७० ॥
पूर्णेन्दुमण्डळान्तस्स्थ मुद्गिरन्तं सुधारसम् ।
शशांकशतसंकाशं ध्यात्वा सपरिवारकम् ॥ १ ॥
यत्त यत्त महाशान्ति पूजान्ते समुदीरयेत् ।
ततः शशांकदिग्भागे कुण्डे पूर्णेन्दुलक्षणे ॥ २ ॥
क्षीरतण्डुलमध्वाज्ये गुग्गुलेन तिलेन च ।
सचन्दनेन होमं तु सप्तरात्रं समाचरेत् ॥ ३ ॥
पयोभुक्परमेशं च महराष्टक मर्चयेत् ।
होमान्ते कळशस्थस्य पयसा शीतळेन तु ॥ ४ ॥
सेचनं चाम्भसाँ कुर्या त्प्रत्यहं महराष्टकम् ।
स्नानान्ते ब्रह्मरन्ध्रोर्ध्वे संस्मरे न्मन्त्रनायकम् ॥ ५ ॥
स्रवन्त ममृतं त्वेवं शान्ति र्भवति शाश्वती ।
अथवादाय मृत्पात्रं वेदळं वाथ काष्ठजम् ॥ ६ ॥
तत्र पंकजय त्कुर्या द्रचनामोदनेन च ।
पिष्टनिर्मितपात्राणां सम्प्रज्वाल्य घृतेन तु ॥ ७ ॥
दीपाष्टकं ततः पूजां कुर्या त्पूजादिके वळेः ।
स्वित्रानि सप्तबीजानि विकीर्यंच तदूर्ध्वतः ॥ ८ ॥
ततोर्चिते तोयकुम्भे धूपपात्रन्तु विन्यसेत् ।
अच्छिन्नधूपप्रसरं त्रैकाल्यं च बलिं हरेत् ॥ ९ ॥
शान्त्यर्थंदेशपाळानां भूताना मेव मेवहि ।
पृष्ठे चोदकधारां वै अच्छिन्नां पदसप्तकम् ॥ १८० ॥
शान्तये बळिमन्त्राणां मूलमन्त्रेण पातयेत् ।
इति शान्ति विधानश्च पौष्टिकंच निबोधतु ॥ १ ॥
कुङ्कुमक्षोद मिश्रेण कुसुम्भरजसातुवै ।
पूर्ववन्मण्डलंकुर्या द्रक्तचन्दन भूषितम् ॥ २ ॥

नीवारतण्डुलैनैव ताम्रवर्णे स्तिते [स्तिके] शुभैः ।
सम्पूर्यबदरोपेते रुपकुम्भाष्टकांहियत् ॥ ३ ॥
सोपकुम्भानिकुम्भानि रक्तसूत्रेणवेष्टयच ।
शेषंयद्विहितंचात्र तत्तद्रक्तं प्रकल्पयेत् ॥ ४ ॥
ततस्नातः कृतन्यासो नाम रोचनयालिखेत् ।
अलक्तकाम्बुयुक्तेन सान्द्रदर्भांकुरेणतु ॥ ५ ॥
पूर्ववत्पद्मगर्भस्थं ततःपत्रेष्वधोमुखम् ।
बीजन्नियोजयेत्तन्मे गदतश्चावधारय ॥ ६ ॥
नेमेरेकोनविंशाख्य वर्णस्याधोगतंन्यसेत् ।
बीजंनाभितृतीयंच तदधःपंचमारगं ॥ ७ ॥
शिरसारान्तपूर्वेण युक्तंवाद्या हृत्तादिना ।
तदन्तस्थं न्यसेद्बीजं नाभितुर्यासनस्थितम् ॥ ८ ॥
नाभिसप्तमगर्भेथ विन्यसेत्कमलन्तुतत ।
बीजंपुष्टिपदोपेतं कुर्यात्पाससमन्वितम् ॥ ९ ॥
लिखेत्प्रणवपूर्वंतु बहिरष्टासुदिक्षुवै ।
संवेष्टय रक्तसूत्रेण मधुतोयघटेन्यसेत् ॥ १९० ॥
निधायपूर्ववत्कुर्या द्दिग्बन्धं हृदयादिकैः ।
अस्त्रेणतुविदिग्बन्धं नेत्रेणोर्ध्वमधस्तथा ॥ १ ॥
ततोविद्रुमसंकाशं मन्त्रमावाह्य संयजेत् ।
अधोमन्त्रगणंसर्वं लोकेशास्त्रान्त संयुतम् ॥ २ ॥
रक्तैरक्तण्टकैर्हृद्ये रर्चनंकुसुमैर्हितम् ।
राजमुद्रैस्तु नैवेद्यं युक्तमत्र गुळोदनं ॥ ३ ॥
गुळरञ्जितभक्ष्याणि कुर्यान्नानाविधानिवै ।
सम्भवेत्तविधेरक्तं सर्वकार्यमसम्भवे ॥ ४ ॥
रञ्जयेत्कुंकुमाद्येन केनचिद्रक्तधातुना ।
सर्वं जपावसानन्तु कृत्वाहोमं समाचरेत ॥ ५ ॥

घृतैस्तिलैस्तुपूर्वोक्तै शर्करामदरान्वितैः ।
दत्वापूर्णाहुतिंकुर्या त्सेचनं शर्कराम्भसा ॥ ६ ॥
पूर्ववन्मन्त्रनाथस्य साध्यगर्भीकृतस्यच ।
ततःपूर्वोक्तविधिना बलिकर्मसमाचरेत ॥ ७ ॥
सप्तरात्रं त्रिरात्रंवा पुष्टिरुत्पद्यते महत ।
प्रभावान्मन्त्रराजस्य विधिनाऽनेनसर्वदा ॥ ८ ॥
अथानेनादिमन्त्रेण कुर्यादाप्यायनन्तुवै ।
परस्यैवात्मनोमन्त्री यथातदवधारय ॥ ९ ॥
मण्डलंमधुनायुक्तं चतुर्वर्णकभूषितम् ।
सच्छत्रदर्पणोपेतं किंकिणीव्यंजनान्वितम् ॥ २०० ॥
घृतेनमधुनादध्ना पयसासुश्रितेनच ।
ध्यस्तेनउपकुम्भोतु द्वौद्वौसम्पूर्यपततः ॥ १ ॥
मधूकफलकर्पूर द्राक्षामलकफलैस्ततः ।
पाषाणयापूर्यकुम्भानां वक्रदेशेनिधायच ॥ २ ॥
सांकुराणिशरावाणि सिक्तानिशिशिराम्भसा ।
सुधाचन्दनलिप्तानि सितपुष्पान्वितानिच ॥ ३ ॥
चर्चितानिसितादर्पेण योज्यकुम्भान्तरावनेः ।
सितरक्तन्तुदेमाभं पुष्पाणमखिलंहिपद ॥ ४ ॥
उपचारेतुविहितं तदाहृत्याखिलंतुवै ।
कृताह्निकश्शुक्लवासा स्सिद्धमन्त्राभिधानधृक् ॥ ५ ॥
सकुंकुमेनक्षीरेण दूर्वादिक्षुरसेनच ।
तथाचमधुनाभूर्जे वस्त्रेवासार्णमध्यगम् ॥ ६ ॥
दत्वासंज्ञापदंकुर्या द्वाह्येपद्मचतुर्दळम् ।
तद्बाह्येर्द्विगुणैः पत्रैः कर्णिकाकेसरान्वितम् ॥ ७ ॥
द्विषट्कपत्रंतद्बद्ध तद्बाह्येषोडशच्छदम् ।
ततस्त्विरष्टपत्रन्तु तद्बाह्ये वृत्तमालिखेत् ॥ ८ ॥

अधोमुखन्तुसर्वेषां दळानाम्बीजपञ्चकम् ।
क्रमेणपूर्वपश्चात्तु योजनीयंहितच्छृणु ॥ ९ ॥
नाभिसप्तमवर्णंय न्नाभितुर्योपरिस्थितम् ।
उत्तराधरयोगेन तदेवादाय वैपुनः ॥ २१०॥
अथनाभितृतीयन्तु अधोद्वाभ्यांतु विन्यसेत् ।
अधस्स्थं सप्तमन्नाभे स्तच्चतुर्थंतु मूर्धनि ॥ १ ॥
ततस्सप्तममादाय तृतीयं तदधोन्यसेत् ।
तदधोनेमिवर्गाच्च योजयेदूनविंशकम् ॥ २ ॥
भूयोनेमेस्समादाय नाभिसप्तमपृष्ठगम् ।
तस्याप्यधस्तृतीयन्तु नाभिदेशाच्चविन्यसेत् ॥ ३ ॥
सर्वेषांनाभिपूर्वन्तु पंचमारगसंयुतम् ।
निदध्यादासनंपश्चा च्छिरसाळांछयेत् क्रमात् ॥ ४ ॥
नवमेनतुवैनेमे ररोपान्त्य गतेनतु ।
नाभियतुर्यवर्णानां प्राग्वन्मध्ये ऽ त्रमन्त्रराट् ॥ ५ ॥
वौषट्पदद्वयान्तस्थ मधबीजंहि केवलम् ।
दळान्तराळभूमौतु चतुष्पत्रस्य योजयेत् ॥ ६ ॥
अरावसानसम्भिन्नं कृत्वावैनाभिसप्तमं ।
तेनयुक्तं तथाद्यष्टपत्रस्य सन्धिषु ॥ ७ ॥
तेनैवनाभितुर्यन्तु भेदयित्वा तदन्तगम् ।
कृत्वाबीजवरं कुर्या द्विषट्पत्रान्तराळगम् ॥ ८ ॥
वषट्कारपदोपेतं बीजंपीताम्बुजन्निभम् ।
न्यसेत्षोडशपत्रस्य सन्धिदेशगतंततः ॥ ९ ॥
नाभेस्सप्तमबीजन्तु तच्चतुर्थासनस्थितम् ।
अराच्चतुर्दशेनैव तदन्तेनापि [भि] भूषितम् ॥२२०॥
एतत्सम्पुटमध्यस्थं क्षरन्तममृतंमहत् ।
पूर्ववद्वाह्यपद्मस्य प्रादक्षिण्येनविन्यसेत् ॥ १ ॥

नाभितुर्यमधाद्राय स्थितंतत्समसीपरि ।
नेमेर्नवमबीजेन अरान्तायेनचांकयेत् ॥२॥
बीजमेतन्त्रियोक्तव्यं संख्याहीनंनिरन्तरम् ।
ऊर्मिभूतंबहिष्ठस्य पयोजावरणस्यच ॥ ३ ॥
लिख्येवं सितरक्तेन पीतसूत्रेण वेष्टयेत ।
मध्विक्षुरस आज्राम्बु पूर्णकुम्भे नियोज्यच ॥ ४ ॥
चन्दनेनसमालिप्तं कृत्वापुष्पस्रगन्वितम् ।
तन्निधायोदितेस्थाने ततोमन्त्रेश्वरंयजेत् ॥ ५ ॥
हृत्पुण्डरीक मध्यस्थं परिवारसमन्वितम् ।
स्वच्छ स्फाटिकवर्णाभं हिमा दधिकशीतलम् ॥ ६ ॥
ध्यायेत्तं ब्रह्मरन्ध्रोर्ध्वे सितंपद्म मधोमुखम् ।
तत्कर्णिकोदरेलीनं स्मरेद्गगनमण्डलम् ॥ ७ ॥
प्रकाशितं निशानाथ मयूखा खिलतारकैः ।
विक्षिप्तबाहैराकीर्णं सुरसिन्धु विनिर्गमैः ॥ ८ ॥
अथार्घ्यं पुष्पपूर्वाणां भोगाना मर्चनेविभोः ।
प्रागुक्तानां क्रमेणैव अनुसन्धान माचरेत् ॥ ९ ॥
यंयं संकल्पयेद्भोगं तन्तम्भाव्य सुधामयं ।
पतन्तमंबराद्वेगा दमृतांशुपरिप्लुतम् ॥ २३० ॥
साक्षादमृत रूपस्तु तै स्तै रमृतसम्भवैः ।
बृंहितं मुदितंमन्त्रं सम्प्लुतं मन्त्रराट्स्मरेत ॥ १ ॥
ततो ऽवतार्य हृदया त्साधनेन यजेद्बहिः ।
इष्टा ऽथवह्नि गर्भस्थं ध्यात्वा सन्तर्पये ततः ॥ २ ॥
सामलैराज्य सिक्तैस्तु बिल्वैर्दूर्वा कुरैर्नवैः ।
तिलैर्गोक्षीरसंयुक्तैः लाजतण्डुल मिश्रितैः ॥ ३ ॥
सिताज्यपुष्पसंयुक्तैः दद्यात्पूर्णाहुतिंततः ।
मधुक्षीरोदकेनाथ कुर्या द्वै मन्त्रसेचनम् ॥ ४ ॥

घृतेन पयसान्नेन पायसेन फलै श्शुभैः ।
पूर्वव द्बलिदानं तु कुर्या दाप्यायनं भवेत् ॥ ५ ॥

अथ रक्षाविधानं तु वक्ष्ये सम्य ग्यथा स्थितम् ।
येन विज्ञातमात्रेण नीरुज स्सर्वदा भवेत ॥ ६ ॥

सामान्यं सर्वदोषाणां ज्ञातानां च निवारणे ।
अज्ञातानां विशेषेण तत्सम्य गवधारय ॥ ७ ॥

ताराग्रहोपतापेन धातु वैषम्य मेति वै ।
तद्वैषम्या त्प्रकुप्यन्ति व्याधयस्तु ज्वरादयः ॥ ८ ॥

तत्कोपावसरेणैव ब्रह्मरक्षो मुखा ग्रहाः ।
शाकिन्यो भूतवेताळा स्संक्रामन्ति हि देहिनः ॥ ९ ॥

निमित्तं विद्धि सर्वेषां कर्म यद्वै पुरा कृतम् ।
सामर्थ्येन तु मन्त्रेण ज्ञानेन तपसा च वै ॥२५०॥

जपाध्ययनहोमेन दानेन विविधेन च ।
मन्त्रौषध्युपयोगेन सहसा नाश मेति तत् ॥ १ ॥

प्राधान्येन तु सर्वेषा म्मन्त्रमत्रानुतिष्ठति ।
यस्य स्मरणमात्रेण ना विशन्ति गृहादयः ॥ २ ॥

कृत्वाधारं यथोक्तं तु यजनार्थं नृकेसरेः ।
बीजै स्सिद्धार्थकोपेतै रुपकुम्भानि पूर्यच ॥ ३ ॥

चक्रेष्वप्युपकुम्भानां सफलानि नियोज्य च ।
तिलसर्षपपूर्णानि पात्राणि विततानि च ॥ ४ ॥

सुसमं तद्वहि र्दद्या द्दिक्षु लोहशराष्टकम् ।
कण्ठदेशेषु बध्नीया च्छराणां दृढतन्तुना ॥ ५ ॥

बर्हिपक्षसमायुक्तां सर्पकंचुकभूषिताम् ।
महौषधीं भूतजटां शमीशाखासमन्विताम् ॥ ६ ॥

पंचरागेण सूत्रेण उदगाशा दितः क्रमात् ।
प्रादक्षिण्येन तु त्रेधा वेष्टये त्तच्छराष्टकम् ॥ ७ ॥

अष्टानां पूर्णकुम्भानां मन्तरान्तरयोगतः ।
दद्या दुच्चासनस्थन्तु दीपाष्टक मनुक्रमात् ॥ ८ ॥

तैलेन राजिकाख्येन ताम्रपात्रस्थिता स्तु वै ।
दीपानां वर्तयो देया महाराजलरंजिताः ॥ ९ ॥

अथ बद्धशिखो मौनी प्राग्वद्दिग्बन्ध माचरेत् ।
अभिसन्धाय मनसा सर्वदोषपळायनम् ॥ २५० ॥

संयजे न्मन्त्रनाथन्तु काम्यै र्बहुविधै श्शुभैः ।
पुष्पै र्धूपै स्तु नैवेद्यै र्भक्ष्यै स्सफळमूळकैः ॥ १ ॥

हुत्वाथ सर्वबीजानि सिद्धार्थकयुतानि च ।
राजिका घृतयुक्तानि तिळानि सफळानि च ॥ २ ॥

ध्यात्वा पूर्णाहुतिं दद्या न्मध्याह्नसमये ततः ।
रक्ष्यं सुनिर्मळं कृत्वा पूर्व मभ्यंजनादिकैः ॥ ३ ॥

हेमरक्तौषधिस्नानैः प्रोक्षयित्वा प्रवेश्य च ।
ताडयित्वा स्त्रपुष्पेण आपादा त्सुनिरीक्ष्य च ॥ ४ ॥

नतजानुशिरः कृत्वा देवाय विनिवेदयेत् ।
उत्तराभिमुखं कृत्वा आसने परिधान्विते ॥ ५ ॥

अस्त्रोपलक्षिते चैव तथार्घ्यादिसमन्विते ।
षडंगेनाथ मन्त्रेण तस्य न्यासं समाचरेत् ॥ ६ ॥

मनसा करशाखासु स्वस्थाने ष्वथ विग्रहे ।
स्व चक्र मथ तस्याग्रे षट्कोण म्मण्डलं लिखेत् ॥ ७ ॥

पूतं ज्वालागणेनैव तत स्तत्र निवेशयेत् ।
प्रागुक्तरचनाकृचन्तु सुपूर्ण गन्धधारिणा ॥ ८ ॥

सप्तकं कळशानां तु मध्ये योज्यं तदश्रिषु ।
अश्रिभ्या मन्तराळस्थं दीपषट्कं यथा पुरा ॥ ९ ॥
कृत्वा मध्यमकुम्भे तु सांगं मन्त्रेश्वरं यजेत् ।
नमो नृसिंहभूतेभ्यः प्रणवाद्येन पूजयेत् ॥ २६० ॥
कोणेषु भगवद्भक्तनिचयं दोषनाशनम् ।
पूजयित्वा यथा न्यायं पुष्पधूपादिकेन वै ॥ १ ॥
दिग्बन्ध मथ वै कुर्या त्सास्त्रै स्सिद्धार्थकैः क्रमात् ।
ताडये दातुरं पश्चा दापादा न्मस्तकावधि ॥ २ ॥
स्वपाणिव्यजनेनाथ समाकृष्य विनिक्षिपेत् ।
दोषजाळं च तद्दोषान् गगने वा धरातळे ॥ ३ ॥
ततोग्निपात्र मादाय निर्धूममतिदीप्तिमत् ।
तस्मिन्निरिन्धने कुर्यात् होमं सिद्धार्थकैः क्रमात् ॥ ४ ॥
मूलम [तिलैर्मं] न्त्रेण चास्त्रेण शताष्टाधिकसंख्यया ।
अमुकं रक्ष रक्षेति स्वाहाशक्तिसमन्वितम् ॥ ५ ॥
मन्त्रान्ते तु पदं कुर्यात् भ्रामये न्मूर्ध्नि चाहुतिम् ।
मद्दिषाक्षी मथादाय सिद्धार्थकसमन्विताम् ॥ ६ ॥
प्रजप्य धूपये त्तं वै कृत्वाच्छन्नं तु वाससा ।
निधाय सजलं पात्र मग्निपात्रोपगन्ततः ॥ ७ ॥
नैवेद्यशेष मन्यस्मिन् सर्वं मुद्धृत्य सोदकम् ।
पशुप्रतिनिधिं चैव रंजितं कुंकुमादिना ॥ ८ ॥
ध्यात्वा श्रितानां दोषाणा म्मनसा परिकल्पितम् ।
यदीया चास्य वै बाधा इन्द्रियाणां च धातुषु ॥ ९ ॥
आदाय च बलिं शश्वत सिद्धवर्क्ते [चे] तु मुंचतु ।
अन्तरान्तरयोगेन वामदक्षिणपाणिना ॥ २७० ॥

असंलग्न माचरे द्धोमं बलियुक्तं प्रदक्षिणैः ।
बलिपाणि मथक्षाळय अब्रजमेन वारिणा ॥ १ ॥
भूतिमादायवैकुण्डा दथगोमय जन्तुवा ।
मजप्य बहुशोस्त्रेण ललाटादंध्रिगोचरम् ॥ २ ॥
कार्याणिचोर्ध्वपुण्ड्राणि पृष्ठपार्श्व द्वयेतुच ।
स्वस्त्यस्तुते [स्वस्त्वाकृते] युक्तेनाथ मन्त्रेणार्घ्योदकेनतु ॥३॥
मन्त्रकुम्भात्समेतेन विप्रुड्भिर्ह्लदयेदनु ।
ध्यात्वापूर्णेन्दुगम्मन्त्रं पूर्णचन्द्रायुतोपमम् ॥ ४ ॥
ब्रह्मरन्ध्रेणसाध्यस्य स्रवन्तममृतम्महत ।
शरीरविटपन्तेन सेचयेन्नखावधि ॥ ५ ॥
एवंकृत्वार्चयेद्भूयो मन्त्रम्मण्डलकुम्भगम् ।
कुम्भंतंशयनागारे ऊर्ध्वदेशेनिधायवै ॥ ६ ॥
वस्त्रपीठोपरिस्थन्तु च्छन्नंकृत्वानुवाससा ।
तत्रापिदिग्विदिक्स्थश्च दद्यात्पूर्णघटाष्टकम् ॥ ७ ॥
अच्छिन्नमसरन्ध्रं दीपपात्रंघृतादिना ।
फलपुष्पौषधीदीप जालसिद्धार्थकन्दधौ ॥ ८ ॥
पात्रसंघन्तदयेतु कृत्वाचाथबलिंहरेत ।
निशामुखेतुसंप्राप्ते सर्वदोषप्रशान्तये ॥ ९ ॥
एकस्मिन्वैसमादाय पात्रेयत्कल्पितंविभोः ।
आपुष्पधूपदीपाम्र उपसंगृह्ययत्नतः ॥ २८० ॥
तद्भूतदत्तमन्यस्मिन् षण्णांवातत्पृथक्पृथक् ।
स्वदीपालंकृतंकृत्वा स्वकटोपरिविन्यसेत ॥ १ ॥
रक्षरक्षपदोपेतं मन्त्र मस्त्र युतंस्मरेत् ।
रक्ष्यस्य शिरसिभ्राम्य यथादत्तं क्रमेणतु ॥ २ ॥

सत्वशुद्धां स्तथा भूयो मद्भक्तान् बालिवाहकान् ।
अस्त्राभिमन्त्रितं दद्या त्तेषां सिद्धार्थकं करे ॥ ३ ॥
प्रजप्य भस्मना कुर्या ल्ललाटे तिलकन्तु वै ।
प्रचाहये द्बलिं मन्त्री ह्यगाधे स्भसि वै पुरा ॥ ४ ॥
चत्वरे वृक्षमूलेथ ग्रामा द्वा नगरा द्बहिः ।
देवभूतबलिक्षेपो विहित श्चात्रकर्मणि ॥ ५ ॥
धूमायन्तंच सिद्धार्थं वंह्निपात्रं पुरोदितम् ।
तेनैव बलिपात्रेण सोदकेन समन्वितम् ॥ ६ ॥
त्यजेत् कूपसमीपे तु वाप्यां वा निकटे तरोः ।
बलं क्षिप्त्वा समाचम्य धौतांघ्रिकरपल्लवः ॥ ७ ॥
रक्ष्यावनौ सुलिप्तायां परित श्शोधितस्य च ।
तन्मूर्ध्नि दीपपात्रैश्च सिद्धार्थक्षेप माचरेत् ॥ ८ ॥
प्रजप्य बहुशो स्त्रेण मूलसम्पुटितेन च ।
यग्रीया त्सप्तरात्रन्तु प्रत्यहं तस्य चाम्बरे ॥ ९ ॥
कृतेनानेन विधिना पीडितानां सदैवहि ।
रक्षणं रसधातूनां शश्वदेवहिजायते ॥ २९० ॥
ततः प्रलिप्तेविमले कुशाजिन समावृते ।
कृतन्यास स्स्वयन्तिष्ठे द्रक्ष्यागारे सहायवान् ॥ १ ॥
पयोभुग्वानिराहारो ध्यानजप्य परायणः ।
आदिमध्यावसानस्थं रात्रयंशेषु समाचरेत् ॥ २ ॥
पूजनंवहनंसम्य ग्बलिदान समन्वितम् ।
सक्तुना सोदकेनैव मधुनाथ घृतेनच ॥ ३ ॥
पूर्वभागेतु यामिन्या मतीतो विहितोबलिः ।
यवगोधूमशाल्युत्थ चूर्णैनसगुडाम्भसा ॥ ४ ॥
त्रिप्रकाराणि संवर्त्य मोदकानितुपाणिना ।
वृत्तदीपशिखाकारै स्तुल्यान्याम्रफलस्यच ॥ ५ ॥
क्षीरयुक्तैरपक्वैस्तै र्मध्यरात्र्यां बलिंहरेत् ।
सुमर्दितै स्तिलै कृष्णै र्बीजैःपाकविवर्जितैः ॥ ६ ॥

तण्डुलै रजनीचूर्णै र्दध्नादूर्वांकुरैः फलैः ।
व्यतीतायान्तु शर्वर्यां बलिरक्षागृहाद्बहिः ॥ ७ ॥
मार्गैकदेशे निर्दिश्य चत्वरेवापि शोधिते ।
अथाभिमन्त्र्यबीजानि सप्तधान्यानिमल्लके ॥ ८ ॥
दत्वाद्विजेन्द्र कन्यायां तत्सकाशा त्समाहरेत ।
तिस्रःप्रसृतयःपात्र एकस्मि न्सप्तचापरे ॥ ९ ॥
एकादश ततोन्यस्मि न्घटेपात्रत्रयन्ततः ।
अस्त्रसंम्पुटितेनैव सिद्धबीजेन मन्त्रवित ॥ ३०० ॥
शतमष्टाधिकंचैव द्विगुणं त्रिगुणंक्रमात् ।
तेनतोयघटानान्तु उद्धृत्यो द्धृत्यनिक्षिपेत ॥ १ ॥
एकंस्थले जलेचान्ये प्रातर्मध्य न्दिनक्षये ।
आसमाप्ते रिदंकुर्या त्सामान्यं भूततर्पणं ॥ २ ॥
ततोपरस्मिन्नहनि इष्ट्वामन्त्रन्तु मण्डले ।
हुत्वायथाविधानेन दत्वापूर्णाहुतिन्तुवै ॥ ३ ॥
सितेनशालिचूर्णेन अष्टाश्रं मण्डलं लिखेत् ।
तन्मध्येशंखमध्यस्थं कमलं लिख्यषड्दळम् ॥ ४ ॥
दद्याद्घटाष्टकं बाह्ये प्रागद्दीप समन्वितम् ।
भवता र्यंवतन्मध्ये रक्षाकुम्भं शिरास्थितम् ॥ ५ ॥
अपनीयपुरातस्मा दर्घ्यमाल्यानुलेपनम् ।
शीतळोदकधाराश्च पूरणार्थपरांक्षिपेत् ॥ ६ ॥
यथायथाक्षयंयाति तत्रस्थमुदकंतुवै ।
तथातथाभवेद्वृद्धी रस्यस्या खिळधातुषु ॥ ७ ॥
स्रग्वस्त्राळ्यानुलेपाद्यै र्नैवकुर्वार्चितन्तुतम् ।
तत स्सम्पूज्य तन्मध्ये मन्त्रनाथं यथा पुरा ॥ ८ ॥
रक्तधातो र्भवे येन नृणा मुपचयो महान् ।
मन्त्रदत्तेन सुरभि नैवेद्येनाथ तर्पयेत् ॥ ९ ॥

अर्घ्यं पुष्पं रजो धूपं दीपं यन्मन्त्रयोजितम् ।
तत्सर्व मुपसंहृत्य नित्य मम्भसि निक्षिपेत ॥ २१० ॥
शेषस्य विनियोगन्तु प्रागुक्तं सर्व माचरेत ।
तृतीयेह्नि ततः कुर्या च्चतुरश्रं तु मण्डलम् ॥ १ ॥
षट्कोणंचैव तन्मध्ये पुर मुल्लिख्य साम्बुजम् ।
तत्र कुम्भसमूहन्तु तस्मा द्दीपान्तरीकृतम् ॥ २ ॥
इष्ट्वातु मन्त्रवृन्तेन तर्पये द्ब्राह्मणां स्तु वै ।
वृत्तमण्डलमध्येतु चतुर्थेहनि संलिखेत ॥ ३ ॥
अष्टारं दीप्तिमच्चक्रं वह्निवेश्म तदन्तरे ।
तत्रेष्ट्वा मन्त्रमूर्तिन्तु कृत्वा रक्षां यथा पुरा ॥ ४ ॥
द्विजेन्द्रजां कुमारीं च तथा ब्राह्मणदारिकाः ।
पूजयित्वा यथा न्यायं ताभ्यां यच्छे न्निवेदितम् ॥ ५ ॥
अथाष्टकोणं कुर्वीत मण्डलं पंचमे ऽहनि ।
शंखं तदन्तरे कुर्या च्छंखस्योदरगं लिखेत् ॥ ६ ॥
सनाभिवेदिपंचारं जातावासं च हेतिराट् ।
सकुम्भानां च दीपानां प्राक्कृत्वा विनियोजनम् ॥ ७ ॥
विविधैः पूजये द्देवं नैवेद्यैः कुसुमादिकैः ।
देवोपभुक्त मन्नन्तु क्षिप्त्वा प्रागुक्त माचरेत् ॥ ८ ॥
अथ षष्ठ दिने कुर्या त्त्रिकोणभुवनान्तरे ।
सप्तारन्तु महाचक्रं सप्तलोकमयं हि यत् ॥ ९ ॥
तदन्तरे च तद्दिक्षु गदाद्वन्द्वद्वयं लिखेत् ।
तन्मध्ये तद्घटान्तस्स्थं यजे न्मन्त्रं यथाविधि ॥ २२० ॥
इष्ट्वा नैवेद्य मादाय उच्चस्थाने निधाय तत्र ।
उपभोगं याति चैव काकादेः खेचरेषु च ॥ १ ॥
चतुरश्रं चतुर्द्वारं मण्डलं सप्तमेहनि ।
कुर्या त्कोणचतुष्केतु लिखे च्छंखचतुष्टयम् ॥ २ ॥

तत्र मध्ये लिखे त्पद्म मसंख्यदळभूषितम् ।
तत्कर्णिकाश्रितं चक्रं द्वादशारं विलिख्य च ॥ ३ ॥
अष्टदिक्ष्वष्टकं दद्या त्कलशानां सदीपकम् ।
तत्र षट्दिवसोर्ध्वन्तु विनियोगं समाचरेत् ॥ ४ ॥
नैवेद्यस्य च मन्त्रज्ञो दक्षिणाभि स्समन्वितम् ।
एवं मांसादिधातूनां क्रमा दुपचयो भवेत् ॥ ५ ॥
माहिषो जोगुडं चैव हरिण श्शशक स्तथा ।
मयूर श्चक्रवाकस्तु समाहं समकन्तु वै ॥ ६ ॥
देवं ध्यात्वाश्रितानांतु सत्वानां पिशिताशिनाम् ।
रसाद्यर्पीष्टस्सम्पाद्यं नसजीवंहि जंगमम् ॥ ७ ॥
स्वार्थतो वा परार्थेन श्रेयसेभिनिवेशिना ।
प्राणिहिंसा न कार्या वै विशेषा ज्जीवितैषिणाम् ॥ ८ ॥
आयुषः क्षय मायाति नूनं प्राणिवधा न्नृणाम् ।
भूताभयप्रदानेन आयुषो वृद्धि माप्नुयात् ॥ ९ ॥
आयु रारोग्य मैश्वर्य मपमृत्युजय म्मदम् ।
बल मोजो धृति धैर्यं स्या न्मन्त्रा त्परायुषः ॥ २३० ॥
मन्त्रपूजा जपो होमो दानं हेमगवादिनाम् ।
ऐहिकामुष्मिकीं वृद्धिं सत्वस्थानां करोति च ॥ १ ॥
मण्डलस्थं ततः क्षिप्त्वा ह्यतीते सप्तमे दिने ।
रजांसि वळयो वान्य त्प्राग्व दादाय सन्त्यजेत् ॥ २ ॥
इति रक्षाविधानन्तु सरुजाना मुदाहृतम् ।
निरुजानां विशेषेण रक्षणं भोगसेविनाम् ॥ ३ ॥
क्रियारतानां भक्तानां आस्तिकानां हितैषिणाम् ।
कार्यं क्रियापरेणैव मन्त्रज्ञेन सदैवहि ॥ ४ ॥
यत्रानेन विधानेन शरीरमपि रक्ष्यते ।
तत्र भूताः प्रयच्छन्ति कल्याणं सार्वलौकिकम् ॥ ५ ॥

अथ सन्धारणीं रक्षां वक्ष्ये विग्रहभूषणम् ।
या सम्पन्ने क्रियामात्रे धारणादेव रक्षति ॥ ६ ॥
प्रणवाद्यन्तसंरुद्धं साध्यसंज्ञापदं लिखेत् ।
रक्षवीप्सापदोपेतं पत्रसन्धिषु षट्स्वथ ॥ ७ ॥
द्वादशारं बहिश्चक्रं नाभिनेमियुतं लिखेत् ।
नाभे रष्टमबीजं य सदरे ष्वन्तरान्यसेत् ॥ ८ ॥
सप्तमा द्दशमं याव द्वर्जयित्वाक्षराष्टकम् ।
क्रमेण भेदये च्छेषै स्तदराणैं स्सबिन्दुकैः ॥ ९ ॥
जहि वीप्सापदं दोषा नमुकस्येति विन्यसेत् ।
सर्वेषा मन्तरालेषु अस्त्रमन्त्रन्तु पूर्ववत् ॥ ३४० ॥
अमुकं पाहि पाहीति द्वादशाक्षरमध्यगम् ।
चक्रनाभौतु विन्यस्य नेमिदेशे तथैवहि ॥ १ ॥
क्रमा दथ बहि र्लेख्या मन्त्रचक्रस्य यत्नतः ।
वृत्तत्रयश्चार्धचन्द्राणि चतुरश्रपुराणि च ॥ २ ॥
बिन्दुस्वस्तिककल्हार वज्रसंलांछितानि च ।
नाभिपूर्वद्वितीयेन चतुर्थेन तदादिना ॥ ३ ॥
क्रमा द्वर्णचतुष्केन तानि युक्तानि कारयेत् ।
सषष्ठेगेन बीजेन नामरक्षपदानुगम् ॥ ४ ॥
सम्पुटीकृत्य वृत्ताख्यं मण्डलं परिपूरयेत् ।
द्वादशार्णेन बाह्यस्थं तृतीयं पूर्य पूर्ववत् ॥ ५ ॥
द्वितीयं वा चतुर्थन्तु बहि र्दिक्ष्वष्टके क्रमात् ।
रक्षवीप्सापदोपेतं नामवर्जं नियोजयेत् ॥ ६ ॥
सह गोरोचना योऽथा कर्पूरं कुंकुमन्तु वै ।
क्षीरेणकापिलेनाथ सद्गोमयरसेनच ॥ ७ ॥
निशांबुनासमालोड्य निम्नगा सलिलेनवा ।
विलिख्यभूर्जपत्रेवा बर्हिपक्षेण वासने [रे]॥ ८ ॥

शुभेनुकूलेनक्षत्रे सुलग्नेभ्युदितेगृहे ।
पूज्यसंवेष्टचसूत्रेण ततस्तद्धातुनानुवै ॥ ९ ॥
सन्धार्यामूर्ध्निकण्ठेवा सततं दक्षिणे भुजे ।
दैवदोषवियुक्तस्तु वर्द्धतेशोकवर्जितः ॥ ३५० ॥
आधिभूतै र्भयैर्मुक्तो यावज्जीवं हि तिष्ठति ।
परार्थतोवास्वार्थेन कृतकृत्योयदाभवेत् ॥ १ ॥
दोषवान् शान्तिदेनैव कर्मणानेनवाधुना ।
मन्त्रीतदामन्त्रवरं प्रयत्नेन क्षमापयेत् ॥ २ ॥
सिद्धचर्थमन्यसिद्धीनां यागहोम जपादिना ।
अथमन्त्रवराद्धर्मं साधनंयोभिवांछति ॥ ३ ॥
तस्मात्तयेविधानंच संक्षेपादवधारय ।
पितॄणां लुप्तपिण्डानां पिण्डनिर्वापणायच ॥ ४ ॥
प्रीतयेपि जगद्धातुः परित्राणार्थमात्मनः ।
कृतोपवासोमावास्या म्मण्डलान्तर्गतं विभुम् ॥५॥
आवाह्यपूर्वविधिना योजयेद्भक्तिपूर्वकम् ।
पाद्यार्घ्यं पुष्पधूपैस्तु दानैर्हेमगवादिकैः ॥ ६ ॥
तिलयुक्तैस्तु नैवेद्यैः स्सकुशैस्तु तिलान्वितैः ।
विमलैरम्बुपात्रैश्च स्वयमञ्जलिपूरकैः ॥ ७ ॥
सोचिरान्मन्त्र मूर्तेर्वै प्रासादाच्छाश्वतम्पदम् ।
प्राप्नोतिनरकस्थांश्च पितॄनपिनयेद्दिवम् ॥ ८ ॥
पत्रपुष्पफलाद्याद्य स्स्यदद्भवोदनादिना ।
रसैरत्नैश्चसद्गन्धै र्वस्त्रोत्कृष्टैस्तु धातुभिः ॥ ९ ॥
प्रवाळमुक्तामाणिक्यै र्भक्त्याचविभवेसति ।
बिम्बस्थम्मण्डलस्थंवा सर्वेशं मन्त्रिराड्यजेत्॥ ३६० ॥
षडशीति मुखोत्थायां पूर्णायां सोपवासकः ।
यज्ञधर्म फलाकांक्षी सनूनन्तदवाप्नुयात् ॥ १ ॥

योहिवांछतिसद्धर्मं तीर्थाभि गमनम्महत् ।
सयथावत्क्रमात्पूर्वं म्मण्डलेमन्त्रराड्यजेत् ॥ २ ॥
ततस्सम्भृतसम्भार स्स्नानपूर्वं समर्चयेद् ।
सिद्धप्रतिष्ठितंबिम्बं सैद्धंवाथस्वयंकृतम् ॥ ३ ॥
पञ्चगव्यदधिक्षीर घृतमध्विक्षुवारिभिः ।
सर्वौषधीगन्धरत्न फलपुष्पान्वितैर्घटैः ॥ ४ ॥
सांगेनामन्त्र्यमन्त्रेण शताष्टफलपूरितैः ।
अन्तरीकृतशुद्धांभः कुम्भैरर्घ्यसमन्वितैः ॥ ५ ॥
श्रद्धापूतेनमनसा एवंनिष्पाद्यतेयदि ।
प्रसादं मन्त्रनाथस्य प्रागुक्तमचिराल्लभेत् ॥ ६ ॥
संक्रान्त्यां सोपवासस्तु मण्डलेमन्त्रनायकम् ।
समावाह्ययजेद्यस्तु फलपुष्पैर्यथर्तुजैः ॥ ७॥
सप्ताहंफलमूलाशी त्रिकालंस्नानतत्परः ।
बहुशोष्टांगपातैस्तु प्रदक्षिणसमन्वितैः ॥ ८ ॥
सनूनंसमवाप्नोति शश्वत्स्तद्धतोद्भवम् ।
अथाभिमतदानाद्वै योधर्ममभिवांच्छति ॥ ९ ॥
विष्टपस्थदिनंप्राप्य सोपवासस्तुसंयतः ।
अभिसन्धायमनसा धर्मदानादभीप्सितम् ॥ ३७० ॥
निवर्त्यमण्डलंरम्य मग्रचगारसमन्वितम् ।
गोसम्भवैस्तु नैवेद्यै र्भक्ष्यैस्त्वफलमूलकैः ॥ १ ॥
स्रग्वरैर्धूपदीपैस्तु तिलैर्होमांबुभाजनैः ।
सम्यगिष्ट्वाथसन्तर्प्य ज्वलनान्तर्गतन्ततः ॥ २ ॥
समिद्भिराज्येनतिलै स्सघृतैस्तण्डुलान्वितैः ।
ततोभिवर्धतेधर्मो मूर्तोदानाच्छताधिकम् ॥ ३ ॥
दक्षिणेवायनेवाथ शुभंनिर्वर्त्यमण्डलम् ।
मन्त्रनाथन्तुचावाह्य विधिनासंयजेत्ततः ॥ ४ ॥

माल्यैर्विलेपनैर्धूपै र्महादीपैर्घृतादिकैः ।
गुडखण्डाचितैर्भक्ष्यैः पयसाकुसरेणतु ॥ ५ ॥
नाळिकेरोदकेनैव सक्तुनाचघृतेनच ।
सन्तर्प्यहुतभुङ्मध्ये मन्त्रमाज्यादिकैस्ततः ॥ ६ ॥
विधिनानेनवैधर्म मिष्टापूर्तमवाप्यते ।
चन्द्रसूर्योपरागेचा प्यहोरात्रोषितश्शुचिः ॥ ७ ॥
सर्वोपकरणोपेत मादौनिवर्त्यमण्डलम् ।
न्यस्य मन्त्रवरंतत्र विभवेनयजेत्ततः ॥ ८ ॥
सन्तर्प्यवह्निमध्येथ समिद्भिर्वाघृतादिकैः ।
जपेन्मन्त्रवरंपश्चा न्मनसाध्यानसंयुतम् ॥ ९ ॥
अक्षसूत्रकरोमन्त्री यावच्चन्द्रार्कदर्शनम् ।
पूजाहोमजपानाञ्च फलानन्त्यमवाप्नुयात् ॥ ३८० ॥
भक्तानामर्थहीनानां मन्त्रैकनियतात्मनां ।
साधनांग विहीनानां फलेप्सुनामिदंस्मृतम् ॥ १ ॥
स्नानाद्ध्यानात्तथायोगा ज्जपाद्धोमाच्चसद्व्रतात् ।
सदन्नपानाद्दानाच्च सर्वलोपाञ्चसामयात् ॥ २ ॥
धर्मसाधनमित्युक्तं सवित्तानांविशेषतः ।
यथार्थं साधनम्मन्त्रा दभिवाञ्छति योचिरात् ॥ ३ ॥
ब्रह्मचारीगृहस्थोवा वानप्रस्थोथवायतिः ।
कृत्वायागं यथासम्य क्सप्ताहंतत्र मन्त्रराट् ॥ ४ ॥
यजेत्सविभवेनैव त्रिस्नायीनक्तभोजनः ।
त्रैकाल्यंहुतभुङ्मध्ये सन्तर्प्याज्येन काळजैः ॥ ५ ॥
बिल्वैरामळकैःपद्मै स्तदभावे कुशांकुरैः ।
यदिच्छेत्तस्यकाळन्तु मन्त्रम्मन्त्रेश्वरात्फळम् ॥ ६ ॥
वैशाख्येयदि सितेतेन सौम्यश्रवणसंयुते ।
सोपवासेनकर्तव्यं मन्त्रेशस्यार्चनम्महत् ॥ ७ ॥
स्थलेवामण्डलेविम्बे साम्भःकुम्भेथवाततः ।

दक्षिणोत्तरपादाभ्यां मन्त्रनाथस्यपूजयेत ॥ ८ ॥
गङ्गांच यमुनांचैव नलिनाम्रणवेनतु ।
सदंघ्रिजलमिश्रेन घटमापूर्यचाम्भसा ॥ ९ ॥
अलंकृत्ययथाशोभं पुष्पवस्त्रानुलेपनैः ।
विनिवेश्यचतद्भक्ते तिलहोमफलान्वितः ॥३९०॥
मध्वाज्यशर्करायेन पूर्णदध्योदनानिच ।
महापूर्णघटश्चैव पात्रंवावेदलन्ततः ॥ १ ॥
निवेद्यमन्त्रमूर्तौया वस्त्रदुपानहसंयुतम् ।
तत्रातपत्रसहितं पात्रमाहूयवैततः ॥ २ ॥
स्रक्चन्दनार्घ्यं धूपैस्तु तमलंकृत्यवाससा ।
मन्त्रेणार्घ्योदकं पाणौ दत्वा तदनु तद्घटम् ॥ ३ ॥
प्रतिपाद्य जगद्योनेः प्रीत्यर्थं मपि तेन वै ।
प्रसक्तेन परां प्रीतिं वाच्यो मन्त्री महामते ॥ ४ ॥
एवमेव प्रपन्नाये नारायण मनामयम् ।
वर्णा ब्राह्मणपूर्वेतु ते स्वदुष्कृतशान्तये ॥ ५ ॥
स्नात्वाभ्यर्च्य पितॄन् देवान् सन्नदीभ्यां तु संगमे ।
आनाभि मवतीर्याथ विमलांजलिपूरकैः ॥ ६ ॥
निर्वर्त्य भगवद्यागं दद्या द्विप्रवराय च ।
आप्त्यर्थं विबुधानां च सर्वलोकनिवासिनाम् ॥ ७ ॥
पितॄणां स्वकुलोत्थानां सततं श्राद्धकांक्षिणाम् ।
श्वेतद्वीपाप्तये चैव वृद्ध्यर्थं च स्वसन्ततेः ॥ ८ ॥
आस्तां सितासिता चैव द्वादशी त्वमलेक्षण ।
भगवद्भावपूतानां या काचि दपरा तिथिः ॥ ९ ॥
साच वै श्रवणोपेता युताचाभिजितातु वै ।
सा तेषा मंगभावंच याति सर्वफलाप्तये ॥४००॥
तस्मा त्कृतोपवासस्तु तस्या मभ्यर्च्य मन्त्रराट् ।
विभवेनाथवा शक्त्या मन्त्रं शान्त्याप्त्यसिद्धये ॥ १ ॥

यानि यानीह दानानि गोभूहेमादिकानि च ।
दत्तानि चानुरूपाणि जनानां कृतकर्मणाम् ॥ २ ॥
फलदानि च दातॄणां भवदार्ढ्यकराणि च ।
सम्यक्दत्तानि यान्येव भक्तानां भावितात्मनाम् ॥ ३ ॥
भगवत्पादलिप्सूनां भवन्ति भवशान्तये ।
अपि वाद मिदं ताव यत्सर्वत्राच्युतो हरिः ॥४॥
विष्णु र्नारायणो हंस स्सर्वशक्तिमयः प्रभुः ।
द्रव्यात्मना विभक्तश्च ज्ञातव्यो ज्ञानकर्मणि ॥ ५ ॥
त्रिविधेन तु भेदेन बुद्बुदेभ्यो यथाम्बुधिः ।
एवं दानं स्व मात्मानं पात्रं नारायणात्मकम् ॥ ६ ॥
बुध्वा सामान्यबुध्या प्रा क्पुन स्तास्त्रिविधं पृथक् ।
सविशेषं परिज्ञेयं दानकाले ह्युपस्थिते ॥ ७ ॥
उपायलक्षणं द्रव्य मभ्यूह्यादौ स्वचेतसा ।
अनन्तशक्ते स्सामर्थ्य मिदं किंचि दनश्वरम् ॥ ८ ॥
दानाभिमानदेहस्तु प्रत्यगात्मा त्वहं प्रभुः ।
पात्रभावत्व मापन्नो मदनुग्रहकाम्यया ॥ ९ ॥
देवः पंचतनु स्साक्षा त्पंच भूतात्मना त्विदम् ।
ज्ञात्वैवं द्वादशार्णेन स्वेन वा न्यस्तविग्रहः ॥४१०॥
प्रत्ययं मन्त्र मालम्ब्य द्रव्यहोमादिकं ततः ।
स्वरूप मजह द्ध्याये न्महद्रश्मिकदम्बवत् ॥ १ ॥
अमन्त्रेण यजे त्पश्चा दर्घ्यपुष्पानुलेपनैः ।
चियद्धिषट्कमन्त्रेण स्वकेनांगोज्झितेन वै ॥ २ ॥
सकळी करणं कुर्या त्पात्रभूते परात्मनः ।
त मर्चयित्वा विधिव द्वस्त्रस्रगनुलेपनैः ॥ ३ ॥
भगवत्प्रीतिपूर्वन्तु दानं दद्याच्च सोदकम् ।
तेनापि प्रीणनं कार्यं भगवद्भावितात्मना ॥ ४ ॥

दानं ज्ञानात्मतां येन प्रयात्यच्युतवेदिनाम् ।
नारायणपरं ब्रह्म प्रतिशब्दत्व मागतः ॥ ५ ॥
संसारानलतप्तानां भक्तानां मोहशान्तये ।
अत स्तस्य स्वमन्त्रेण मूर्तिदानं समाचरेत् ॥ ६ ॥
द्वादशाक्षरपूर्वेण त्वथवान्येन केनचित ।
अनन्तं त्वमलं त्वेवं क्रोडीकृत्य तदात्मना ॥ ७ ॥
समर्चनीयं विधिव न्मन्त्राकृति यथा सदा ।
एवं दानप्रदानेन यजे न्मन्त्रात्मना परम् ॥ ८ ॥
महन्मन्त्रात्मना चैव पुन स्सद्व्रतसिद्धये ।
ब्रह्म त्वमेति वै येन व्रतिना मभव द्व्रतम् ॥ ९ ॥
अनेन भेदभिन्नं च सदानं यत्पदार्थिनाम् ।
तपो यज्ञं हि विधिवत् ब्रह्म भावनयार्चयेत् ॥ ४२० ॥
यथास्थां मोक्षफलद मचिरा द्विष्णुयाचना ।
नानाद्रव्यांगदेहं य यज्ञं चानेकलक्षणम् ॥ १ ॥
मूर्सतां यज्ञमन्त्रेण नीत्वैवं प्राक्समर्चयेत ।
जुहुया दासमाप्त्यन्तं पूर्णान्ते मोह [क्ष?] मृच्छति ॥ २॥
दानानां च व्रतानां च तपसां यज्ञकर्मणाम् ।
निवेदितव्यं यद्द्रव्यं दत्तं वा यत्र यत्पुरा ॥ ३ ॥
कर्तव्य मनुयागार्थं प्राक्तदेव हि केवलम् ।
तद्भावित मतोऽश्रीया त्पावनं प्रापणान्वितम् ॥ ४ ॥
भवे त्त्रिरात्रं फलदं भक्तानां शुभकारिणाम् ।
किं पुनस्तु समर्थानां चोदनाश्रयिणां तु वै ॥ ५ ॥
दानधर्मरतानां च व्रतिनां यज्ञयाजिनाम् ।
परत्र भयभीरूणा मल्पार्थानां शुभार्थिनाम् ॥ ६ ॥
शमीपलाशश्रीवृक्षै स्समिद्भि श्चामलद्रुमैः ।
अम्भसा चाम्बुमध्येच मन्त्रतर्पण माचरेत् ॥ ७ ॥

समाहि समर्तातेतु मन्त्र मुत्थाप्य मण्डलात् ।
ध्यानयुक्तं जपं कुर्या ल्लक्षसंख्यं समाहितः ॥ ८ ॥
ब्रह्मचर्यस्थितो मौनी दुष्टा हारविवर्जितः ।
क्षारारनाळतैलानां परित्यागी ह्यलोलुपः ॥ ९ ॥
नित्यं कुशाजिने शायी मान मात्सर्यवर्जितः ।
तप्तहाटकसंकाशं परिभ्रमणविग्रहम् ॥ ४३० ॥
भूरिधारासमाकीर्णं वक्त्र मध्ये खगं स्मरेत् ।
तत्राभिसंस्थितं मन्त्र मन्वलं चैव सम्मुखम् ॥ १ ॥
नानारत्नप्रभाकान्ति मुद्गिरन्तं स्वविग्रहात् ।
हेमाद्रिधातुनिचयं चन्द्रकान्तादिसन्मणीन् ॥ २ ॥
एवं ध्याये जपे च्चापि पूजये दन्तरान्तरा ।
नियमा दासमाप्त्येव जपान्ते वित्तप स्स्वयम् ॥ ३ ॥
आज्ञावश्यो विधेय स्स्या दात्मना च धनेन च ।
प्रयच्छत्यर्थिनां कामं भुङ्क्ते सो ऽविरतं स्वयम् ॥ ४ ॥
आयुरारोग्यसंयुक्तो मन्त्रेशस्य प्रभावतः ।
प्रवर्तसैर्थयुक्तानां काम आत्तुत्रभोगिनाम् ॥ ५ ॥
तत्साधन मथो वक्ष्ये साधकानां हिताय च ।
मण्डलंपूर्ववत्कृत्वा शुचौदेशेमनोरमे ॥ ६ ॥
संपूज्यतत्रमन्त्रेशं समाहूयचसंयजेत् ।
त्रिरात्रंसप्तरात्रंवा जुहुयात्तदनन्तरम् ॥ ७ ॥
प्रागुक्तेनविधानेन जपध्यानेसमाचरेत् ।
सर्वाधारमरिन्ध्यायेत् पद्मरागरुचामहत् ॥ ८ ॥
तन्मध्येविद्रुमाभंच बन्धुजीवनिभोज्वलन् ।
ध्यायेन्मन्त्रवरंमन्त्री जपेत्पूर्वोक्तसंख्यया ॥ ९ ॥
स्त्रीभोगंचेतसःकृत्वा जपान्तेसाधकस्ततः ।
प्रार्थयन्तेत्रभीताश्च सन्तप्तामदविह्वलाः ॥ ४४० ॥

देवकिन्नरनार्यस्तु यक्षगन्धर्वकन्यकाः ।
सिद्धास्सुरांगनाश्चान्या नरनागस्त्रियोखिलाः ॥ १ ॥
आजीवावधिवैसम्य क्कर्मणामनसागिरा ।
सेवन्तेसाधकेन्द्रन्तं मन्त्रस्यास्यप्रभावतः ॥ २ ॥
यंयंसमीहतेकामं पाताळोत्तिष्ठपूर्वकम् ।
लक्षजापात्तथाहोमा त्तंतंयच्छतिमन्त्रराट् ॥ ३ ॥
अथकामोपभोगात्तु त्विरतस्यचमन्त्रिणः ।
मोक्षदंसंप्रदायंच कथयिष्येयथार्थतः ॥ ४ ॥
कृत्वायागवरंभूयः प्रसन्नेनान्तरात्मना ।
पूर्वोक्तन्तु यजेत्काळं तत्रमन्त्रवरंक्रमात् ॥ ५ ॥
तर्पयित्वाविधानेन कुण्डेवाथजलेम्भसा ।
सर्वदोषनिवृत्यर्थं प्रायश्चित्तार्थमेवच ॥ ६ ॥
जपेदयुतमेकन्तु प्रागुक्तंवास्वशक्तितः ।
हृत्पुण्डरीकमध्येथ स्मरेन्मन्त्रंसमाहितः ॥ ७ ॥
रोमकूपगणैस्सर्वै रस्रज्वालाशतावृतम् ।
तन्मयश्चस्वचैतन्यं कृत्वातद्वह्निराश्मिभिः ॥ ८ ॥
भूतदेहंदहेत्कृत्स्नं तद्वियुक्तश्चसांप्रतम् ।
मार्ताण्डइवपक्षीश आस्तेमन्त्रस्वरूपधृक् ॥ ९ ॥
अथमन्त्राकृतिस्त्वांवै ध्यायेत्परिणतंशनैः ।
तेजोगोळकसंकाशं सर्वांगावयवोज्झितम् ॥४५०॥
तत्तेजोगोळकंपश्चा द्धृत्परिमितम्त्वपि ।
सर्वंशब्दरूपश्च भावरूपन्तुचिन्मयम् ॥ १ ॥
तस्मादप्यभिमानन्तु ह्यस्मिताख्यं शनैश्शनैः ।
विनिवार्ययथाशश्वत् ब्रह्मसम्पद्यतेस्वयम् ॥ २ ॥
इत्येवं वैभवीयस्य नृसिंहस्यमहात्मनः ।
आराधनंच सर्वेषा मुक्तंसिद्धिसमन्वितम् ॥ ३ ॥

नित्यक्रियापराणांच संसारोद्विग्नचेतसाम् ।
मद्भक्तानामिदंवाच्यं शुद्धानां संयतात्मनाम् ॥ ४५४ ॥

इतिश्रीपांचरात्रे श्रीसात्वतसंहितायां वैभवीयनृसिंहकल्पो नाम
सप्तदशः परिच्छेदः ॥ १७ ॥

अथ अष्टादशः परिच्छेदः ।

नारदः ।

एवमुक्तेसतिपुनः कामपालोमुनीश्वराः ।
उवाचेदं हरिं वाक्यं लोकानुग्रह काम्यया ॥ १ ॥

संकर्षणः ।

सम्प्राप्त प्रत्ययानांच द्विजातीनांच साम्प्रतम् ।
सम्यक्प्रक्षीण पापाना मारूढ़ाना मिहक्रमे ॥२॥
दीक्षात्रयस्य भगवन् ज्ञातुमिच्छामि निर्णयम् ।
यत्प्राप्य भगवद्भक्तः कृतकृत्यो चिराद्भवेत् ॥ ३ ॥

भगवान् ।

शुभेनुकूळे नक्षत्रे तिथौ लग्ने ग्रहेक्षिते ।
भक्ताना मधि वासार्थं क्ष्मापरिग्रहमाचरेत् ॥ ४ ॥
पुण्येदेशेनुकूळेच मनोज्ञे साधुसेविते ।
मृद्वारिफलपुष्पाद्ये समित्कुश समन्विते ॥ ५ ॥
गोसस्यशालि सुभगे क्षुद्रमाणि विवर्जिते ।
तत्र वर्णानुरूपांक्ष्मां गच्छेत्पूर्वोक्तलक्षणाम् ॥ ६ ॥

सर्वदोषविनिर्मुक्तां सत्पक्षि मृग सेविताम् ।
या शुभायतनोद्देशे मंठैर्गोष्ठापणैर्गृहैः ॥ ७ ॥
तोयाशयाश्रमैः क्षेत्रैः सद्वृत्तै रन्तरीकृता ।
जलौघभयनिर्मुक्ता वलाद्युक्ताच सज्जनैः ॥ ८ ॥
वनैरुपवनैर्ग्रामै र्नगराग्रै स्समावृता ।
अलाभेसतिलाभेवा स्वभूमे ब्राह्मणादिषु ॥ ९ ॥
स्वमन्त्रेणार्चनास्स्वत्वं कुर्या द्वर्णं व्यपेक्षया ।
उद्धतां कृतखातांच ज्ञात्वादोषोज्झितांपुरा ॥ १० ॥
शुभमृत्पूरितां कृत्वा लब्धश्शर्मभ रथान्तरा ।
ततस्त्वाकुट्टयेत्पश्चा त्पंचगव्येन सेचयेत् ॥ ११ ॥
युक्तांहेमादिसद्रत्नै स्समीकृत्योपलिप्यच ।
तत्रार्चनं विभोःकुर्यात् ध्यानान्तंचैवपूर्ववत् ॥ १२ ॥
भूतानां बलिदानंच सुरभीणांच तर्पणं ।
द्विजानां दक्षिणान्तंवै ततस्तत्र समापयेत् ॥ १३ ॥
प्राग्दिक्षु सिद्धिपूर्वन्तु मण्टपं मण्डनान्वितम् ।
सुस्तम्भद्वितयेनैव कोणगेनोपशोभितम् ॥ १४ ॥
पार्थिवेनच पीठेन मध्यगेनाविराजितम् ।
विस्तरात्तु द्विजातीनां शूद्रान्तानां समंस्मृतम् ॥ १५ ॥
अष्टाश्रमथवावृत्तं तुर्याश्रंसोपपीठकम् ।
अष्टांगुला त्समुत्सेधा देकापायेन लक्षितम् ॥ १६ ॥
स्वोन्नत्यर्धेनोपपीठं सर्वेषां परिकल्पयेत् ।
विस्तारमुपपीठानां पीठोच्छ्रायाद्द्विसंगुणम् ॥ १७ ॥
उपपीठस्यसंलग्ना तन्मानेनतु चोन्नता ।
आप्यदिक्साग्रहस्ताच सम्पाद्यासनपिण्डिका ॥ १८ ॥
नैवेद्यमुपपीठेतु विनिवेद्यनिधायच ।
तस्यदक्षिणदिग्भागे त्वन्तर्गमनसंयुतम् ॥ १९ ॥

विविक्तलोचनोपेतं पिण्डिकाकुण्डभूषितम् ।
सुकवाटार्गळोपेतं कुर्याद्भवनमण्टपम् ॥ २० ॥
उपक्लिप्याब्जजेन वारिणागोमयेनतु ।
विधिवच्छोभनंकुर्या दित्येवंमण्टपद्वयम् ॥ २१ ॥
विहितो वित्तविरहा दधिवासो द्विजालये ।
शिष्यैर्वाचार्यभवने तत्रकुर्यात्परिग्रहम् ॥ २२ ॥
प्राग्वदर्चनपूर्वन्तु भूततर्पणपश्चिमम् ।
ओदनंदधिलाजाज्य मधुतोयपरिप्लुतम् ॥ २३ ॥
भूततर्पणमित्युक्तं तद्विनातत्रतेनिशाम् ।
सन्तिष्ठन्तेबहिःक्रुद्धाः कांक्षमाणाःपरंवधम् ॥ २४ ॥
अतश्चविहितंयत्ना त्स्थानेक्षेत्रे कृतेसति ।
निर्विघ्नसिद्धयेदद्या द्बलिंसर्वत्रसर्वदा ॥ २५ ॥
कृत्वेवम्मंगळार्थंतु दीर्घं घण्टारवं शुभम् ।
स्वपदा त्प्राग्वदुत्थाप्य प्रोच्चार्यप्रणवम्महत् ॥ २६ ॥
प्रवेशयेत्ततस्तस्मिन् लाजान् सिद्धार्थकान् शुभान् ।
फलानिश्रीफलादीनि चन्दनादीनि रोचनाम् ॥ २७ ॥
श्वेतपूर्वास्सुमनस स्सन्महीरुहमञ्जरीम् ।
साग्रान् हरित दर्भांश्च सर्वरत्नानि काञ्चनम् ॥ २८ ॥
सर्वौषधीरवगलाद्यं सुगन्धिनिचयं शुभम् ।
पद्मकं शंखपुष्पंच विष्णुक्रान्ताच कुन्दरम् ॥ २९ ॥
सप्तसप्तचधान्यानि बीजानिच समानिषट् ।
शालिश्यामाकनीवार तण्डुलं भूरिसंस्कृतम् ॥ ३० ॥
गोसम्भवानिवैपंच पात्रेष्वौदुम्बरेषुच ।
तत्स्थावविवर्जितान्यानि तान्येव सुबहून्यपि ॥ ३१ ॥
प्रतिक्षणोपयोगार्थं भाण्डेष्वपि नवेषुच ।
पाद्याचमनकार्यार्थं दद्यन्नं विनिवेदने ॥ ३२ ॥

हेमाद्युत्थानिपात्राणि सुदुपर्णपुटानिवा ।
पाण्डराणिदुकूलानि वस्त्रयुग्मद्वयन्नवं ॥ ३३ ॥
उपवीतंसोत्तरीयं सुसितेधौतवाससी ।
कौशेयानिपवित्राणि कंकणंसांगुळीयकम् ॥ ३४ ॥
स्फाटिकश्चाक्ष सूत्रंच पत्राक्षन्तु गुणित्रिकं ।
पंचलोहमयंचक्रं सशंखं द्वादशारकं ॥ ३५ ॥
कृतपंयोगपट्टंच नेत्रवस्त्रं मृगाजिनं ।
वृषीकाशांशुकंपट्टं पादुकेचउपानहौ ॥ ३६ ॥
दण्डंप्रतिग्रहंछत्रं पूर्णगोधूमकाष्टकम् ।
चतुर्वर्णानि माल्यानि सुन्दरंपावनंलघु ॥ ३७ ॥
नीलशाद्वल सम्मिश्रं हरितंपत्रसंचयम् ।
गुग्गुलुंमृष्टधूपंच दीपतैलंच वर्तयः ॥ ३८ ॥
दर्पणंधूपपात्रंच घण्टामर्घ्यादिपात्रकं ।
रजांसिकरणीयुग्मं शालिकां घटिकांसितां ॥ ३९ ॥
पंचांगुळन्तु सुदृढं हेमाद्यंकुशपंचकम् ।
अलक्तरञ्जितं सूत्रं सुशिता कर्तरीक्षुरम् ॥ ४० ॥
काण्डान्यष्टौतु साग्राणि बर्हिपक्षान्वितानि च ।
सोन्नतानि स्थिराग्राणि लोहहत्काष्ठजानि वा ॥ ४१ ॥
रंजितानि सुधाद्यैस्तु तदाधाराणि यानि च ।
कुल्लिका न्यम्बुकुम्भानि भृंगारं करवीं शुभाम् ॥ ४२ ॥
अकालमूलनिर्गर्भं साधारं कलशं तथा ।
स्थालीं कमण्डलुं दर्वीं सपिधानन्तु चुल्लिकाम् ॥ ४३ ॥
भद्रपीठं चतुष्पादं चतुरश्रायत त्रवम् ।
मात्रायितं सताम्बूलं दन्तधावनसंचयम् ॥ ४४ ॥
शुष्कगोमयसंयुक्ता मरणिं चाग्निजं मणिम् ।
पालाशदूर्वासमिध स्सदाग्राः परिधयस्तु वै ॥ ४५ ॥

प्रभूत मिन्धनं शुष्क माज्यास्कं तिलतण्डुलम् ।
प्राग्युक्तं स्रुक्स्रुवाद्यं च होमोपकरणं च यत् ॥ ४६ ॥
सर्वं पक्ष्मकपर्यन्तं बृहत्पात्रद्वयान्वितम् ।
पूर्वोक्तानां च भोगानां मध्याद्यत्स्थण्डिलार्चने ॥ ४७ ॥
संयाति चांगभावं तत ज्ञात्वा सर्वं प्रवेशयेत् ।
अनुग्रहधिया चार्यो भक्तानां भाविनां विभोः ॥ ४८ ॥
दिव्यभोगोपलिप्सूनां निश्रेयस पदार्थिनाम् ।
[प्रत्येकैकं हि यत् गांगे वर्धयेत द्रव्यमूर्तिना ।
नित्येनाव्यक्ततत्वेन सन्मन्त्रब्रह्मणासह ॥]
सार्धं सप्प्यादिकं दद्या न्मन्त्रव्यूहं यथागमम् ॥ ४९ ॥
फलदं स्या त्सकामाना मकामानां हि मोक्षदम् ।
सह साध्य स्तत स्तत्र प्राग्वत्स्नात्वा कृताह्निकः ॥ ५० ॥
सम्प्रविश्याप्य दिक्संस्थः प्राङ्मुखः प्रविशे त्ततः ।
पद्मासनादिना मार्गे चर्मण्याचामपूर्वकम् ॥ ५१ ॥
कुर्या द्यदधिकारेण मन्त्रेणानुग्रहं शिशोः ।
तेनांगसहितेनैव सर्वं कर्म समाचरेत् ॥ ५२ ॥
समस्तैर्वैभवैर्मन्त्रैः कार्यो वा नुग्रहो यदि ।
सर्वाराधनदानार्थं वा द्विषट्कामये तदा ॥ ५३ ॥
विशाखयूपमन्त्रेण कुर्या त्तद्धारणाद्वयम् ।
तद्बीजेन तनुं व्याप्य प्राग्वत्तदभिमन्त्रितैः ॥ ५४ ॥
पुरा हृते यथाशक्ति मण्डनं च समाचरेत् ।
प्राक्समालभने वस्त्रैः कटकाद्यंगुळीयकैः ॥ ५५ ॥
सितोष्णीषेग महता सितमाल्येन वै सह ।
मुखवासे स्सताम्बूलै र्ललाटतिलकेन च ॥ ५६ ॥
कृत्वा शुभेन शारीरं योगपट्टेन संस्थितम् ।
हृत्पुण्डरीकमध्ये तु संन्यस्ये द्बीज मैश्वरम् ॥ ५७ ॥

करयोः पद्मनाभीयं ध्रुवाख्य मथ विग्रहे ।
शेषे राजभ्य पादान्त मामूर्ध्नश्चापि पूर्ववत् ॥ ५८ ॥
हस्तयो विग्रहे सांगं विन्यस्ये द्बीज मैश्वरम् ।
मुद्रावसानं कृत्वैव सम्य क्तदनु चाहरेत ॥ ५९ ॥
पाणिभ्यां शंखचक्रे द्वे स्वमन्त्रेणाभिमन्त्रिते ।
भूत्वा तदात्मना पश्चा त्ते निधाय धरातले ॥ ६० ॥
अवलोकयाखिलं तत्स्थं प्रवर्तेताथ कर्मणि ।
अस्त्राभिमन्त्रितं कृत्वा कर्मभूगान्तरे स्थितम् ॥ ६१ ॥
तेनोपलिप्य सम्माज्यं यागस्थानं निघृष्य च ।
तद्ब्रह्माख्या मधो भूय स्तेजसो हि विवृद्धये ॥ ६२ ॥
हेमपूर्वाणि रत्नानि बीजानि विनिवेश्य च ।
गालितेनाम्भसा पूर्यं ततः पात्रचतुष्टयम् ॥ ६३ ॥
एकस्मिन् चन्दनादीनि पुर्वं सिद्धार्थकानि च ।
साक्षतानि कुशाग्राणि तण्डुलानि तिलां स्तु वै ॥ ६४ ॥
सरत्ना नुत्तमान् धातून् सफला न्विनिवेशयेत ।
द्वितीये दधिमध्वाज्य क्षीरबिन्दुचतुष्टयम् ॥ ६५ ॥
कुशाग्रेण सबाह्लीकं सपुष्पं सिततण्डुलम् ।
दूर्वांसविष्णुक्रान्तां च श्यामाकं शंखपुष्पिकाम् ॥ ६६ ॥
पद्मकं च तृतीये तु कुन्दरेण समन्वितम् ।
त्वगेलाद्यचयं सर्वं सकर्पूरं च चन्दनम् ॥ ६७ ॥
विनिक्षिप्य चतुर्थे तु द्रव्यं सर्व मिदं शुभम् ।
हृन्मन्त्रेण चतुर्णान्तु कुर्या द्वै द्रव्ययोजनम् ॥ ६८ ॥
सास्त्रेणमूलमन्त्रेण सर्वतच्चाभिमन्त्रयतु ।
सषडंगेनतेनैव कुर्यात्पुष्पादिनार्चनम् ॥ ६९ ॥
यथाक्रमेणसर्वेषां ध्येयं सर्वं सुधोपमम् ।
आवाहनेसन्निधाने सन्निरोधेतथार्चने ॥ ७० ॥

विसर्जनेर्घ्यदानन्तु भक्षपात्रान्नित्यमाचरेत् ।
तदम्भसाचाहंणन्तु तथैवपरिषेचनम् ॥ ७१ ॥
कुर्यात्प्रणयनंदानं प्रीणनंप्रीतिकर्मच ।
प्रोक्षणंसर्ववस्तूना मन्यस्मादुदकेनतु ॥ ७२ ॥
आरम्भेसर्वकार्याणां तत्समाप्तौतथैवहि ।
ऊनाधिकानां साम्येतु ज्ञातव्यं त्वघशान्तये ॥ ७३ ॥
कार्यं तदर्घ्यदानञ्च नित्यम्मन्त्रात्मनाविभोः ।
कुम्भोपकुम्भकुण्डानां मन्त्रास्त्रकलशार्चने ॥ ७४ ॥
सम्पूजनेच भूतानां गुर्वादीनाम्महामते ।
दक्षशिष्यात्मपूजार्थं मुक्तानुक्तार्चनम्मति ॥ ७५ ॥
पाद्यदानंतृतीयात्तु नित्यंपात्रात्समाचरेत् ।
चतुर्थात्तुयथाकालं दद्यादाचमनन्ततः ॥ ७६ ॥
मुख्यार्घ्यवारिणाप्रोक्ष्य पृथग्भाण्डस्थितम्पुरा ।
पञ्चगव्यन्ततःप्राग्व त्कल्पनीयं हृदादिकैः ॥ ७७ ॥
कुशोदकन्तदर्धेन दत्वाघेनाभिमन्त्र्यच ।
अथपाणिद्वयेनैव अग्नीषोमात्मकेनच ॥ ७८ ॥
योग्यतापदवींनीत्वा प्रोक्षयेद्यत्पुराहृतम् ।
साम्भसातेनवैसर्वं विष्टराग्रगतैःकुशैः ॥ ७९ ॥
सर्वबीजानि धान्यानि सिद्धार्थक युतान्यथ ।
कृत्वास्त्र परिजप्तानि ध्यात्वाचास्त्रसमानिच ॥ ८० ॥
विघ्नोपशान्तयेवेगा द्दशदिक्षु विनिक्षिपेत् ।
संहृत्य बर्हिकूर्चेन प्राच्यान्दिशि निधापयेत् ॥ ८१ ॥
तद्गर्भीकृत्यसंलिख्य हेतिराट्चन्दनादिना ।
करवीं कुम्भसंयुक्ता मलंकृत्य यथापुरा ॥ ८२ ॥
भोगैः प्रावरणान्तैश्च मूर्तिभूतो विचिन्त्यच ।
तद्दृढवाशरीरन्तु पश्येदंवरवत्कुम्भं ॥ ८३ ॥

विशाखयूपं तन्मध्ये समावाह्ययजेत्ततः ।
क्रमान्मुद्रावसानन्तु तस्यदक्षिणदिग्गतम् ॥ ८४ ॥
भक्तविग्रहरूपश्च स्मृत्वाकुरवकन्तुतत् ।
भक्तमन्त्रन्तु तन्मध्ये ध्यात्वाभ्यर्च्येयथाविधि ॥ ८५ ॥
ध्वंसयन्तत्त्वं विघ्नानां कालंकर्मावसानकम् ।
इदमभ्यर्थयेद्विद्वान् साष्टांगबद्धांजलिस्स्थितः ॥ ८६ ॥
यागालयंहिविश्वेश गृहाणरचितम्मया ।
आसमाप्तिभजविभो क्रियांगानांचसान्निधिम् ॥ ८७ ॥
ततोम्बोदकधाराञ्च ह्यच्छिन्नांभित्तिकांनयेत् ।
प्रदक्षिणेनप्राग्भागा त्तत्पदान्तेचसंस्मरेत् ॥ ८८ ॥
सन्निधायाघकुम्भेन सहकुर्यात्प्रदक्षिणम् ।
अर्घ्यदानन्ततःकृत्वा प्राग्भागेचाधरोर्ध्वगम् ॥ ८९ ॥
पूजितंवाससाच्छन्नं चक्रमन्त्राभिमान्त्रितम् ।
निदध्याद्भद्रपीठन्तु तत्राधारगतंन्यसेत् ॥ ९० ॥
साष्टांहिमन्त्रकलश मर्चयित्वाप्रणम्यच ।
दिगीश्वरगणांदिक्षु पूर्वोक्तांविन्यसेत्ततः ॥ ९१ ॥
ततस्समर्चनन्तेषां कृत्वास्त्रेणहृदाथवा ।
प्रणवेनस्वनाम्नाच नमस्कारानुगेनवै ॥ ९२ ॥
तोरणध्वजपूर्वाणां कार्यमर्घ्यादिनार्चनम् ।
ततोभवनभूमध्ये ध्यात्वापीठं पुरोदितम् ॥ ९३ ॥
तत्रार्चनंविभोःकुर्या त्पूर्वोक्तेनक्रमेणतु ।
पूर्णान्तन्तर्पणम्मान्त्र त्कृत्वाकुण्डेथपूजिते ॥ ९४ ॥
ततस्तुभगवद्भूतान् क्षेत्रनाथसमन्वितान् ।
अर्घ्यपुष्पादिनाभ्यर्च्य बलिमादायपात्रगम् ॥ ९५ ॥
इदमुक्त्वाचतद्द्रव्यं क्षिपेद्यागगृहाद्बहिः ।
येविष्णुभाविनोभूता येचतेष्वनुमानिनः ॥ ९६ ॥

आहरन्तु बलिं तुष्टाः प्रयच्छन्तु शुभं मम ।
प्रक्षालिताङ्घ्रिस्स्वाचान्त स्संविशेद्यागमन्दिरम् ॥ ९७ ॥
अथगेहं तु संस्कृत्य चुल्लीं प्राग्दिश्यवास्थिताम् ।
पचनालयमुत्सृज्य स्वदेशात्कुण्डमध्यगाम् ॥ ९८ ॥
स्थालींचास्त्रेणसंक्षाल्य बाह्यतोगोमयेनतु ।
विलिप्यान्तस्सुगन्धैस्तु प्रताप्यज्वालितैःकुशैः ॥ ९९ ॥
सन्ताड्यकुसुमास्त्रेण सितसूत्रेणकण्ठतः ।
चतुर्धावमजप्तेन संवेष्ट्याद्यर्घादिनाचर्यच ॥१००॥
चुल्ल्यांकृत्वासमारोप्य तस्यां मधु घृतं पयः ।
परिशुद्धैश्रितक्षीरे त्वस्त्रेणारोप्यतण्डुलान् ॥ १ ॥
चालयेन्मूलमन्त्रेण दृष्ट्वानेत्रेणसंस्कृतम् ।
हृदावतार्याभिघार्य शिखामन्त्रेणघट्टयेत् ॥ २ ॥
शिरसालिप्यसंक्षाल्य सुप्रसन्नेनवारिणा ।
भूतिनाचन्दनाद्येन भूषयेदूर्ध्वपुण्ड्रकैः ॥ ३ ॥
विष्टरोपरिचान्यत्र निदध्यान्मण्डलान्तरे ।
होमंतत्तिलद्वयेकृत्वा पूर्णांतमथवैचरोः ॥ ४ ॥
आधारदानमाज्येन कुर्यात्तेजोमृतात्मकम् ।
ईशाञ्जनाभरुद्धेन हंसार्णेनसबिन्दुना ॥ ५ ॥
तद्वद्वौषट्वषट्कार प्रणवाद्वितयेनच ।
यतापिन (?) भातोत्र स्थितिद्वाभ्यांच सांप्रतम् ॥ ६ ॥
अतः पुरोदितेनैव तदन्नंसम्पुटेनच ।
अथ ऊर्ध्वंचसञ्छन्नं स्मरेदादायवैहृदि ॥ ७ ॥
द्रव्यसम्पातहोमेथ पूर्णांतेतुकृतेसति ।
उद्धृत्याहुतियोगेन पत्रेकुत्रयगन्तुतत ॥ ८ ॥
स्थण्डिलेकलशेतोच विनियुज्ययथाविधि ।
तदाद्यभाविंशेषं कुशाक्रान्तंविपत्स्यच ॥ ९ ॥

क्रमान्मूलाख्यनेत्रेण जुहुयाच्चशतत्रयम् ।
नीत्वासम्पूर्णभावंच पूर्णयापुनरेवाहि ॥ ११० ॥
ततश्चोत्तरतःकुर्या न्मण्डलंगोमयादिना ।
प्राक्प्रान्तंविष्टरंतत्र दद्याद्दर्भहृदन्तरे ॥ १ ॥
तन्मध्येविन्यसेच्छिष्यं समांघ्रि स्तब्धविग्रहम् ।
प्राङ्मुखंयतवाक्चित्त वित्तिरूपन्धृताञ्जलिम् ॥ २ ॥
अस्त्रेणमन्त्रवरःकुर्या त्प्रोक्षणन्तस्यचांभसा ।
तेनैवताडयेन्मूर्ध्नि दर्भैस्सिद्धार्थकैस्तिलैः ॥ ३ ॥
अनादिवासनोत्थानां बन्धानांचालनायच ।
फडन्तेनाथचास्त्रेण कुशाग्रेणांघ्रिगोचरात् ॥ ४ ॥
समुल्लिख्यशिखान्तंच ऋज्वर्धमार्गसन्ततेः ।
जालवन्मन्त्रजालेन व्याप्तंस्मृत्वाचसंवृतम् ॥ ५ ॥
बध्नीयान्नेत्रमन्त्रेण तस्यनेत्रेचवाससा ।
वस्त्वर्ध्यकुसुमैर्गन्धैः कृत्वापूर्णाञ्जलिंपुरा ॥ ६ ॥
पाणिनादायचाग्रेवा निधायाग्रास्थितंवटुम् ।
प्रक्षेपयेद्देवधाम्नि ततमूर्ध्नाञ्जलिंचतम् ॥ ७ ॥
तस्योद्घाटितनेत्रस्य त्वदृष्टस्येतरैर्जनैः ।
कुशलाध्वनिविष्टस्य दृष्ट्वाविभक्तिलक्षणम् ॥ ८ ॥
रोमांचोत्सुकयहर्षाढ्य मानन्दाश्रुसमन्वितम् ।
सप्रणामजयालाप दिक्प्रदक्षिणसंयुतम् ॥ ९ ॥
शुद्धान्तःकरणंबुध्वा योग्योयमितिभावयेत् ।
यदातदाच्युतात्मान मात्मानंभावयंस्ततः ॥ १२० ॥
स्मरेद्दक्षिणपाणौतु चक्रांबुरुहमध्यगम् ।
प्रधानदेवतावृन्दं स्वेस्वेधाम्निपरेस्थितम् ॥१॥
स्वमरीचिगणेनैव द्योतयन्तन्तुचाखिलम् ।
तेनाच्युतकरेणैव सोदकेनालभेततम् ॥ २ ॥

पुष्पपूर्णाञ्जलौपृष्ठे तस्यतन्नियाश्रितम् ।
कृत्वामन्त्रगणन्तंचै मोक्षविघ्नविशान्तये ॥ ३ ॥
पुनरभ्यर्चये न्नीत्वा मन्त्रेण परमेश्वरम् ।
आधाराधेयभावेन बुध्वान्तस्तांस्थिति पुरा ॥ ४ ॥
क्ष्मादीनां बुद्धिनिष्ठानां वासनानां तथात्मनः ।
ततः कुर्याच्च विश्लेषं तेषां ध्यानार्चनादिना ॥ ५ ॥
आत्मतत्वं समाश्रित्य कर्मचक्रं हि वर्तते ।
तच्चक्र मवलम्ब्यास्ते बुद्धिनिष्ठं हि समकम् ॥ ६ ॥
अज्ञानव्यापकत्वं च सुखदुःखादिवेदनम् ।
सर्वज्ञस्यात्मतत्वस्य कर्मचक्रावलम्बनात् ॥ ७ ॥
चपलं कर्मचक्रंत द्वर्धमानं सदैव हि ।
क्ष्माद्य माधार माश्रित्य तावदेवावतिष्ठते ॥ ८ ॥
याव त्सर्वज्ञशक्त्या वै कर्मात्मानप्रबोधितः ।
प्रबुद्ध स्तस्य संरोधं कर्तुं शक्नोति सर्वदा ॥ ९ ॥
मन्त्राराधनपूर्वेण ज्ञानानुष्ठानकर्मणा ।
अतो य आश्रयः क्ष्माद्य स्तत्वसारो हि पौरुषः ॥ १६० ॥
नीरसं चेरिणी भूतं कुर्या त्संस्थाप्य सांप्रतम् ।
निर्मुक्तचित्फलो येन कर्मवृक्षो विनश्यति ॥ १ ॥
शुद्ध्यर्थ मात्मन स्तस्मा त्सर्वज्ञस्याग्रत स्स्थले ।
भूताधिदेवमन्त्राणां कुर्या द्वै पूजनं क्रमात् ॥ २ ॥
चिन्तानुविद्धं सामान्य म्मन्त्रनाथै राधिष्ठितम् ।
क्ष्माद्यध्वानश्च बुद्ध्यन्तं ध्यात्वा षट्प [पु] त्रवत्पुरा ॥ ३ ॥
तत्र मध्ये त्वजनाभन्तु प्राग्भागे केसरोद्वहम् ।
षट्कश्च विश्वरूपाद्यं क्ष्माधारान्तन्तु विन्यसेत् ॥ ४ ॥
नीत्वा स्वनाम्न आद्यर्णं क्ष्मान्तानां बीजतां पुरा ।
तेन तेषां बलान्तस्थं प्राग्वन्न्यासं स्मरेत् क्रमात् ॥ ५ ॥

क्ष्माबीजश्च दळाग्रेषु मूलनिष्ठेषु षट्सु च ।
इष्ट्वा सर्वेन्द्रियाधार मित्यभिन्नं पुरा ततः ॥ ६ ॥
चिद्धातुस्कन्धवृन्देन स्वस्थितेनान्तरीकृतम् ।
उपर्युपरि योगेन बुद्ध्यन्तं समुपस्थितम् ॥ ७ ॥
भेददृष्ट्या यजे त्सम्यक् भूय स्संहारवर्त्मना ।
सवज्रं स्वेन बीजेन पीतं तुर्याभिळक्षणम् ॥ ८ ॥
हेमाब्जभूतं तद्ध्यात्वा क्ष्मातत्वं तत्र मध्यतः ।
वाराहं संयजे न्मन्त्रं साङ्गं सावरणं क्रमात् ॥ ९ ॥
तत्कारणाश्रितं कृत्वा परिधानसमन्वितम् ।
अथ क्ष्मामण्डलोर्ध्वस्थ मर्धेन्दुसदृशं स्थितम् ॥ १४० ॥
पुरं पद्मांकितं स्मृत्वा सितपद्मोदरं महत् ।
सरश्शयन्तदन्तस्स्थ मभिसन्धाय संयजेत् ॥ १ ॥
तेजोमयं तदूर्ध्वेतु त्रिकोणं भावये त्पुरा ।
स्वज्वाळाकणाकीर्णं स्वस्तिकै रुपलांछितम् ॥ २ ॥
नृसिंहं पूजये त्तत्र मध्ये रक्तारविन्दगम् ।
तस्योपरि सितं वृत्तं पुरं तारागणांकितम् ॥ ३ ॥
स्मृत्वा नीलाम्बुजाक्रान्तं स्मरे त्तत्र खगासनम् ।
नीरूपंच तदूर्ध्वेतु स्मरे त्स्वच्छन्दे रलक्षणम् ॥ ४ ॥
ध्यायेत्तदन्तस्सूर्याभं प्राग्वर्णंतुसपंकजम् ।
तत्रवागीश्वरन्देव मभ्यर्च्यविधिवत्ततः ॥ ५ ॥
तत्कर्णिकोदराकाशे नानारत्नरुचिन्ततः ।
संस्मरेत्कमलाकारं चित्तवृत्तिमयन्तुयत् ॥ ६ ॥
यजेत्तन्मध्यगांविश्व रूपन्तुमनसःपतिं ।
तदूर्ध्वेमृतगर्भन्तु शीतांशुकरकोटिवत् ॥ ७ ॥
पद्मंस्वेनात्मनात्मानं धारयन्तंविभाव्यच ।
समभ्यर्च्यस्तदन्तस्स्थो प्यब्जनाभोधियाम्पतिः ॥ ८ ॥

एवंगन्धरस रूप स्पर्शशब्दमनोधियां ।
क्रमेणाधीशसंयन्तु अवतार्यपराद्यजेत् ॥ ९ ॥
अर्चयित्वार्चयित्वाच न्यसेत्तत्रैवतम्पुनः ।
येवर्णाभूतयोनीनां रश्मयाःकमलोपमाः ॥ १५० ॥
संस्थितिसंस्मरेत्तेषा मात्मिशक्तो तथागतिं ।
स्नानादिवासनारूपा स्वभेदे नात्मनिस्थिताम् ॥ १ ॥
निश्शेषबीजरश्मीद्ध पद्मानां भाविधारिणीं ।
निर्गतांविषयात सत्या द्वियुक्तांस्वामिनाकृतां ॥ २ ॥
क्षरदूपापरिभ्रष्टा भिराधारांच संस्मरेत् ।
प्रणवेनसमभ्यर्च्य दिक्षुकालेभ्युपस्थिते ॥ ३ ॥
साधिभूताधिदैवश्च इष्टैवंभूतसप्तकम् ।
स्वयमभ्यर्चयेत्पश्चात शिष्यमञ्जलिनाश्रितम् ॥ ४ ॥
ततोग्नेस्सन्निधिंगत्वा ध्यात्वायामत्रयोपरि ।
दक्षिणेनात्मनोदार्भे विष्टरेचक्रमन्दिरे ॥ ५ ॥
सकुशेनस्वहस्तेन दक्षिणंचरणंगुरोः ।
अवलम्ब्यसमास्तवे स्पर्शनाचेकतात्मना ॥ ६ ॥
बीजेनांत्रे शिखान्तश्च स्मरेत्तायमयंविभुम् ।
विशोषयन्तंसहसा ज्ञानाधार्थमविग्रहम् ॥ ७ ॥
संस्कारचक्रंविविधं प्रेरकं दुःखवर्त्मनि ।
नास्यैक्य मभिसन्धान मभिसन्धानचेतसा ॥ ८ ॥
विश्लेषंकर्मणांतद्ध द्वर्मणास्त्रेण होमयेत् ।
क्रमेणसघृतानांच तिलानां द्वादशाहुतीः ॥ ९ ॥
अनसन्धाय सम्पाद्यो मयायं वैपरात्मनि ।
दद्यादष्टावाहुतीश्च मूलेनसघृताःपुरा ॥ १६० ॥
तद्धुसमाङ्गं संस्पृष्ट्वा स्रुवेणाज्यान्वितेनच ।
हुत्वाज्ञान पदेनैव भूयस्सर्वं कुणात्मना ॥ १ ॥

प्राक्संख्यमाचरेद्धोम मन्त्रराान्तरयोगतः ।
आचेश्वरपदात्सम्यक् मेवान्तंह्येवमवहि ॥ २ ॥
इतिसम्पातहोमोवै सम्पन्नेसतिजायते ।
कर्तव्यो मन्त्रमाहात्म्यात् संस्कारै निखिलैर्युतः ॥ ३ ॥
साम्प्रतं चाणिमादीनां गुणानां मुत्तरत्रतु ।
विभोराराधनात्सम्यक् योग्याभ्यासाञ्च भाजनं ॥ ४ ॥
कृतेसम्पातभवने आज्येचाथ सकृत् सकृत् ।
मन्त्राणां तर्पणंकृत्वा सार्चनं आधयेद्विभुम् ॥ ५ ॥
अस्यकर्मात्मतत्वस्य कर्मपिण्डं [त्रितयं] सवासनं ।
यदनेकप्रकारन्तु स्वच्छत्वया स्तंभितंमया ॥ ६ ॥
प्रायश्चित्तनिमित्तन्तु जुहुया त्तदनन्तरम् ।
बीजेनान्तर्निरुद्धेन स्वांगेनाकृतिकाष्टकम् ॥ ७ ॥
एतावता महाबुद्धे जन्तो जन्माश्रितस्य च ।
यातिव्यामिश्ररूपस्य हेयरूपस्य संक्षयः ॥ ८ ॥
मोक्षैकफलदो धर्म उपादेय स्त्वनन्तरम् ।
योसौ साम्मुख्य मायाति विविध स्तस्य चाच्युतः ॥ ९ ॥
येनान्तर्लीन मभ्येति ज्ञानं सहसाक्षयम् ।
अथादायारुणं सूत्रं कृत्वा नैकगुणं पुरा ॥ १७० ॥
निरीक्षितं दृशा चास्त्र वारिणा परिशोधितम् ।
तदंगुष्ठावधि यावत् शिखान्ता त्सम्प्रधार्य च ॥ १ ॥
संस्मरे त्सर्वदुःखानां सम्बन्धानां तदास्पदम् ।
संविश्य देषयानेन शिशुचैतन्यसन्निधिम् ॥ २ ॥
हुंफडन्तं च शिरसि नाम च प्रणवादिकम् ।
हृन्मन्त्रसम्पुटस्थं च कृत्वा वै पितृवर्त्मना ॥ ३ ॥
आनीय सह सूत्रेण नये त्रेत्रेण साम्यताम् ।
अभ्यर्च्यार्घ्यादिना वेष्ट्य कवचनात्मना मना ॥ ४ ॥

ॐ हुं अदन्यै [स्व] हुं स्वाहेत्यनेना [हु] कृतिसप्तकम् ।
हुत्वास्त्रमन्त्रजप्तेन सितेन रजसा ततः ॥ ५ ॥
सन्ताख्यं शैशवं कायं विशे त्तदवधि तथा ।
विश्लेषयामुकं त्वया त्पदं वीर्यपदानुगम् ॥ ६ ॥
तं ज्ञात्वा नवता [चक्रे] नाथ त्वाद्यन्तेन विकृष्य च ।
स्वबुद्ध्यानुगतं कृत्वा ध्यात्वा नक्षत्रगोळवत् ॥ ७ ॥
सन्ताख्याभ्यन्तरे सूत्रे हंसार्णेन सबिन्दुना ।
नदीप्रणवगर्भेण रूढशक्तिं च विग्रहे ॥ ८ ॥
वासनामय मित्येव मासिवाह्निकसंज्ञकम् ।
सूत्रात्मकं वपुः कृत्वा आत्मशक्त्या विभावितम् ॥ ९ ॥
बळमन्त्रेण संरुद्धं तदर्थं जुहुया ततः ।
उक्त्वा ओमात्मने स्वाहा द्विषट्कपरसंख्यया ॥ १८० ॥
आदाय भाविनो बन्धा न्व्यापकान् शुद्धभोगदान् ।
ज्ञानादय स्समाश्रित्य येऽत्र तिष्ठन्ति सर्वदा ॥ १ ॥
स्वस्थानेषु स्वमन्त्रेभ्य स्तां स्तत्रैव च योजयेत् ।
यथाक्रमेणार्चितानां कृत्वा तेषां च तर्पणम् ॥ २ ॥
अथ संस्कारचक्रस्य तत्त्ववृन्दाश्रितस्य च ।
सर्वगस्यापि वै विद्धि स्थितिं नियतलक्षणाम् ॥ ३ ॥
तत्त्वव्याप्ति च्छलेनैव शरीरे पांचभौतिके ।
गुल्फजानुकटीवक्षः कर्णभ्रूकावटावधि ॥ ४ ॥
बुद्ध्यन्तानां धरादीनां क्रमा दवनिसप्तकम् ।
अहंकार स्तदुत्थास्तु ये भेदा विविधा अपि ॥ ५ ॥
च्चित्तजा अपि येचान्ये तिष्ठन्ति मनसा सह ।
सकाळोत्था स्तथा बौद्धा स्तत्पूर्वा स्स्वपरे च ये ॥ ६ ॥
अनेकभेदभिन्ना स्तु श्रिता आश्रित्य ते धियम् ।
द्विसप्तभुवनं विश्व मनेकरचनान्वितम् ॥ ७ ॥

शतकोटिप्रविस्तीर्ण मष्टधोन्मुख्य सेवितम् ।
स्थिरं धराश्रितम्भूयो बोद्धव्यं सर्वदैवहि ॥ ८ ॥
चतुष्कं जाग्रदाद्यं य त्पदाना मप्सु वर्तते ।
मन्त्रकोटिसहस्राणां विविधानां महामते ॥ ९ ॥
योगसिद्धिसमेतानां संस्थिति स्तैजसे पदे ।
चातुरात्मीयतत्वानां ज्ञेयः कैवल्यदेहिनाम् ॥ १९० ॥
शान्तोदितस्वरूपाणां सन्निवेशो मरुत्पदे ।
अनेकशक्तिभूतानां ज्ञानादीनां च लांगलिन् ॥ १ ॥
कालाना माश्रयो व्योम या सा मूर्ति र्न लक्ष्यते ।
संस्थिता श्चादयो वर्णाः पदे षष्ठेतु मानसे ॥ २ ॥
अग्निमन्मात्रानुरक्तानि कीर्तितेस्मिन् षडध्वनि ।
क्षिपंस्तु चाहरंस्त्वेवं शुद्ध्यर्थं लीलयेव हि ॥ ३ ॥
स स्थितः कर्मतत्वानि बुद्धिशक्तिपदे प्रभुः ।
निरस्तदोषं कृत्वा प्रा क्समाविश्य तदैवहि ॥ ४ ॥
स्वां शक्ति मुपसंहृत्य शान्ति मभ्येति शाश्वतीम् ।
मधुसूदनपर्यन्तं पातालशयना दथ ॥ ५ ॥
सप्तकं सप्तकं षट्कं सम्पश्ये त्क्ष्मादिपञ्चके ।
मनस्यवस्थितं ज्ञेयं शक्तीशा त्त्रितयं हि यत् ॥ ६ ॥
बुद्धौ कमलनाभात्मा देव स्सर्वेश्वरः प्रभुः ।
पुन स्स्वसिद्धे र्युक्तानां सर्वेषां पार्थिवे पदे ॥ ७ ॥
द्विसप्तभेदभिन्नेतु बोद्धव्या संस्थिति श्शुभा ।
तीव्रमन्दादिकं बुध्वा भावं भक्तिसमन्वितम् ॥ ८ ॥
आलम्बनवशा त्कुर्या त्सर्वेषां स्वपदे स्थितिम् ।
एषा वैभवदीक्षाया मधिवासनकर्मणि ॥ ॥ ९
क्रम उक्त स्त्वथेदानी मपरायां निबोधतु ।
आपदा त्राभिदेशं च महाभूते र्धरादिकैः ॥ २०० ॥

व्याप्तं चतुर्था वाय्वन्ते स्तदूर्ध्वं नभसा पुनः ।
पूरितं हृदयान्तं च तदुद्देशा च्छिखावधि ॥ १ ॥
विभाव्य मनसा व्याप्त मनेनैव क्रमेण तु ।
स्थित स्संकर्षणान्ता श्वा प्यनिरुद्धादय स्तु वै ॥ २ ॥
समाक्रम्याध्वषट्कन्तु बुद्ध्यातीतास्तु बुद्धिगः ।
समादायात्मतत्वं च प्राग्वदभ्येत्य मूर्छि [ति] ताम् ॥ ३ ॥
व्यापिका मूर्तय स्त्वेताः पृथकभक्तिपरायणैः ।
तदाकारे स्सं(ल्ये) स्तु संभूताः क्ष्मायनीषु च ॥ ४ ॥
प्राक्संल्यासु च तिष्ठन्ति सर्वा स्सर्वासु सर्वदा ।
स्मृत्वा ह्यभेदभावेन षट्कर्मे [?] माद्ध्वत्पुरा ॥ ५ ॥
ततस्तु क्ष्मादिना तेन सर्वं व्याप्तं विचिन्तयेत् ।
चतुरात्मान मव्यक्तं शब्दमूर्ति निराकृतिम् ॥ ६ ॥
गुणमात्रे विभिन्नं च स्वव त्त्रैवभावयेत ।
अमाह्लेगाय वपुषा स्वस्वभावमयेन च ॥ ७ ॥
संक्रान्तेन तु वै बुद्धौ सर्वदेवोदितेन तु ।
स्वशक्त्या वै ह्यनिच्छातो जीव मादाय सोर्ध्वगम् ॥ ८ ॥
स्वसामर्थ्यं स्वशक्त्यातत् शान्तात्मास्ते विलाप्यच ।
शुद्धाशयानां भक्तानां तत्पदैकाभिलाषिणाम् ॥ ९ ॥
तत्सामर्थ्यानुविद्धानां सर्वत्र व्यक्तिमेतिच ।
अतस्तुयदसम्बेद्यं देयंपरिमितन्त्वपि ॥ २१० ॥
तत्तत्तदात्मनाभ्येति सर्वदाभावितात्मनां ।
इत्यादौसर्वसामान्यो नित्योविद्याख्य आश्रयः ॥ १ ॥
बोद्धव्यस्सोपितदतु ह्य सामान्यं सदागतः ।
आमोक्षादगभावंच जीवानांस्वयमेवहि ॥ २ ॥
वज्रवत्सूक्ष्मरूपेण सम्पूर्णनमहामते ।
दीक्षाकालेतु शिष्याणां परिज्ञेयं यथोदितम् ॥ ३ ॥

एवमेवविजानीया द्भूयस्सौत्रेतु विग्रहे ।
समधातुविभक्त्यादौ सन्धिंवैकुंकुमादिना ॥ ४ ॥
चिन्हीकृत्यचतुर्दशा त्प्रणवाद्यन्तगैस्ततः ।
स्वनामपदसंयुक्तो ग्रथनीयस्स्वकारणैः ॥ ५ ॥
एवंप्राप्तिमयेभागे हृदापूर्णान्तिमेकृते ।
नीत्वावैमण्डलस्थस्य विभोस्तंसन्निवेदयेत ॥ ६ ॥
वर्मणाच्छादितंकृत्वा निधायकलशाग्रतः ।
सशिष्योथार्चनंकुर्या त्पुनर्विश्वात्मनोविभोः ॥ ७ ॥
प्रदक्षिणैःप्रणामैस्तु नानास्तुतिपदैस्सह ।
तत्रोपलिप्तभूभागे मण्डलान्तर्गतंबहिः ॥ ८ ॥
स्थानभेदास्थितंकृत्वा नेत्रहृन्मन्त्रमन्त्रिते ।
पंचगव्येवनोदन्त धावनैर्विनियोजितम् ॥ ९ ॥
भुक्तोज्झितदन्तकाष्ठे कुर्यात्सिद्धिविचारणम् ।
सौम्यवारुण ईशाने यदिपूर्वादिगाननम् ॥ २२० ॥
तत्सिद्धिसूचकंविद्धि विपरीतमतोन्यथा ।
तदूर्ध्वंसमायजुहुया द्वीर्यमन्त्रेणवैशतम् ॥ १ ॥
धूपानुलेपनादीनि रजांसिवटिकादयः ।
साज्यानिचतिलादीनि योग्यान्यन्यानिलांगलिन् ॥ २ ॥
उद्धृत्योत्तरादिक्कृत्वा वर्मजप्तेनवाससा ।
अभुक्तेनाहतेनैव त्वाच्छाद्यसांसितेनच ॥ ३ ॥
समभ्यर्च्यास्त्रमन्त्रेण पुष्पधूपानुलेपनैः ।
क्षान्त्वास्थलास्थितन्देव मप्रोवाकलशेन्यसेत ॥ ४ ॥
अथशुद्धेचभूभागे हृन्मन्त्रितकुशास्तरे ।
कृत्वाप्राङ्मस्तकंशिष्यं वर्मजप्तांशुकेनतु ॥ ५ ॥
हृदावकुण्ठितंतंतु मुख्यमन्त्रमनुस्मरन् ।
स्वापयेत्स्वप्नलाभाय ततोहृन्मन्त्रितैस्तिलैः ॥ ६ ॥

सिद्धार्थकयुतैस्तस्य निदध्यात्परिखांबहिः ।
सबहिःपक्षमन्त्रेण प्राग्वद्दिक्ष्वष्टकांहियत ॥ ७ ॥
प्रदक्षिणेनतत्रापि सितसूत्रेणवर्मणा ।
चतुरावेष्टयित्वातु मण्टपान्निष्क्रमेद्बहिः ॥ ८ ॥
दन्तकाष्ठादिकंकर्म विनिष्पाद्यस्वयंस्वपेत् ।
कुतलेदर्भशय्यायां कृत्वादक्षिणदिक्छिरः ॥ ९ ॥
सम्स्पृशन् स्वांघ्रियुग्मेन शिशुंशयनसंस्थितम् ।
भगवन्तंहिमनसा प्रार्थयन्नपवर्गदम् ॥ २३० ॥
ओमादीशजगन्नाथ सर्वज्ञहृदयेशय ।
तत्राहंयोजयाम्येनं कर्मिणन्त्वत्परायणम् ॥ १ ॥
प्राप्तानुज्ञस्तु शिष्याणां कुर्याद्धेतत्रयोजनम् ।
यत्रयत्रचतत्तेषा मवश्यं शाश्वतम्भवेत् ॥ २३२ ॥

इतिश्रीपांचरात्रे श्रीसात्वतसंहितायां अधिवासदीक्षाविधि
रष्टादशः परिच्छेदः ॥ १८ ॥

अथ एकोनविंशः परिच्छेदः ।

श्रीनारदः ।

अधिवासाभिधानेयं पूर्वदीक्षाच्युतेन वै ।
कथितासीरिणे विप्रा स्वेनात श्रीदिसः पुनः ॥ १ ॥

संकर्षणः ।

देव दीक्षाविधानं च त्वद्धक्रकमला दहम् ।
श्रोतु मिच्छामि संक्षेपा द्वैष्णवानां हिताय च ॥ २ ॥

भगवान् ।

एकानेकस्वरूपां वै दीक्षां संसारिण शृणु ।
आसाद्य यां समायान्ति देहान्ते भि [हि] मतं पदम् ॥ ३ ॥
केवल्यफलदाप्येका भोगकैवल्यदा परा ।
भोगदेव तृतीया च प्रबुद्धानां सदैवहि ॥ ४ ॥
आचार्यानुमता स्सर्वाः कार्याः स्सम्यक्फलाप्तये ।
भक्तिभावानुविद्धानां शिष्याणां भावितात्मनाम् ॥ ५ ॥
वृद्धाना मंगनानां च बालानां भावितात्मनाम् ।
विनाचारसमूहेन दुश्शकेन च ता हिताः ॥ ६ ॥
पुरा धिया विचार्यैव मुपसन्नेन वै सह ।
तदीय माशयं ज्ञात्वा सम्पाद्येका महामते ॥ ७ ॥
अथातीतेर्धरात्रेतु उत्थाय शयना द्गुरोः ।
कमण्डलुं समादाय बहि राचम्य संविशेत् ॥ ८ ॥
संस्मरे द्यत आत्मं हुतभुग्राशिसन्निभम् ।
तदन्त स्संविशे देवं स्नानमात्रं कृतं भवेत् ॥ ९ ॥
निद्रामोहमलं येन शश्व दायाति संक्षयम् ।
शंकू न्वै घटिका स्तत्र रजांस्यस्त्रवरेण च ॥ १० ॥
समादाय च संस्मृत्य निष्पिष्याये [घे] महीतले ।
शुष्कगोमयसंघृष्टे मण्डलं यत्पुरोदितम् ॥ ११ ॥
भद्रत्वपरिरक्षार्थं न्यस्याः कोणेषु शंकवः ।
कमलभ्रमासिद्ध्यर्थ मेकं मध्ये निवेश्य च ॥ १२ ॥
ईषन्नयाति वैषम्यं तद्रात्रिसमये यथा ।
महानूनाधिके दोष स्सशिष्यस्य यतो गुरोः ॥ १३ ॥
अत स्तद्रक्षणीयं च यत्नेन महता सदा ।
निर्वर्त्य नित्यं प्रत्यूषे पुरा वै स्नानपूर्वकम् ॥ १४ ॥
शिष्य माहूय सञ्चोद्य स्वप्नप्राप्तिं शुभाशुभाम् ।
चतुर्मूर्तिसमूहन्तु यथा दिक्संस्थितन्तु वै ॥ १५ ॥

पश्येत्पङ्क्तिनिविष्टं च उपविष्टन्तु चोत्थितम् ।
तन्मध्याद्भगवत्तत्व मेकं वा भिन्नलक्षणम् ॥ १६ ॥
प्रादुर्भावसमूहं च तल्लांछनगण श्च यः ।
देवीयं वनितावृन्दं सर्व मेकतमाथवा ॥ १७ ॥
भवोपकरणव्रात मशेषं वा पृथक्स्थितम् ।
रुद्रेन्द्रचन्द्रसूर्यांश्च हुतभुग्वातलक्षणम् ॥ १८ ॥
पंचरात्रविदो विप्रा आराधनपरायणाः ।
त्रयी मुद्घोषयन्तश्च निगदन्तश्च वा द्विजाः ॥ १९ ॥
यतय श्शुक्लवाश्च सद्ब्रह्मपदसंस्थिताः ।
नगस्रक्चन्दनाद्यानि सुगन्धानि तरूत्तमः ॥ २० ॥
उद्यानवनिताराम वापीहर्म्यमहालयम् ।
फलबीजोषधी साधु कुम्भो वा पाकनिर्गतः ॥ २१ ॥
गोगजाश्च नदीयानं कन्या साळंकृता शिशुः ।
मंगल्यगीति मधुरा भेरी वंशश्च झल्लरी ॥ २२ ॥
ससारसं सरः पद्मैः पूर्णं चित्रं सितं ततम् ।
हेमादिधातवो रत्न जालं गोसम्भवानि च ॥ २३ ॥
नवो नेत्र स्सितं शुद्धं वस्त्रवृन्द मनाहतम् ।
राजा पुरोधा स्सामन्तो राजपत्नी च दर्पणम् ॥ २४ ॥
तुरगश्चैव सद्वृष्टि र्महामेघोदयो दिवि ।
शोणितश्चार्द्रमांसानि स्वप्लुति र्मदिरादयः ॥ २५ ॥
सरपक्षिमृगसंघात स्सुराचा चामरं सितम् ।
एवमादीनि चान्यानि विद्धि सिद्धिप्रदानि च ॥ २६ ॥
स्वप्नानि यान्यनिष्टानि तानि मे केशव श्शृणु ।
म्लानता क्षितिकम्पश्च उपरागोतिभीषणः ॥ २७ ॥
नीहार उल्कापातश्च निर्घात श्चित्तभंगकृत् ।
गर्भप्रवेशो दध्यन्नं स्विन्नमांसस्य भक्षणम् ॥ २८ ॥

नर्तनं रथविध्वंस आज्यं स्वांगाद्विजच्युतिः ।
खरोष्ट्रं चोत्कटं हास्यं कपिऋक्षाकुलं वनम् ॥ २९ ॥
स्थानं धूमाकुलञ्चैव मसिताम्बरवेष्टनम् ।
शुष्कत्वं सरिदादीनां प्रतिस्रोतस्त्वमेव च ॥ ३० ॥
पोतयानध्वजछत्र तरुभंगोऽप्यसिद्धिकृत् ।
अवतारो नगाद्वृक्षा त्स्वरत्वं प्रेतदर्शनम् ॥ ३१ ॥
बलाकजालतैलाज्यलेपो स्वकर्दमे स्थितिः ।
महिषो हि नरः कृष्णो दक्षिणाशागमः क्षुधा ॥ ३२ ॥
लुञ्छनं नखकेशाना मस्थिभंगादिकं द्रुतम् ।
एवमादीनि चान्यानि अशुभानि महामते ॥ ३३ ॥
आसे शुभाशुभे स्वप्ने प्यभिसन्धाय वै हृदि ।
औत्सुक्या दशिवध्वंसि पूजाहोमं समाचरेत् ॥ ३४ ॥
अथोक्तविधिना देव मवतार्य क्रमा यजेत् ।
तर्पयित्वा यथान्यायं पूर्णान्त माचरेत् ततः ॥ ३५ ॥
ईशाकोणेथवा सौम्ये पदे यागगृहस्य च ।
मण्डले पूर्वनिर्दिष्टे कृते वा चतुरश्रके ॥ ३६ ॥
स्नातं स्रग्वस्त्रभृच्छिष्यं कृतन्यासं निवेदयेत् ।
निरीक्ष्य ताड्य संप्रोक्ष्य दर्भै राळभ्य पूर्ववत् ॥ ३७ ॥
संस्कृत्य मूर्तिव त्किन्तु मनुगृह्य भरागतम् ।
आपदा न्मन्त्रहस्तेन परामृश्याथ मूर्धनि ॥ ३८ ॥
मन्त्रहस्तं ज्वलद्रूपं दद्या द्यो दुःखबीजजित् ।
त मादाय करा देव धामसन्निकटं व्रजेत् ॥ ३९ ॥
कृतात्मनो वामभागे भूय स्संछाद्य लोचने ।
प्रक्षेपये त्तथा साघ्र्यं मञ्जलिं मुक्तलोचनम् ॥ ४० ॥
संपश्ये त्परमं धाम मान्त्र मच्छफलप्रदम् ।
तस्मि न्नवसरे कुर्या न्नाम यस्य यथोचितम् ॥ ४१ ॥

रहस्यसंज्ञं मुख्यं च गौणं वास्य यथास्थितम्।
सामान्यं वासुदेवाद्यं नाम स्वांगा च्चतुर्ष्विव॥ ४२ ॥
सर्वेषां सविशेषं वा यथा चानुक्रमेणतु।
द्विषट्‌कमूर्त्यंकितं च स्वाम्यन्तं ब्राह्मणेषु च॥ ४३ ॥
देवान्तं क्षत्रियाणां च कुर्या द्वादशधा पुनः।
पाण्यन्तं धारनिष्ठं वा लांछनास्त्रपुरस्सरम्॥ ४४ ॥
ध्वजलांछनसंज्ञं च यथावस्थं नृपेषु च।
एवं वर्धनानिष्ठं च मूर्तिलांछनपूर्वकम्॥ ४५ ॥
विहितं चापि वैश्यानां दासान्तं शूद्रजन्मनाम्।
अथोत्थाय नमस्कृत्य मण्डलं कलशं गुरुम्॥ ४६ ॥
यायात् कुण्डसमीपे तु शिशुना सह देशिकः।
कृतस्य कर्मणो छिद्रसिद्ध्ये च हुते सति॥ ४७ ॥
सन्ताव्याव्यात्मकोभूत्वा प्राग्वत्तद्धृदयं विशेत्।
प्राणशक्तिवियुक्तं च कृत्वानीय समासतः॥ ४८ ॥
संप्रवेश्य स्वकं स्थानं तत्राग्निकणवच्च तम्।
नीत्वा सम्यक्पृथग्भावं विरेच्य सह वायुना॥ ४९ ॥
स्वभूमौ वाममार्गेण हृदाद्यन्तं निरोधितम्।
जन्मग्रह मंत्रेनैव मन्त्रयुक्तेन कर्मणा॥ ५० ॥
भावध्यानानुविद्धेन पितृमातृमयं त्यजेत्।
ततः कवचमन्त्रेण दद्या त्समाभिमन्त्रितम्॥ ५१ ॥
तस्योपवीत मपर मुदितं चापि यस्य यत्।
सर्वथा दासभावत्व मापन्नस्य च तत्वतः॥ ५२ ॥
अमद्यपान्वयोत्थस्य लोकधर्मोज्झितस्य च।
आप्तवद्ब्रह्मनिष्ठस्य कर्मतन्त्ररतस्य च॥ ५३ ॥
गोदानं शूद्रजाते वै विहितं चैव नान्यथा।
वौषट् स्वाहावषट्‌कार निष्ठानान्तु प्रतिक्रिया॥ ५४ ॥

नमस्कारेण मन्त्राणां कार्यं प्राप्ते ह्यनुग्रहे ।
तदीय मर्घ्यपुष्पाद्यं यत्किञ्चिद्यागसाधनम् ॥ ५५ ॥
सुसंस्कृत मसिद्धं वा भक्त्या कर्मण्यतां व्रजेत् ।
अतोऽन्येषान्तु भक्तानां विहिता यागसाधने ॥ ५६ ॥
सम्यक्सत्वनिवृत्तिः प्राग्दर्शनं प्रोक्षणान्वितम् ।
मूर्तौ वा मण्डलाग्रेतु पुष्पक्षेपं महामते ॥ ५७ ॥
नक्तं वा परिपिण्डं च व्रतार्थं त्वेकमेवहि ।
एवं संस्कारसंशुद्धं कृत्वा वर्णगणं पुरा ॥ ५८ ॥
सांगेन विभुना कुर्या त्तत्प्रायश्चित्ततर्पणम् ।
सदशांशसहस्रन्तु यथा चानुक्रमेण तु ॥ ५९ ॥
गत्वाभ्यर्च्य च कुम्भेशं सूत्र मादाय तत्स्थितम् ।
ऋजुभूतं शिशुं कृत्वा तद्वत्सूत्रं प्रचार्य च ॥ ६० ॥
व्यक्तरूपं च मन्त्रेशं संस्मरे दग्निमध्यगम् ।
पश्ये द्विभौ शिशुं सूत्रे स्वात्मन्यध्वान मञ्जसा ॥ ६१ ॥
तत्राध्यात्मस्वरूपं च संस्मरे न्मन्त्रदेहगम् ।
अधिदैवस्वभावं च तत्स्वात्मन्यवतार्य च ॥ ६२ ॥
अधिभूतमयं सूत्रे त्रिविधं शिष्यविग्रहे ।
मूलमन्त्रावसानेतु सनमस्कं परात्मने ॥ ६३ ॥
पदं कृत्वातु जुहुया दाहुतीनां चतुष्टयम् ।
तथा सूक्ष्मात्मने चोक्त्वा तत स्स्थूलात्मने तु वै ॥ ६४ ॥
सर्वात्मनेच तदनु तत्रोध्वनिचयं हितम् ।
आपदाग्रा च्छिखान्तं च सर्वं ध्यात्वा स्वदेहगम् ॥ ६५ ॥
यथोद्दिष्टं क्रमेणैव विभिन्नं त्रिविधं त्वपि ।
रचनासन्निवेशो यः क्ष्मादीनां चाधिभूतता ॥ ६६ ॥
बोद्धव्य मधिदैवत्वं सामर्थ्यं यस्य यत् स्वकम् ।
तदधिष्ठातृमन्त्राणा मध्यात्मत्वं विधीयते ॥ ६७ ॥

अथ मार्गद्वयं त्यक्त्वा द्वादशान्तं समाश्रयेत् ।
मूलमन्त्रमयो भूत्वा संव्रजे त्स्वधिया ततः ॥ ६८ ॥
ब्रह्मद्वारपदं शिष्यं तत स्तन्मध्यवर्त्मना ।
पार्थिवं पद माक्रम्य कुर्या त्तच्छाक्ति मात्मसात् ॥ ६९ ॥
बीजभूतां च हृन्मन्त्र संरुद्धां सन्धिविग्रहाम् ।
नानाण्डबीजसंयुक्ता मनेकरचनान्विताम् ॥ ७० ॥
एव मादाय वै सर्वां शुद्धिनिष्ठास्तु शक्तयः ।
पृथक्पृथक्क्रमेणैव तस्मिन् हृन्मन्त्रसम्पुटे ॥ ७१ ॥
स्वेनाध्यात्मगुणेनैव परेण व्यापकात्मना ।
संहृतं धारयन्तश्च स्मरे त्तमुभयात्मकम् ॥ ७२ ॥
कालं भोगक्षयान्तं च तत्कालात्तु महामते ।
कुर्यैवं भूतशक्तीनां संहारं शिशुविग्रहात् ॥ ७३ ॥
सौत्रं देह मथाक्रम्य सम्य क्तेनैव वर्त्मना ।
मोक्षलं स्वदृव्रजे तत्र व्यश्नयेत्तु धियादिवत् ॥ ७४ ॥
आदायाध्यात्ममन्त्रांश्च भूतभूतान्विता नथ ।
नित्ये संलक्षणे शुद्धे स्वमन्ते स्स्वास्थितानपि ॥ ७५ ॥
अथ सूत्रा द्विनिष्क्रम्य मयाया दनळाश्रयम् ।
तत्रावयवसन्धानां मन्त्रसाम्यं समाचरेत् ॥ ७६ ॥
समाहृतानां मन्त्राणां परे सर्वत्रलक्षणे ।
व्यापके सर्वसामान्ये कृत्वा स्वे स्वे पदे स्थितिम् ॥ ७७ ॥
स्वशरीर मथासाद्य ब्रह्मद्वारेण देशिकः ।
स्रुव मादाय सन्तर्प्य मन्त्रवृन्दं यथोदितम् ॥ ७८ ॥
तत्त्ववृन्दसमेतं च स्वनाम्ना प्रणवादिना ।
भूयस्संसृष्टियोगेन द्विषट्कपरिसंख्यया ॥ ७९ ॥
पूरकेन समाकृष्य शिष्यं हृत्कमलाद्धृदि ।
अथ व्यक्तिनिरस्तं च क्ष्मावीजं परलक्षणम् ॥ ८० ॥

हृष्टात्मा ज्ञानसंरुद्धं कृत्वादायानलाद्धृदि ।
प्रणवासनविश्रान्तं विरेच्याब्जे तु शैशवे ॥ ८१ ॥
स्मृत्वाथ शिष्यचैतन्य मेकमेव द्विरूपधृक् ।
शक्तिमच्छक्तिभावेन शक्तित्वेनतु संस्मरेत् ॥ ८२ ॥
क्ष्मातत्वान्तर्गतंकुण्डे शक्तिमत्त्वेन तत्पुनः ।
रेचयित्वा स्वनाम्नाच विग्रहे मध्यवर्त्मना ॥ ८३ ॥
नियोज्यतत्वमाधीतं जपध्यानैक लक्षणे ।
तदेवपार्थिवंबीजं हृदावै होमकर्मणा ॥ ८४ ॥
सम्यक् तस्योपकारार्थं नेतव्यं सूक्ष्मदेहताम् ।
स्वाहान्तं भोगसिद्ध्यर्थं नमोन्तं मोक्षसिद्धये ॥ ८५ ॥
भोगमोक्षार्थयेच्चापि तदेवोभयलक्षणम् ।
कर्मणामवसानेतु सम्पाद्य पदंन्यसेत् ॥ ८६ ॥
एवन्तु विग्रहेसूक्ष्मे तद्रूपता गतस्यच ।
शिखाचाधिकारात्तु तस्यापाद्य यथास्थितम् ॥ ८७ ॥
शिखामन्त्रेणतद्योगं निर्वर्त्यशतसंख्यया ।
वर्मणातत्फलप्राप्तिं तल्लयत्वमपिस्मरेत् ॥ ८८ ॥
सुवृत्तिमयनेत्रेण कुर्यात्तेनैवसंस्थितिम् ।
तस्यागश्चास्त्रमन्त्रेण विश्लेषेण युतोभवेत् ॥ ८९ ॥
मूलेनाथगृहीत्वातत् कुर्याच्चैवात्मसात्पुनः ।
तद्वच्छक्तिं तदीयांच कुण्डाद्व्यापकलक्षणाम् ॥ ९० ॥
क्ष्मातत्वस्याथवा [सा] ह्यचस्य ह्यसा [ना] धारस्यशान्तये ।
पूर्वसंख्यन्तुचास्त्रेण कृत्वाहोमं महामते ॥ ९१ ॥
स्रुवमाज्येन सम्पूर्य स्कन्धसूत्रात्तु पार्थिवम् ।
विकर्त्यपूर्णयासार्द्धं विकल्प्याग्नौ स्वकेपदे ॥ ९२ ॥
मूलमन्त्रेणसहसा ह्यपसव्येरितेनतु ।
स्वदेहाद्रेचकेनाथ मेयंशक्तिचशैशवम् ॥ ९३ ॥

तथाक्रान्तं भयस्थंच संस्मरे द्व्यक्तिरिक्तया ।
कबिन्दुनेवाब्जपत्र मायाध्वानंचभावनम् ॥ ९४ ॥
शिष्यदेहनिरुद्धस्य व्यक्तिक्रोडी कृतस्यच ।
स्वशक्तिपरिपूर्णस्य क्ष्माबीजस्यत्रयोपरि ॥ ९५ ॥
विरेच्यशक्तिमन्तश्च व्यस्तधर्मेणपूर्ववत् ।
तत्क्षणेबीजसंस्थन्तु अध्वानन्तुयथास्थितम् ॥ ९६ ॥
प्रकाशयन्तंकृपया तत्राथन्तस्यसिद्धये ।
विरक्तम्भावयेच्छिष्यं चिन्तयेत्तादिदान्धिया ॥ ९७ ॥
इदन्तत्पार्थिवन्तत्वं बुधावैदुःखपंजरम् ।
भावतत्वं गतंचास्य सुमहत्वं च सांप्रतम् ॥ ९८ ॥
कथमत्रत्वहंचासं यस्यैमनतताइमाः ।
विमुक्तःपंजराद्बद्ध स्सुखमास्तेविहंगमः ॥ ९९ ॥
ऊर्ध्वपातीतदारूढ स्त्वेवम्मन्त्रबलाच्छिशुः ।
समूहमथविज्ञाप्य तत्प्रभुत्वेनयास्स्थितः ॥ १०० ॥
सन्निरुद्धो भवेत्स्वस्य सर्वतस्सर्वदैवहि ।
युष्मत्प्रसाद सामर्थ्या यथावत्पार्थिवोगुणः ॥ १ ॥
देहान्तं गन्धतन्मात्रं भवेदासीनमस्यवै ।
सम्यक्संप्रतिपन्नस्य शासनेपारमेश्वरे ॥ २ ॥
हेधराधिपतेनाथ अस्याद्य प्रभृतित्वया ।
ध्वंसिनामोक्षविघ्नानां भवितव्यंचकर्मिणः ॥ ३ ॥
इतिविज्ञाप्यचाज्ञाप्य आपाद्याहुतयःक्रमात् ।
सहशक्त्यासमाकृष्य भूयस्तत्पूरकेणतु ॥ ४ ॥
तद्देहेचामयंबीजं साधारंपूर्ववन्न्यसेत ।
कुण्डमध्येतुसन्धाय जीवशक्तिंच पूर्ववत् ॥ ५ ॥
विरेच्य शक्तिमां स्तत्र नियोज्य स्तदनन्तरम् ।
तत्समाधौ यथा पूर्वं कुम्भकेन महामते ॥ ६ ॥

अथान्यं देह मापाद्य होमध्यानादिना परम् ।
तत्राधिकारपूर्वन्तु सर्वं निवर्त्य तस्य वै ॥ ७ ॥
अन्येन सूत्रस्कन्धेन सह पूर्वां निपात्य च ।
आप्तत्वपदसंयुक्तं तेनाक्रान्तं स्मरे त्तथा ॥ ८ ॥
तत्स्थं मन्त्रसमूहन्तु सह तत्पतिना तु वै ।
पूर्ववच्छ्रावयित्वा च रस माघ्राप्य गन्धवत् ॥ ९ ॥
मनोवसानं नीत्वैवं तं वर्णाध्वोर्ध्वगोचरम् ।
निष्ठागेन महाबुद्धे तेजसास्त्रेण चेच्छया ॥ ११० ॥
समुद्धृत्याथ वै प्राग्वत् वक्तव्यं बुद्धिगोचरे ।
षडध्वमुक्तमूलेन प्राप्तसंज्ञं च तं शिशुम् ॥ १ ॥
तत्वकंचुकनिर्मुक्तं शान्तात्मन्येकतां गतम् ।
स्मृत्वा शान्त्यात्मना श्रौतु लब्धलक्षं पदे परे ॥ २ ॥
ऐश्वरेणतु बीजेन भोक्तसत्वान्वितेन च ।
तत स्संवेद्य निर्मुक्ते समाधौ विनियोज्य च ॥ ३ ॥
नवेत्ति यत्र संलीनं सानन्दं द्वैतमात्रकम् ।
आहुतीनां शतं कृत्वा तदापादनकर्मणि ॥ ४ ॥
नीत्वा समानतां सर्वं तेनैव स्वधिया खिलम् ।
सह संवेद्य जालेन वाक्प्रबन्धं यथा स्थितम् ॥ ५ ॥
निस्तरंगमयो भूत्वा दद्या त्पूर्णाहुतिं पराम् ।
अथास्थितां प्राप्य गुरुः प्रदद्या दाहुतीः पुनः ॥ ६ ॥
बीजनाथेन शिष्यस्य त्वपमोक्षनिवृत्तये ।
पदे रोंकारसंरुद्धैः पदावस्थितमानसः ॥ ७ ॥
सर्वज्ञो भव चोक्त्वैवं जुहुयात् द्वादशाहुतीः ।
भवैवमेव भगव न्निरवद्यो निराश्रयः ॥ ८ ॥
सर्वेश्वर स्सर्वशक्ति स्सुसम्पूर्णो च्युतो वशी ।
व्यापी निरुद्धषाड्गुण्यो निर्विकारो निरञ्जनः ॥ ९ ॥

नित्यो नित्योदितज्ञानो नित्यानन्द स्सुनिष्कळः ।
अनाद्यन्तो ऽनिधनो वासुदेवो विभूतिमान् ॥ १२० ॥
भूत्वैवश्च ततः कुर्या त्पूर्णया पुनरेवहि ।
स्थितं वैभवदीक्षाया म्मुमुक्षो रैश्वरे पदे ॥ १ ॥
यत्रस्थो धाम चाभ्येति ह्यचिरा त्पारमेश्वरम् ।
ईश्वरेच्छावशेनैव देहपाता न्महामते ॥ २ ॥
भोगेच्छोः पद्मनाभीय उभयेच्छोः पदद्वये ।
शक्तिमच्छक्तियोगेन स्वथ बुद्धिमयेध्वनि ॥ ३ ॥
निवेश्यो देहपातान्तं काल मुद्धृत्य तत्पदात् ।
अन्तरूढो यथा काष्ठा त्पावकश्च पृथक्कृतः ॥ ४ ॥
न भूय स्सह काष्ठेन साम्य मेति तथा पुमान् ।
योजितो ध्वान्तरे भूयो नैति तन्मयतां ततः ॥ ५ ॥
समाधिमच्युतिं कृत्वा विनिवेश्यात्मनोग्रतः ।
यथावदुपदेष्टव्य स्तस्याध्वाच सितासितः ॥ ६ ॥
संस्थितो य स्स्वभेदेन भिन्नरूपः परात्मनि ।
वेद्यवेदकनिर्मुक्त मच्युतंब्रह्मयत्परं ॥ ७ ॥
तच्छब्दब्रह्मभावेन स्वशक्त्यास्वयमेवहि ।
मुक्तयेखिळजीवाना मुदेतिपरमेश्वरः ॥ ८ ॥
तदव्यक्ताक्षरंविद्धि तन्नाशब्दोयथाकळः ।
पृथग्वर्णात्मनायाति स्थितयेनेकधास्वयं ॥ ९ ॥
नोयान्तिनिश्चयंयत्र चातुरात्म्यादनुग्रहात् ।
श्रुतेवेदविदोविप्रा स्स्वेतस्मिन् प्रथमेक्षरे ॥ १३० ॥
सशब्दमूर्तिर्भगवा नभ्येतिचकलात्मना ।
तद्गृह्योयुज्यतेयेन तन्निष्ठानां हि कर्मिणां ॥ १ ॥
नवाङ्गगुण्यमळोत्थाच यावन्मूर्ति निरञ्जनम् ।
यदकेनान्यथामूर्त ततगृहीतुं नियुज्यते ॥ २ ॥

तत्वाःकलामयास्सर्वे प्रभवाप्ययलक्षणाः ।
पूर्वोक्ता वासुदेवाद्या अद्भ्यक्षान्तायथोदिताः ॥ ३ ॥
तेभ्योविनिर्गतामन्त्रा स्त्वणिमादि गुणैर्युताः ।
षट्कलांगलवैर्युक्ता येषुसंख्यानविद्यते ॥ ४ ॥
व्यक्तितन्ते स्तानिर्माणं तस्याद्यं पदसंज्ञकम् ।
कर्मिणामात्मलाभार्थं मोहार्थंततक्षयायच ॥ ५ ॥
द्विस्सप्तभुवनंविश्वं गुणत्रयमयंहियत् ।
तदशुद्धंजगन्नित्यं भोग्यंप्राप्यं पृथक्स्थितम् ॥ ८ ॥
इत्यध्वषट्कमुद्दिष्टं हेयोपादेयलक्षणः ।
भुवनाध्वापदाध्वाच विनातुर्यपदेनतु ॥ ९ ॥
हेयश्शेषमुपादेयं कर्मिणान्तदपेक्षया ।
व्यपेक्षया ध्युपेयश्च हेयपक्षे प्रयातिच ॥ १४० ॥
किन्तुतत्प्राप्त्युपायंवै निस्तरंगेपरेपदे ।
विवेकपदसंस्थस्य दीक्षयासंस्कृतस्यच ॥ १ ॥
विचार्यमाणएवंहि विभ्रमोयत्रवैस्फुटम् ।
जायतेतत्परंब्रह्म वासुदेवाख्यमव्ययम् ॥ २ ॥
अम्बरंपरमाणूनां ब्रह्मनामास्पदंयथा ।
तथानाद्यप्रबुद्धानां जीवानांहि निकेतनम् ॥ ३ ॥
विज्ञेयम्भुवनानांच पदानामन्तरंहियत् ।
विनेश्वरेच्छया तेषां मन्त्रावै क्रीडयन्तिच ॥ ४ ॥
मायीयेध्वद्वयेतस्मिन् सुखदुःखमयैःफलैः ।
ईश्वरेच्छानुविद्धानां भक्तानांपरमेश्वरे ॥ ५ ॥
गुरूणांदीक्षितानांच्या प्याराधनरतात्मनाम् ।
भवन्त्यध्वद्वयोर्ध्वस्था मन्त्राश्चाज्ञाप्रतीक्षकाः ॥ ६ ॥
नयन्तिकर्मणस्सम्यक् मायीयाध्वद्वयाद्बलात् ।
स्वस्थानमणिमादीनां भोगानां प्रापयेतुवै ॥ ७ ॥

विरतस्यचतद्भोगात् स्वशक्त्या प्रेरयन्तिच ।
स्वव्यापारवशेनापि तत्वाध्वन्यमृतोपमे ॥ ८ ॥
यन्त्राणीमानिमन्येत तृणानीवचसंस्थितः ।
अनुग्रहपरास्तस्य तत्वाद्ध्यक्षादयोमलाः ॥ ९ ॥
नयन्त्यध्ययतांसम्यक् सत्कळाध्वनिशाश्वते ।
सषाड्गुण्यमयोब्रह्म वासुदेवोध्वमूर्तिभृत् ॥ १५०॥
नित्येस्वात्मनिसम्बन्धे शब्दब्रह्माभिधेध्वनि ।
करोति योजनान्तस्य यन्त्रस्थ स्स्वयमेव हि ॥ १ ॥
प्राप्नोति तत्परिज्ञानात् सुशान्तं भगवत्पदम् ।

संकर्षणः ।

देवत्रवर्णाध्वविज्ञानं वद किं लक्षणं मम ॥ २ ॥
प्राप्नोति यत्परिज्ञाना दृध्वी सद्वासुदेवताम् ।

श्रीभगवान् ।

पञ्चाध्वकोशमुक्तस्य लब्धसत्तस्य चात्मनः ॥ ३ ॥
सोनुभूतिपदं याति धरासन्तानरूपधृत् ।
भिन्नवर्णमय श्शब्दः पूर्वलक्षणलक्षितः ॥ ४ ॥
सचातुरात्म्यनिचयो विज्ञेयोहि तदात्मना ।
प्रभवाप्यययोगेन शब्दभास्वरलक्षणः ॥ ५ ॥
स्कारान्तस्सधकाराद्य हकारा दन्त एव हि ।
प्रभवे द्वादशान्तस्तु भकार श्चतुरात्मनाम् ॥ ६ ॥
अकार स्सव्ययेनैव तुल्यतातेनयो स्स्मृता ।
वर्णे व्यूहसमूहेस्मिन् ज्ञेयं ज्ञानसमाधिना ॥ ७ ॥
विश्राम उदयो व्याप्ति रराध्वासुच देवताः ।
शत्रैकैका परिज्ञेया मूर्ति र्वै त्वेवमेव हि ॥ ८ ॥
युक्ता विश्रामपूर्वेण चतुष्केण समासतः ।
दण्डवत्सन्निवेशेन संस्थिता ह्येव मेवहि ॥ ९ ॥

द्विषट्कं धारणानां च द्वादशाधात्मलक्षणम् ।
सोपानभूतं यत् क्रान्त्वा द्वादशान्तं विशेत्परम् ॥ १६० ॥
नीत्वैवं व्यक्तिभावेन हृत्पद्मोदरसंस्थितम् ।
वर्णाध्वानं दीक्षितस्य शब्दब्रह्मेति यास्थितिः ॥ १ ॥
संस्रोच्य हुतभुग्भूमिं प्राणितेनोदकेनतु ।
सह शिष्येण चात्मानं तेनैवाच्छिद्रसिद्धये ॥ २ ॥
पूर्ववद्धुतिना कृत्वा लक्ष्म चाग्निं प्रणम्य च ।
समुत्थाय ततो याया त्तं गृहीत्वाच्युतालयम् ॥ ३ ॥
पूजयित्वा जगन्नाथं निवेद्य नियमा च्छिशोः ।
अविशेषान् समासेन सान्तरान्योग्यतावशात् ॥ ४ ॥
यथावदुपदेष्टव्यं तत स्तस्यार्चनं हृदि ।
मुद्रासमन्वितो मन्त्रो न्यासध्यानपुरस्सरः ॥ ५ ॥
इति कर्तव्यता शास्त्रे संक्षिप्ता च सविस्तरा ।
तत्समक्षं तत स्तेन सर्वं कार्यं यथास्थितम् ॥ ६ ॥
गुर्वर्चनं ततः कुर्यात् आत्मना द्रव्यनादिना ।
पूरयित्वांभसा पाणिं मर्घ्यपात्रात्तु दक्षिणम् ॥ ७ ॥
षडंगमन्त्रसंजप्तं क्षेमव्यं तस्य मस्तके ।
मण्डलं प्रणवेनाथ पाणौ सूर्यप्रभं स्मरेत् ॥ ८ ॥
तत्राभिन्नं न्यसे त्प्राग्व द्वैभवं देवतागणम् ।
कृत्वा धियार्चितं दद्यात साशिषं तस्य मूर्धनि ॥ ९ ॥
यथोक्ताच यथाभीष्ट मचिरादेव पुत्रक ।
तवास्तु वैभवी सिद्धि मोक्षलक्ष्मसमन्विता ॥ १७० ॥
इति वैभवदीक्षाया लक्षणं समुदाहृतम् ।
तत्प्रयुक्तस्य सामान्यं सर्वमन्त्रगणस्य च ॥ १ ॥
येन येन हि मन्त्रेण दीक्षा कार्याहि कस्यचित ।
तस्य तस्य तदीयानां पूर्वोद्दिष्टेन वर्त्मना ॥ २ ॥

कार्यौत्रावयवानान्तु विनियोगो यथोदितः ।
समूहवदृदादीनां ज्ञानान्तानां समाचरेत् ॥ ३ ॥
सह तत्वगणेनैव सर्वं मध्यात्मरूपता ।
समभ्यूह्य ततः कुर्यात्भगवदभ्यर्चनन्तु वै ॥ ४ ॥
नेत्रकर्मणि हृद्बीजं पश्चांगानां विधीयते ।
निरंगानांतु मन्त्राणा मंगमन्त्रोक्तकर्मणाम् ॥ ५ ॥
प्रणवो विनियोक्तव्य स्सहकर्मपदेनतु ।
सम्पाद्य विधिनानेन व्यूहदीक्षार्थिनां सदा ॥ ६ ॥
किन्तु वै तत्र योक्तव्यं प्रत्येकास्मिन् हि कर्मणि ।
चतुष्कं वासुदेवाद्यं बीजानां यत्पुरोदितम् ॥ ७ ॥
एवमेवाद्यमन्त्रस्तु निश्शेषः कर्मसंग्रहे ।
योक्तव्यो ब्रह्मदीक्षायां षोढाभक्तत्वाच्च पूर्ववत् ॥ ८ ॥
स्वरूपेण यथावस्थ मुक्ते व्यवसरेषु च ।
किन्त्वेकवचनेनात्र देवानां प्रार्थना मता ॥ ९ ॥
योजना स्वधिवासोक्ता विज्ञातव्या समासतः ।
नित्यदीक्षाद्वयस्यास्य नान्यन्मोक्षा हते फलम् ॥ ८०१ ॥
तत्रापि चातुरात्मीया दीक्षा स्वाक्रमलेक्षण ।
वळा ददाति षाड्गुण्य भोगांश्च भावितात्मनाम् ॥ १ ॥
फलं स्रक्चन्दनादीनां होमद्रव्यस्य चापि यत् ।
प्रकृत्या सह चाभ्येति विलयं ब्रह्मदीक्षया ॥ १८२ ॥

इति श्रीपांचरात्रे श्रीसात्वतसंहितायाम्
दीक्षाविधि र्नाम

एकोनत्रिंशः परिच्छेदः ॥ १९ ॥

अथ विंशः परिच्छेदः ।

नारदः ।

दीक्षालक्षणमुक्तवैवं विरिणश्चाधिचक्रभृत ।
यथावच्चमुनिश्रेष्ठाः पुनरेवाब्रवीदिदम् ॥ १ ॥
अथमण्ड [र्ण] स्यदृष्ट [म] स्य शास्त्रज्ञस्ययथार्थतः ।
तप्ताभ्यां शंखचक्राभ्या मंकितस्य भुजद्वये ॥ २ ॥
सम्यग्धृतोर्ध्व पुण्ड्रस्य दत्तनाम्नश्च मन्त्रिणः ।
समाराधनसक्तस्य पुत्रत्वञ्चगतस्यच ॥ ३ ॥
सिद्ध्यर्थंसर्वमन्त्राणा मधिकारामयेतुवा ।
तत्कालंगुरुणाकार्यं यच्छिष्यस्याभिषेचनम् ॥ ४ ॥
भगवद्भक्तियुक्तानां पंचकालरतात्मनां ।
संहितापारगाणांच आचार्याणांचसन्निधौ ॥ ५ ॥
यतीनांचद्व्रुक्षाणां साधकानां महात्मनाम् ।
अथकुर्याद्गुरुस्सम्य क्चतुरश्रन्तुमण्टपम् ॥ ६ ॥
सर्वोपकरणोपेतं मध्येभद्रासनान्वितम् ।
तस्मिन्कुर्यादनन्ताद्यं सन्धानन्वासनोदितम् ॥ ७ ॥
पूजयित्वार्घ्यपुष्पाद्ये स्ततोदेवस्यसम्मुखम् ।
बद्धपद्मासनंशिष्यं तत्रारोप्यकृतांजलिः ॥ ८ ॥
कान्ताभिर्गीयमानन्तु स्तूयमानश्चवन्दिभिः ।
शंखाद्यैध्मायमानन्तु पठ्यमानन्तुमंगळैः ॥ ९ ॥
जपमानंपरम्मन्त्रं ध्यायमानामिवाच्युतम् ।
अष्टांगेनार्चयित्वातु कुम्भमादायवैष्णवम् ॥ १० ॥
सतत्रस्थेनमन्त्रेण सम्यक्सिद्धिन्यपेक्षया ।
सहस्रावर्तितंकृत्वा शतावर्तितमेववा ॥ ११ ॥

सिद्धयेद्रुतहेमाभं स्मृत्वात्मामभिषिच्यच ।
स्वाहान्तम्मन्त्रमुच्चार्य स्रुतंहृत्कमलोदरात् ॥ १२ ॥
एवमुक्त्वानमोन्तन्तु ध्यात्वातंस्फटिकामलम् ।
उद्गीर्यकर्णरन्ध्रेण तस्यहृत्पद्मगंस्मरेत् ॥ १३ ॥
चिच्छक्तिविग्रहंब्रह्म स्वाह्लादानन्दलक्षणम् ।
समारोप्यधियातस्य कस्वाधिकारन्तुचाखिलम् ॥ १४ ॥
प्रतिपाद्यार्चितंशुद्धं दिव्यमागमसंचयम् ।
शुभमाराधनाधार मक्षसूत्रंचकिंकिणीम् ॥ १५ ॥
स्रुक्स्रुवौयोगपट्टंच शंखचक्रेकमण्डलुम् ।
चमसंसार्घ्यपात्रंच दर्भान्कृष्णाजिनन्ततम् ॥ १६ ॥
पादुकेपादपीठंच च्छत्रमासनदर्पणे ।
मायूरंव्यजनंशुक्लं चामरंभगवद्ध्वजम् ॥ १७ ॥
यथार्हदण्डसहितं काषायेक्षौमवाससी ।
समुत्थाप्यासनात्सर्व माहृत्यस्नानजंजलम् ॥ १८ ॥
विनिक्षिप्यशुचौस्थाने देवमभ्यर्च्यचैततः ।
तादर्थ्येनतुसन्तर्प्य पूर्णांतंचाग्निमध्यगम् ॥ १९ ॥
क्षान्त्वापूर्वोक्तविधिना सकुण्डान्मण्डलान्तरात् ।
अर्घ्यपात्रसमूहाच्च बलिदानंसमाचरेत् ॥ २० ॥
सोदकेनचभूतानां मोदनेनास्त्रमुच्चरन् ।
बलिम्मण्डलतःकृत्वा यागागाराच्चबाह्यतः ॥ २१ ॥
कृत्वान्तर्बलिदानन्तु प्रादक्षिण्येनवैपुरा ।
अथऊर्ध्वमिदंचोक्त्वा शेषन्तन्मण्डलेबहिः ॥ २२ ॥
नमोस्त्वच्युतभूतेभ्य स्सर्वेभ्यस्सर्वदैवहि ।
सदिक्पतिभ्यस्सास्त्रेभ्य श्शान्तिर्नोस्त्वस्यवैशिशोः ॥ २३ ॥
पूजायमुपसंहृत्य दत्ताशिष्टेनपूर्ववत् ।
वृत्तमण्डलमध्येतु सितपद्मोदरेततः ॥ २४ ॥

हुतशिष्टैर्यजेद्देवं सर्वदेवगुरुंप्रभुम्।
तर्पयित्वाग्निमध्येतु कुर्यात्तस्यविसर्जनम्॥ २५॥
तदीयमथनिक्षिप्य कुम्भावटेवाजलांतरे।
करकंवारिसम्पूर्ण मपरंशुभलक्षणम्॥ २६॥
तत्रेष्ट्वावीर्यमन्त्रेण मध्येमन्त्रास्त्रमुत्तमम्।
मध्वम्बुपयसापूर्ण मादायविनिवेश्यच॥ २७॥
तदस्त्रतोर्घ्यकलशं तन्मध्येस्त्रंचचक्रगम्।
तमभ्यर्च्ययथान्यायं कृत्वाष्टशतमन्त्रितम्॥ २८॥
वषट्पदनिरुद्धेन मूलमन्त्रेणतत्पुनः।
दद्यात्तदन्तरस्त्राणेन भाग्वत् पीयूषधारिणम्॥ २९॥
निर्निद्रीकरणंकुर्यात् सर्वेषांमन्त्रवारिणा।
तदम्बुधारादानेन ध्यानोच्चारयुतेनच॥ ३०॥
संविभज्याथथैतेषां मन्त्रपानं सुधामयम्।
सुधाधस्त्रवरंपश्चा त्समन्त्रं चक्रगंन्यसेत्॥ ३१॥
आदायतन्तोयकुम्भं अस्त्रमन्त्रमुदीरयन्।
भ्रामयेत्पूर्ववद्धारा मथमध्ये निधायतम्॥ ३२॥
सम्पूर्णमुदकेनैव कृत्वाफलसमन्वितम्।
गुरुयागमतःकुर्या च्छिष्यःप्रयतमानसः॥ ३३॥
भगवद्यागवद्भक्त्या कर्मणामनसागिरा।
यागोपयुक्तंसम्भारं तस्मैसर्वंनिवेद्यच॥ ३४॥
सशिरःपाणियुग्मन्तु कृत्वावैचतदंघ्रिगम्।
क्षान्तव्यस्तुप्रयत्नेन श्रद्धापूतेन चेतसा॥ ३५॥
पंचरात्रविदस्तद्ध यतींश्च स्नातकादिकान्।
सम्पूज्यविधिवद्भक्त्या तेषांशक्त्याचदक्षिणाम्॥ ३६॥
संवाहनपरात्काले लब्ध्वानुज्ञान्तु गौरवीम्।
भ्रातृभिस्सहभ्राश्नीयात बहुभिःपूर्वदीक्षितैः॥ ३७॥

तथान्यैर्भगवद्भक्तैस्सुहृत्सम्बन्धिबान्धवैः ।
व्रजन्तं सहशिष्यैस्तु कालेह्यन्यत्र तत्र वा ॥ ३८ ॥
तदिच्छयाह्यनुव्रज्य निवर्तेताथवैयदा ।
कृत्वातु रादृपतनं बहुशास्त्रप्रदक्षिणम् ॥ ३९ ॥
आमोक्षात्सर्वसिद्धीनां भक्तानां भावितात्मनाम् ।
परागतिर्गुरुर्यस्मात् प्रसाद्यस्स्मृतएवसः ॥ ४० ॥

इतिश्रीपांचरात्रे श्रीसात्वतसंहितायामभिषेकविधि नाम त्रिंशः परिच्छेदः ॥२० ॥

अथ एकत्रिंशः परिच्छेदः ।

नारदः ।

भगवन्नथविश्वात्मा चोदितस्ताळकेतुना ।
द्विजप्रधानायतन्म आकर्णयतसांप्रतम् ॥ १ ॥

संकर्षणः ।

नियमाः किं स्वरूपास्तु दातव्यादीक्षितस्यच ।
गुरुणाप्रतिपन्नस्य शासनेस्मिन् जगत्प्रभोः ॥ २ ॥

श्रीभगवान् ।

प्रत्येकस्मिन्हिनियमे निर्गतेतु गुरोर्मुखात् ।
प्रब्रूयाद्बाढमित्येवं शिष्यश्शोकाग्निशान्तये ॥ ३ ॥
नाक्रम्यागौरवीच्छाया देवी यानगतास्वपि ।
गुरुवद्गुरुवर्गश्च द्रष्टव्यो नित्यमेवहि ॥ ४ ॥

शयनासनयानाद्यं तदीयमभिवादयेत ।
अतन्द्रितस्सदाकुर्या द्व्यापारं तद्गृहेखिलम् ॥ ५ ॥
नासने तत्समक्षंच वस्तव्यं नचदक्षिणे ।
संयन्त्रित स्संयतवाक् तदाज्ञां सम्प्रतीक्षते ॥ ६ ॥
तत्सन्निधौतु नान्येषां प्रत्युत्थानं समाचरेत ।
कुर्यात्संशय विच्छित्तिं नतदादेशतोविना ॥ ७ ॥
व्याख्यानमागमानांच योगाभ्यासश्चधारणा ।
एवमादिकमन्यच्च स्वगृहे न गुरोर्गृहे ॥ ८ ॥
न शंखचक्रपद्मांके भोक्तव्यं भाजनेतुवै ।
तल्लक्ष्मचोपलंकाष्ठं लोष्ठंवाफलकादिकम् ॥ ९ ॥
क्रमणीयंनपादेन कल्प्यन्नैवासनार्थतः ।
भगवच्छासनज्ञाना माराधनरतात्मनां ॥ १० ॥
यथोचितंयथाशक्ति पूजाकार्यासदैवहि ।
प्रासायंदेवदेवीय माचार्यं पाञ्चरात्रिकम् ॥ ११ ॥
अश्वत्थश्च वटन्धेनुं सत्समूहं गुरोर्गृहम् ।
दूरात्प्रदक्षिणीकुर्या न्निकटात्प्रतिमांविभोः ॥ १२ ॥
दण्डवत्प्रणिपातैस्तु नमस्कुर्याच्चतुर्दिशम् ।
नयानपादुकारूढो नसोपानत्कपादभृत ॥ १३ ॥
विनिक्षिप्तमनाभूत्वा संविशेद्भगवद्गृहम् ।
नव्याख्यावसरेकुर्या त्प्रत्युत्थानाभिवादने ॥ १४ ॥
नाभक्तानां नमूर्खानां नास्तिकानां विशेषतः ।
दातव्यस्संप्रवेशश्च नोपहासरतात्मनाम् ॥ १५ ॥
नापूजितं समुद्घाट्यं शासनं पारमेश्वरम् ।
समक्षं नान्यभक्तानां नतत्सन्देह शान्तये ॥ १६ ॥
प्रकाशनीयं तल्लोभा न्नचान्येन कुतोभयात् ।
सुगन्ध फलपुष्पाद्य मपूर्वं शुचितंचयत ॥ १७ ॥

अभोज्यं गुरुदेवाग्नि निवेदन विवर्जितम् ।
तस्करात्पतिताच्चण्डा द्दम्भलोभसमन्वितात ॥ १८ ॥
मात्राचि [लुब्धाद्धि] तं न गृह्णीयात् अभक्तादुपचारतः ।
गृहीत्वाभगवद्धिम्बं वृत्त्यर्थमटतीह्यः ॥ १९ ॥
नगरापणवीधीषु तस्यदेवलकस्यच ।
दर्शनं स्पर्शनंचैव कुर्यात्संम्भाषणंनाहि ॥ २० ॥
गायेत्तुभगवद्गाथां योग्रामे नगरान्तरे ।
तत्प्रभुस्तावकंचैव पूजयेच्चैव [?] सर्वदा ॥ २१ ॥
विष्णुव्रतपरंचैव विष्ण्वायतनवासिनं ।
विष्ण्वालाप कथासक्तं विष्ण्वायतनमार्जकम् ॥ २२ ॥
श्रावकंवैष्णवानांच विष्णुधर्मपरायणम् ।
पर्येष्टिकृद्वैष्णवानां मान्योवै विष्णुवत्सदा ॥ २३ ॥
प्रातरुत्थाय चिन्वीयात् स्वारामात्स्वयमेवहि ।
पूजार्थं मत्रंमन्त्रेण पुष्पादीन् प्रयतस्सदा ॥ २४ ॥
याया दरण्य मथवा निर्बाधं हि तदार्जने ।
अकण्टकद्रुमोत्थाश्च कण्टकद्रुमजा अपि ॥ २५ ॥
हृद्या स्सुगन्धाः कर्मण्या ग्राह्या स्स्वर्येखितादयः ।
उग्रगन्धाह्यकर्मण्या स्सप्रसिद्धा स्तथैव च ॥ २६ ॥
चतुष्पथशिवावास श्मशानावनिमध्यगाः ।
क्षता अशनिपाताद्यैः क्रिमिकीटसमावृताः ॥ २७ ॥
वर्जनीयाः प्रयत्नेन पत्रपुष्पफलादयः ।
अम्बुजानि सुगन्धीनि सितरक्तानि कानिचित् ॥ २८ ॥
योक्तव्यानि पवित्राणि नित्य माराधकेन तु [नेद्रुवै] ।
सांकुराणि च पत्राणि भूगतान्येव मेवहि ॥ २९ ॥
विहितान्यर्चने नित्यं यथर्तुप्रभवानि च ।
नगृह्ये करवीरोत्थैः कुसुमै रर्चनं हितम् ॥ ३० ॥

विशेषत स्सकामस्य सिद्धिभूतियुतस्य च ।
अतोन्यथा न दोषोस्ति दोष उन्मत्तकादिभिः ॥ ३१ ॥
सद्योहतानां विहित स्त्व म्लानानां यदा क्रयः ।
प्रदान मम्बुसिक्तानां तेषां कार्यं नचान्यथा ॥ ३२ ॥
निर्दोषतां प्रयान्त्याशु मन्त्रिणा मवलोकनात् ।
भवन्ति भक्तिपूतानि हृन्मन्त्रनिरतात्मनाम् ॥ ३३ ॥
न कांस्यपात्रे भोक्तव्यं न तत्र विनिवेदयेत् ।
देवाय मधुपर्कार्थं तथा वै सति सम्भवे ॥ ३४ ॥
मृण्मयायसपात्रेषु न धूप मपि निर्दहेत् ।
धूपार्थं गुल्गुलु स्साज्यो देयश्च सुरभिः परः ॥ ३५ ॥
सह घण्टारवेणैव दीपार्थं परिवर्जयेत् ।
मेदोमज्जातसीतैलं घृतं तैलविमिश्रितम् ॥ ३६ ॥
नाविकं मधुपर्कार्थे दधिक्षीरादिकं शुभम् ।
कौलुत्थः कौलपः कार्ष्णशाल्युत्थो नोदनोहितः ॥ ३७ ॥
नापक्वान्नं न मांसश्च नारनाळविभावितम् ।
नचाराधनकालेतु समुत्तिष्ठे त्त्वरान्वितः ॥ ३८ ॥
आसमाप्तिक्रियां चैव उपरोधेन केनचित् ।
आधारा द्भगवद्बिम्बा द्भद्रपीटा ज्जलच्युतिः ॥ ३९ ॥
न कार्या कण्टके क्रोडैः मृदुकूर्चादिना विना ।
नस्नाया न्न स्वपे न्नग्नो न मौनं चाचरे द्गुरोः ॥ ४० ॥
नोच्छिष्टं संस्पृशेत् किंचि न्नाश्नीया द्भगवद्गृहे ।
सन्निकर्षे नचाग्नेस्तु न गृहे मद्यसंकरे ॥ ४१ ॥
भक्तानां कृतदीक्षाणां व्यंगंशा [ऽशा] न्नार्थमे [ए] वच ।
नकुर्या त्तैर्जिगीषुस्सन् [अन्येषां धर्मशास्त्रं च]
क्रोधनिर्मुक्तयाधिया ॥ ४२ ॥
शिष्याणां विष्णुभक्तानां नित्यं कुर्याच्च संग्रहम् ।
मानमात्सर्यकार्पण्य लोभमोहादयो ऽगुणाः ॥ ४३ ॥

वर्जनीयाः प्रयत्नेन [नेतव्या स्ता नघं सर्वे]
यावज्जीवावधि क्रमात् ।
अकृत्स्ना दुपसन्नानां देशान्तरनिवासिनाम् ॥ ४४ ॥

इष्टोपदेशः कर्तव्यो नारायणरतात्मनाम् ।
यो नवेत्याच्युतं तत्वं पञ्चरात्रार्थ मेव च ॥ ४५ ॥
तथा सद्वैष्णवीं दीक्षां नानाशास्त्रोक्तलक्षणाम् ।
न तेन सह सम्बन्धः कार्यो भिन्नक्रमेण तु ॥ ४६ ॥

न शास्त्रार्थस्य शास्त्राणां बुद्धिपूर्वं उपप्लवः ।
आचर्तव्य इहाज्ञानात पारम्पर्यक्रमं विना ॥ ४७ ॥
प्रष्टव्यो भगवद्भक्त आप्तो लक्षणकोविदः ।
प्रसिद्ध आर्जवे वृद्धो नष्टं शास्त्रार्थलक्षणम् ॥ ४८ ॥
मुद्रामण्डलमन्त्राणां निस्सन्देहपरेण च ।
भवितव्यं गुरूणां च सकाशा त्सर्वदैव हि ॥ ४९ ॥

नच सर्वज्ञमन्त्राणां विना भावांशकेनतु ।
आनुकूल्यं गवेष्टव्य मुक्त्वा मण्डलदर्शनम् ॥ ५० ॥

नाभिचक्रेतु हृत्पद्मे कन्दमूले गलावटे ।
भ्रूमध्ये ब्रह्मरन्ध्रेच स्थाने ष्वेतेषु मन्त्रराट् ॥ ५१ ॥
स्मर्तव्य स्सूर्यसंकाशः प्रवासे शयने ध्वनि ।
मृगसूकरमांसानि मायाम्मीनोत्थितानि च ॥ ५२ ॥

न हंसकच्छपीयानि न शृंगाटफलानि च ।
न तथा पद्मबीजानि न वटाग्रं समारुहेत ॥ ५३ ॥
छेद्यमानं न तत्पश्ये त्तद्दलं नांघ्रिणा स्पृशेत ।
पुण्यक्षेत्रं महातीर्थं सिद्धाश्रम मनुत्तमम् ॥ ५४ ॥
वैष्णवीं पर्षदं वापि व्यक्तिस्थानं तथाच्युतम् ।
आसाद्य मण्डलं कृत्वा चक्रं वा द्वादशारकम् ॥ ५५ ॥

निर्वाहणीयं विधिवत् चातुर्मास्यं महामत ।
गृहे संयमपूर्वं वा क्रमं कृत्वा तु कुड्यगम् ॥ ५६ ॥
चतुर्विधेन रजसा प्रतिमाया अथाग्रतः ।
संयुक्तानपि पूर्वोक्तैः एतांश्च समयान् सदा ॥ ५७ ॥
निर्वाहकाणां भक्तानां प्रयच्छेत्सततं गुरुः ।
ज्ञात्वा निर्वाहकं भक्तं तस्यादौ देशिकेनतु ॥ ५८ ॥
समुद्दिश्यास्तु ते सर्वे निर्वहत्यथ येषु वै ।
तेषु तेषु नियोक्तव्यो यथा न च्यवते पुनः ॥ ५९ ॥
धावन्ति समयघ्नस्य सविघ्नास्तु विनायकाः ।
विमुखा सिद्धयो यान्ति ह्यापदो हि भवन्ति च ॥ ६० ॥
ज्ञात्वैवं सावधानेन निर्वक्तव्यं हितान् प्रति ।
सार मादाय वै बुद्धया निर्मथ्य नियमोदधिम् ॥ ६१ ॥
कृपया गुरुणादेय मशठानांतु पंचकम् ।
भक्ति रग्नौ गुरौ मन्त्रे शास्त्रे तदधिकारिणि ॥ ६२ ॥
नियतं पंचकं चास्य यथावत्परिपालनात् ।
अनुष्ठानात्तु नान्येषां स्वातन्त्र्येण यथेच्छया ॥ ६३ ॥
भव्यानां मनसोभीष्टाः भवर्तन्तेहि सिद्धयः ।
ये ऽनिर्मलेन मनसा उपरोधात्तु कुर्वते ॥ ६४ ॥
पालनं समयानां च ते मज्जन्त्यसितेध्वनि ।
सुप्रसन्नेन मनसा यथैतत्परिपाल्यते ॥ ६५ ॥
तथा प्रसाद मभ्येति स्व आत्मातु हितैषिणाम् ।
नूनं कालुष्यमुक्तानां स्थिताना मिह सत्पथे ॥ ६६ ॥
समये साधकाचार्यपुत्रकाणां भवेत् शुभम् ॥ ६६॥ ॥

इति श्रीपांचरात्रे श्रीसात्वतसंहितायां

समयविधि र्नाम

एकविंशः परिच्छेदः ॥ २१ ॥

अथ द्वाविंशः परिच्छेदः ।

संकर्षणः ।

लक्षणं ज्ञातु मिच्छामि चतुर्णां देव सांप्रतम् ।
विज्ञातव्यास्तु कै र्लिंगैः भेद स्तेषां तु किंकृतः ॥ १ ॥

श्रीभगवान् ।

यश्श्रीमान् श्रद्धानस्तु मतिमान् सुदृढव्रतः ।
सत्यवाक् भगवद्भक्तो मिताशी संगवर्जितः ॥ २ ॥
गुर्वाराधननिष्ठस्तु स्थिरबुद्धिरतन्द्रितः ।
सद्वैष्णवकुले जात स्तु संस्कारै स्सुसंस्कृतः ॥ ३ ॥
पुरामाता पितृभ्यान्तु नीतस्सद्योग्यतापदम् ।
विमुक्तसंकरोदान्तः परत्रभयशंकितः ॥ ४ ॥
साधुसंगमसाकांक्ष श्शास्त्रार्थी स्वादलम्पटः ।
तत्संचय व्यसनवा न्धार्मिकाणां पथि स्थितः ॥ ५ ॥
शुभकर्मरतो नित्य मदीनस्सत्ववान्क्षमी ।
धीरोदयापरश्चैव साधूना मुपकारकृत् ॥ ६ ॥
निर्मलाम्बरधारीच विमलांगस्सदैवहि ।
प्रियभाषी प्रसन्नास्यः परद्रव्ये ष्वलोलुपः ॥ ७ ॥
परदार स्पृहामुक्त स्सद्विवेक पदाश्रितः ।
क्षत्रविट् छूद्रजातीयो मद्यमांसे ष्वलम्पटः ॥ ८ ॥
शौचस्वाध्यायनिरत स्सन्तुष्ट स्सततोद्यतः ।
उच्छिष्टवर्जनपर श्चकृतघ्न तनुस्सदा ॥ ९ ॥
मानमात्सर्यकार्पण्य परित्यागपरोमहान् ।
दैवेपित्र्येसदोद्युक्तो दम्भाचार विवर्जितः ॥ १० ॥

निश्शेषाणा मकर्मण्य द्रव्याणां परिहारकृत्।
मातु र्जनकनिष्ठानां सद्बन्धूनांच वत्सलः ॥ ११ ॥
व्रतनिर्वाहकश्चाभी र्नित्यंनीचासनप्रियः।
सर्वेषामूर्ध्वतोनित्यं स्थितिकामपरायणः ॥ १२ ॥
वंशोद्धारैकरतया सुधियालंकृतस्सदा।
गुरुप्रसादादन्यत्र स्वगृहेवागुरोर्गृहे ॥ १३ ॥
लब्धदर्शनमात्रो वै मन्त्रमूर्तेस्तुमण्डले।
गुरुहग्वीक्षणेनैव प्रोक्षणेनैवसंस्कृतः ॥ १४ ॥
बुद्ध्यतेतावताचैव कृतार्थोस्मीति सांप्रतम्।
ततःप्रभृतिकालाच्च सुप्रसन्नाच्च देशिकात् ॥ १५ ॥
पाठपूर्वंहिशास्त्रार्थ मभ्यर्थयति योनिशम्।
श्रुत्वाविचारयत्यर्थो नेकान्तेविजनेस्थितः ॥ १६ ॥
नाभिमानपदंयाति सुसम्पूर्णोपिचोदितः।
शिक्षयत्यधनान्येषां लुब्धस्स्वार्थस्य सिद्धये ॥ १७ ॥
नोद्ग्राहयतिशास्त्रार्थ मभ्यर्थयतियोनिशम्।
नविक्रियामवाप्नोति ह्याक्षिप्तोप्यथसंसदि ॥ १८ ॥
नमन्यतेतदासम्य ग्विजेष्यामीति वादिनः।
कुण्डमण्डलमुद्रासु पीठबिम्बालयेषुच ॥ १९ ॥
समन्त्रेषुच बुद्धिस्थं नित्यंकुर्याच्च संग्रहम्।
प्रयनादिषुकालेषु प्रत्यहं त्वस्यसम्भवात् ॥ २० ॥
देवमर्घापयेत्कुर्यात् स्वयंवामान्त्रमर्चनम्।
गुर्वादिष्टो गुरूणांच कुर्यात्पादाभिवन्दनम् ॥ २१ ॥
कार्यातेषांनजिज्ञासा यथायानत्यप्रसन्नताम्।
प्रसादाद्विधिवत्पृच्छे दबुद्धमथविस्मृतम् ॥ २२ ॥
विज्ञातमथवाज्ञात माचार्यैःपरिचोदितः।
कलशांतेषां स्वकांमुद्रां गुप्तांकृत्वा प्रकाशयेत् ॥ २३ ॥

संस्कृतश्रुतपाठाभ्यां स्वगुरुंप्रार्थयेत्ततः ।
भगवद्यागपूर्वन्तु पुत्रकाख्यंपरम्पदम् ॥ २४ ॥
असन्निधानात् स्वगुरोः प्रार्थयेत्तत्प्रतिष्ठितम् ।
तदभावात्तुवैचान्यं क्रमात्सद्वैष्णवोद्विजः ॥ २५ ॥
नान्यदर्शनसंस्थन्तु गुरोर्यस्मादवैष्णवात् ।
कर्मतन्त्रंसमन्त्रंच द्रव्यसंघातजम्फलम् ॥ २६ ॥
नूनंवैफल्यमायाति तस्मात्तंपरिवर्जयेत् ।
द्रव्यमन्त्रक्रियाभाव भेदात्फलमनश्वरम् ॥ २४ ॥
जायतेकर्मिणांशश्व दभेदाद्वैश्यकर्मिणाम् ।
सर्वत्रसमबुद्धीना मात्मन्यभिरतात्मनाम् ॥ २५ ॥
लोकाचारवियुक्तानां यद्वाविप्राद्विणान्तुवै ।
ज्ञात्वैवंसहवैयस्य सम्बन्ध स्सफलोभवेत् ॥ २६ ॥
सर्वदासउपास्तव्य इहामुष्मिकसिद्धये ।
लिंगैरेतैःपरिज्ञेय स्सहजोत्थैरकृत्रिमैः ॥ २७ ॥
आचार्यैस्समयीनाम शिष्योजात्याचतुर्विधः ।
एवंपुत्रकपूर्वाये परिज्ञेयास्तुतेत्रयः ॥ २८ ॥
किन्तुतस्यविशेषोय स्तमिदानींनिबोधतु ।
विज्ञातागुरुणायस्य विनियोगात्कृतार्थता ॥ २९ ॥
स्वल्पमन्त्रचोत्तमाथेन शिक्षितेनागमेनच ।
तस्यानुग्रहबुध्यातु आभू [हू] तस्याच्युतालये ॥ ३० ॥
कृत्वानिरीक्षणाद्यश्च देवधाम्नि वदेत्स्वयम् ।
तुष्टोमन्त्रमयंसम्यक् साध्यपुष्पाक्षतांजलिः ॥ ३१ ॥
ततःप्रभृतिकालाच्च ध्यानंन्यासादिकंविना ।
पूजनंमन्त्रमात्रेण वह्नितर्पणवर्जितम् ॥ ३२ ॥
योग्यतापदसिद्धयर्थं दत्तम्बिम्बेप्सुवास्यके ।
सामान्यविधिनाचोक्तो गुरुणाचार्चयाच्युतम् ॥ ३३ ॥

सतथेतितदुक्तश्च मत्तस्तेमुदितस्सदा ।
आलोचयंस्तु शास्त्रार्थं स्वमुद्रामुद्रितन्तुवै ॥ ६४ ॥
शक्त्यानिरीक्षमाणश्च योगक्षेमादिकंगुरोः ।
तदाराधननिष्ठस्तु तच्चित्तस्तत्परायणः ॥ ३५ ॥
समाक्षिप्तस्तदादेशा न्मन्त्रमुद्राद्वयंविना ।
कीर्तयंस्स्वगुरोर्ब्रूयात् ज्ञातंशास्त्रार्थ मुत्तमम् ॥ ३६ ॥
विचार्यंस्वधियासम्य ग्वैष्णवानां हि संसदि ।
यथानेतिजनानांच मध्ये मात्सर्यभूमिताम् ॥ ३७ ॥
सशिष्यःपुत्रकोनाम स्वपुत्रादधिकस्सदा ।
साधकाख्येविशेषोय स्त मिदानींनिबोधमे ॥ ३८ ॥
पूर्वंव लब्धदीक्षस्तु मन्त्राराधनतत्परः ।
स्नानादिना खिलेनैव देवभूतेन कर्मणा ॥ ३९ ॥
सिद्धये स्वात्मन श्चैव लोकानां सा [रा] धनाय च ।
वने वा यत्नोद्देशे स्वगृहे वा मनोरमे ॥ ४० ॥
मन्त्रसेवाघ्र्यदानं च कुर्या न्मन्त्रव्रतं महत् ।
परमः पालनीय श्च तेनैव समय स्सदा ॥ ४१ ॥
यद्दत्तावच संलब्धं यच्छक्त्यानन्द मात्मनि ।
तदाश्चर्यं न वक्तव्यं पूजापूर्वं गुरो र्विना ॥ ४२ ॥
आत्मीयमुद्रासंयुक्तो नित्योयुक्त स्स्वकर्मणि ।
श्रद्धया य स्सवोद्धव्य स्साधको भगवन्मयः ॥ ४३ ॥
लिंगैः पूर्वोदिते युंक्त स्त्वभियुक्तो विशेषतः ।
अनुग्रहार्थं गुरुणा भक्तानां विनियोजितः ॥ ४४ ॥
पदानि पद्मन्त्राणां सार्थकानि च वेत्ति यः ।
वाच्यवाचकभावेन सांगनांगवशेन वा ॥ ४५ ॥
करविग्रहकल्हार चक्रन्यासार्थ मेव च ।
समेन विषमेणैव सक्तु स्त्रिनादिकेन च ॥ ४६ ॥

तेषा मर्थवशा च्चैव विनियोगं हि वस्तुषु ।
ध्यानदैवतविज्ञाना द्व्यापकत्वन्तु चाध्वनि ॥ ४७ ॥
निर्लिंगं देवतानां च शब्दब्रह्मत्व मेवहि ।
यथावदनुजानाति स्ववर्णैः प्रागुदीरितम् ॥ ४८ ॥
सांकर्य मागमानां च वेत्ति वाक्यवशात्तु यः ।
तत्र वै त्रिविधं वाक्यं दिव्यं च मुनिभाषितम् ॥ ४९ ॥
पौरुषं चारविन्दाक्ष तद्भेद मवधारय ।
यदर्थादृच मसन्दिग्धं स्वच्छ मल्पाक्षरं स्मृतम् ॥ ५० ॥
तत्पारमेश्वरं वाक्य माज्ञासिद्धंहि मोक्षदम् ।
प्रशंसकं हि सिद्धीनां सम्प्रवर्तक मप्यथ ॥ ५१ ॥
सर्वेषां रंजकं गूढं निश्चयीकरणक्षमम् ।
मुनिवाक्यन्तु तद्विद्धि चतुर्वर्गफलप्रदम् ॥ ५२ ॥
अनर्थक मसम्बद्ध मल्पार्थं शब्दडम्बरम् ।
अनिर्वाहक माद्योक्तं वाक्यं तत्पौरुषं स्मृतम् ॥ ५३ ॥
हेयं चानर्थसिद्धीना माकरं नरकावहम् ।
प्रसिद्धार्थानुवादं यत संगतार्थं विलक्षणम् ॥ ५४ ॥
अपिचे त्पौरुषं वाक्यं ग्राह्यं तन्मुनिवाक्यवत् ।
एव मादेय वाक्योत्थ आगमो यो महामते ॥ ५५ ॥
सन्मार्गदर्शनं कृत्स्नं विधिवादं च विद्धि तम् ।
तत्प्रामाण्यात्तु यत्किंचित् समभ्यूह्य यथार्थतः ॥ ५६ ॥
पूर्वापराविरोधेन निर्वाहयति सर्वदा ।
भक्तानां चोदित स्त्वेवं पदवाक्यप्रमाणवित् ॥ ५७ ॥
स्वमुद्रालंकृतश्चापि य स्सदा चक्रधृक्चरेत् ।
स देशिको निबोद्धव्य स्सर्वै स्सर्वाधिको गुणैः ॥ ५८ ॥
वेदयत्यन्यथात्मानं योन्यस्मिन् योजितं पदे ।
कृत्वापेक्षान्तु हृदये स याति नरकेधमः ॥ ५९ ॥

नो भाजनं स्यात सिद्धीनां क्रमत्यागे कृते सति ।
स्व माचारं स्वकां जातिं स्वगोत्रं स्वगुरो गृंहम् ॥ ६० ॥
स्वपदं च स्वसंस्कारं प्राङ्‍ निषिद्धेन वै विना ।
गोरय त्याचिरा द्यो वै पातित्य मुपयाति सः ॥ ६१ ॥
तस्मा च्छ्रेयोर्थिना नित्यं नाभिमानं न सत्क्षयात् ।
अधरोत्तरता सम्य गाचर्तव्या च कुत्रचित् ॥ ६२ ॥

संकर्षणः ।

मुद्राच्चतुष्टयं देव कीदृग्लक्षणलक्षितम् ।
ज्ञायते यत्परिज्ञाना द्देशिकान्तं चतुष्टयम् ॥ ६३ ॥

भगवान् ।

यत्पूर्वंब्रहरेः प्रोक्तं शिरोमुद्रादिपंचकम् ।
तदंगुष्ठविनिर्मुक्तं विद्धि न्यूनांगुलैः क्रमात् ॥ ६४ ॥
च्चतुष्टयं चतुर्णान्तु गुर्वन्तानां यथास्थितम् ॥ ६५ ॥

इति श्रीपांचरात्रे श्रीसात्वतसंहितायाम्
अधिकारिमुद्राभेदविधि नाम

द्वाविंशः परिच्छेदः ॥ २२ ॥

अथ त्रयोविंशः परिच्छेदः ।

नारदः ।

कामपालेनदेवेश स्वयंब्राह्मणसत्तमाः ।
चोदितोयतदधुना कथयामिसमासतः ॥ १ ॥

सङ्कर्षणः ।

ज्ञातोविभवदेवानां देवबीजगणोमया ।
अधुनाज्ञातु मिच्छामि तत्पिण्डनिचयोद्दियः ॥ २ ॥

श्रीभगवान् ।

यथाक्रमोदितानांच देवानांविनिबोधतु ।
पिण्डमन्त्रगणंमत्त स्सावधानेनचेतसा ॥ ३ ॥
नाभेरष्टमबीजंयत् स्थितन्तत्सप्तमोपरि ।
तदधश्चोत्तरंचाक्षा दरान्तेनविभूषयेत् ॥ ४ ॥
अथोत्तरंचाक्षदेशा दादायतदधोन्यसेत् ।
बीजंनेमेर्द्वितीयंयत् पद्मयांमङ्कयेत्तदासने ॥ ५ ॥
आधारषष्ठसंरूढं कुर्याद्वैनाभिसप्तमम् ।
अरात्षष्ठस्यचोर्ध्वेतु नाभिपूर्वन्तुविन्यसेत् ॥ ६ ॥
सप्तमंचाष्टमंचापि ह्युपर्युपरिवैक्रमात् ।
अथाष्टमंनाभिदेशा दारूढंसप्तमोपरि ॥ ७ ॥
तदधोमध्यमंचाक्षनवमंपरिकीर्तितम् ।
भूयोरात्पंचम [त] स्योर्ध्वे दद्यान्नाभितृतीयकम् ॥ ८ ॥
बाह्यात्तृतीयन्तन्मूर्ध्नि पिण्डोयंदशमस्स्मृतः ।
द्वितीयंनाभिदेशाच्च तत्तृतीयंतदूर्ध्वगम् ॥ ९ ॥
नेमेराद्यन्तमूर्ध्वेतु स्मृतामेकादशंविदम् ।
अधोनाभिचतुर्थस्य सप्तमंविनिवेश्यच ॥ १० ॥
तदधोनेमिपूर्वन्तु एतद्द्वादशमंस्मृतम् ।
नेमेस्त्रिदशमादाय तदधोयोजयेत्क्रमात् ॥ ११ ॥
सप्तमं च चतुर्थं च पुन र्नाभे र्महामते ।
अरा ष्षष्ठासना स्सर्वे पिण्डमेत्त्रयोदशम् ॥ १२ ॥

नाभे श्चतुर्थ मादाय तदूर्ध्वे सप्तमं न्यसेत ।
नवमं चॉपि तन्मूर्ध्नि एत द्विद्धि चतुर्दशम् ॥ १३ ॥
नेमे श्चतुर्थसंख्यस्य ऊर्ध्वाधोभ्या न्निवेश्य च ।
षर्णं नाभिद्वितीयं तत् तत्पंचदशमं स्मृतम् ॥ १४ ॥
षड्विंशसंख्यकं बाह्या दादाधाराख्यमण्डलात् ।
सान्तिमेन च षष्ठेन वृत्तमायादनन्तरम् ॥ १५ ॥
नेमेस्सप्तमवर्णस्य ऊर्ध्वाधोभ्या न्निवेश्यच ।
नाभिदेशा द्वितीयं य द्विद्धि सप्तदशन्तु तत् ॥ १६ ॥
नवमं नाभिदेशाच्च सप्तमस्योपरि न्यसेत् ।
यथाष्टमं नाभिदेशा त्कुर्या त्सप्तममूर्ध्वगम् ॥ १७ ॥
द्वितीयमपि तस्याथ तस्मा द्वे नाभिमण्डलात् ।
अस्य त्रयोदशा दूर्ध्वे न्यूनविंशतिमन्तु तत् ॥ १८ ॥
नाभे श्चतुर्थं तस्योर्ध्वे तत्तृतीयं तदूर्ध्वगम् ।
तत्रैव सप्तमं य द्वे विद्धि विंशतिमं त्विदम् ॥ १९ ॥
द्वितीयस्याष्टम न्नाभे र्वर्णस्योर्ध्वे नियोज्य च ।
अरा त्षष्ठं च तस्याधः कुर्या त्तदनु लांगलिन् ॥ २० ॥
नवमं नाभिदेशाच्च तृतीयस्योपरि न्यसेत् ।
द्वितीयं तदधः कुर्या त्त्रयोविंशतिमं स्मृतम् ॥ २१ ॥
अष्टमं सप्तमं नाभे द्वितीयं प्रथमं ततः ।
क्रमेण योजये च्चैव अरा त्षष्ठस्य मूर्धनि ॥ २२ ॥
नेमे स्सप्तम मादाय तदधो नाभिसप्तमम् ।
तत्तृतीयं च तस्याधः चतुर्विंशतिमं स्मृतम् ॥ २३ ॥
नाभे स्तृतीयं तस्योर्ध्वे द्वितीयं तस्यचोपरि ।
निवेश्य नेमिपूर्वन्तु षड्विंशा मधुनोच्यते ॥ २४ ॥

अरा त्पष्ठासनं कुर्या द्वर्णनाभिद्वितीयकम् ।
तदूर्ध्वे सप्तमं चैव अतोऽन्य मवधारय ॥ २५ ॥
न्यूनं षड्विंशतिं नेमे स्तस्योर्ध्वाधोगतं न्यसेत् ।
सप्तमं नाभिवर्णेभ्य स्तवरवर्गाच्च पंचमम् ॥ २६ ॥
नेमे रात्द्वितीयं च आदाय तदधो न्यसेत् ।
मध्यमक्षा न्महाबुद्धे रष्टाविंशतिमं स्मृतम् ॥ २७ ॥
नवमं सप्तमं नाभे स्तृतीयं च तृतीयकम् ।
अथोत्तरस्य मक्षाच्च आदाय तदधो न्यसेत् ॥ २८ ॥
तृतीयं च द्वितीयं च नाभिदेशा दनन्तरम् ।
नाभिद्वितीय मादाय सप्तमं तुर्यमेव च ॥ २९ ॥
तृतीयस्याथ वै नाभे श्चोक्षा दाद्यं तु मूर्धगम् ।
अक्षमस्याथ वै नाभे रथ ऊर्ध्वं द्वितीयकम् ॥ ३० ॥
दद्या त्तदन्वरा त्षष्ठं तस्यैवाधोगतं तु वै ।
अरा त्षष्ठस्य चोर्ध्वंतु नाभिपूर्वं च तत्परम् ॥ ३१ ॥
विनिवेश्याष्टमं चापि षट्त्रिंश मवधारय ।
सप्तमं च तृतीयं च चतुर्थं नाभिमण्डलात् ॥ ३२ ॥
योजयित्वा तदूर्ध्वे चाप्यराणां त्रिदशं न्यसेत् ।
अथवा नवमं नाभे स्तृतीयं च द्वितीयकम् ॥ ३३ ॥
तत्सप्तत्रिंशकं विद्धि नाभिदेशा दथाहरेत् ।
अरा त्पष्ठासनं पूर्वं द्वितीयं च तदूर्ध्वतः ॥ ३४ ॥
नवमं चापि तस्योर्ध्वे पिण्डास्त्वथादिमं विना ।
अरान्ताद्येन वै मूर्ध्ना सर्वे कार्या ह्यलंकृताः ॥ ३५ ॥
नमोन्ताः प्रणवाद्याश्च युक्ता स्संज्ञापदे स्स्वकैः ।
अरान्ताद्यं विना यस्य य ऊर्ध्वे वर्धते स्वरः ॥ ३६ ॥
अधोवानाभिपूर्वेण सहसा केवलं हितम् ।
अपास्य च ततः कुर्या त्सर्वेषां पूजनाय च ॥ ३७ ॥

स्वेन स्वेनतु पिण्डेन सिद्धवद्वांगकल्पनम्।
नमः प्रणवसंज्ञास्याः जाति कर्मवशा त्पुनः॥ ३८ ॥
आतदुक्तात्तु यजनात मोक्षनिष्ठ स्समाचरेत्।
बीजपिण्डपदोत्थानां विनियोगन्तु चाखिलम्॥ ३९ ॥
किन्त्वेषां वैभवी मुद्रा देयाराधनकर्मणि।
तदंगमुद्रा श्वांगानां योज्या मन्त्रे स्स्वके स्सह॥ ४० ॥
... ... सेद्धमन्त्रोदितं मया।
दीक्षापूर्वं हि मन्त्राणां चातुर्वर्ग तथासनम्॥ ४१ ॥
लक्षणं पदमन्त्राणा मथेदानीं निबोधतु।
ये विना लब्धसत्ताना मर्चनं हि न जायते॥ ४२ ॥
विश्वातीताय विमलपदं विद्याविधायिने।
पद्मनाभाय वै विश्वव्यापिने तदनन्तरम्॥ ४३ ॥
चतुर्विंशाक्षरं विद्धि पतत्संख्यं परं श्रृणु।
ज्योतीरूपाय पंचार्णं पदं गगनमूर्तये॥ ४४ ॥
ध्रुवाय दद्या त्तदनु परमन्त्र्यक्षरं ततः।
पदप्राप्तिचतुर्वर्णं हेतवे त्र्यक्षरं त्विति॥ ४५ ॥
अनन्ताय पदं दद्या त्ततो परिमिताय च।
सर्वाश्रयाय तदनु तदन्ते धृतशक्तये॥ ४६ ॥
एतद्विंशतिसंख्यं च द्वाविंशं क्रमत श्श्रृणु।
नमो भगवते कृत्वा वासुदेवाय वै ततः॥ ४७ ॥
सर्वशक्त्यात्मने नन्तमूर्तयेनु पदं त्विति।
विद्वया [द्या] त्मने महाशब्दं पुरुषाय पदं ततः॥ ४८ ॥
मोहमायापदं चैव ततो विध्वंसिने नु वै।
सदोदिताय शब्दं तु सर्वशक्ति पदं ततः॥ ४९ ॥
नियोक्तव्यं चतुर्वर्णं सप्तविंशाक्षरं स्मृतम्।
पदं वेदविदे विश्वव्यअकाय ततो भवेत्॥ ५० ॥

तदन्ते विश्वपतये ततो वै परमात्मने।
एष विंशतिभि वर्णैः शृणु सप्तदशाक्षरम् ॥ ५१ ॥
ज्ञानात्मने पदं कुर्यात संविच्छब्द मतः परम्।
पदं प्रकाशाशयाय शान्तरूपाय वै ततः ॥ ५२ ॥
अनन्तशक्तयेसर्व व्यापिनेतदनन्तरम्।
जगन्मयायतदनु विश्वरूपायवैपदम् ॥ ५३ ॥
एकविंशतिभिर्वर्णै रयमुक्तोपरंशृणु।
सत्त्वपदमादाय शुद्धाशयपदंततः ॥ ५४ ॥
ततःपरमहंसाय ततोमानसचारिणे।
न्यूनविंशत्यक्षरश्चैवा थातोयज्ञमूर्तये ॥ ५५ ॥
पदमादायतदनु विश्वान्तर्वर्तिनेतुवै।
ततोभुवनशब्दन्तु वराहायपदंत्वथ ॥ ५६ ॥
विभुतिस्वामिनेचेति चतुर्विंशाक्षरस्त्वयम्।
नमोभगवतेदद्या ततोवै [वासत्रादये] वामबाधिये ॥ ५७ ॥
जद्ज्जलेन्धनपदं प्रदीप्तपदमेवतु।
वीर्यायफट्तदन्तेतु एतत्संख्यस्त्वयंस्मृतः ॥ ५८ ॥
सर्वान्तश्चारिणेदद्यात प्रसन्नपदमेवच।
मूर्तयेथतदन्तेवै दद्याद्धर्मात्मनेपदम् ॥ ५९ ॥
षोडशाक्षरमेतद्वै अतोगुह्यतमंशृणु।
सर्वविद्येश्वरायाथ दद्याद्वाक्पतयेततः ॥ ६० ॥
पदम्पदपदादाय ? [विदेदद्यात] ततोवाग्विभवेत्विति।
न्यूनविंशाक्षरोह्येष स्तवपरंकथयामिते ॥ ६१ ॥
योगैश्वर्यप्रदायाथ योगनिद्रारसेतिच।
निरतायपदंदद्या द्भगवान्जलशायिने ॥ ६२ ॥
त्रिरष्टवर्णसंख्यश्च अयमेकाधिकस्तुवै।
भगवत्पदमादाय अनन्तबलशक्तये ॥ ६३ ॥

तेजोमयायभुवन भूतेथद्व्यक्षरंपदम् ।
तदन्तेविनियोक्तव्यं पदंवैकच्छपात्मने ॥ ६४ ॥
षड्विंशार्णमिमंविद्धि मन्त्रंमन्त्रविदांवर ।
यज्ञांगदेहायाधाय महापदमतःपरम् ॥ ६५ ॥
वराहायततोदधात् पुराणपुरुषायवै ।
दद्यात्ततःप्रजाशब्दं तदन्तेपतयेपदम् ॥ ६६ ॥
चतुर्विंशाक्षरंमन्त्र मेतन्मन्त्रविदांवर ।
नमोभगवतेकृत्वा नारसिंहायवैततः ॥ ६७ ॥
तेजोनिधेपदंदद्यात् पदंहनहनेतिच ।
ततोविकर्मजायंवै शब्दंपश्चाक्षरंभवेत ॥ ६८ ॥
दुष्कृतंहितदन्तेवै सप्तविंशाक्षरस्त्वयम् ।
आदायामृतमूर्तवै ततोज्ञानबलात्मने ॥ ६९ ॥
सर्वेश्वरायभगव न्यूनविंशाक्षरस्त्वयम् ।
आदायपुण्डरीकाक्ष पदंवैपरमेश्वर ॥ ७० ॥
ततस्सकलशब्दन्तु सुखसौभाग्यवैपदम् ।
निधयेवांछितपदं ततस्सिद्धिप्रदेतिवै ॥ ७१ ॥
पदश्चाखिलदुःखेति ततस्तुशमनःप्रये ।
आनन्दसुन्दरपदं ततोलक्ष्मीपदंन्यसेत् ॥ ७२ ॥
पतयेशब्दमुच्चार्य पंचाशार्णस्त्रिरुज्झितः ।
सदसत्पदमादाय मूर्तयेतदनन्तरम् ॥ ७३ ॥
विश्वोत्तमायतदनु ततोमृतनिधेतुवै ।
षोडशार्णस्त्वयंमन्त्र उक्तःकान्तात्मनोविभोः ॥ ७४ ॥
पुरुषोत्तमायशब्दं ततस्सिद्धिप्रदेतिवै [ततोप्रतिहतेतिच] ।
शक्तयेचपदंदद्यात् सर्वेश्वरपदंततः ॥ ७५ ॥
समग्रोग्रभयेत्यत्र निवारणपदन्ततः ।
सप्तविंशाक्षरोमन्त्र उक्तश्चातःपरंशृणु ॥ ७६ ॥

नियन्त्रेपदमुद्धृत्य तदन्तेविश्वहेतवे ।
परब्रह्मसमेतश्च सेतवे ओमनन्तरम् ॥ ७७ ॥
मन्त्रोद्विरष्टवर्णश्च कथितोवक्ष्यतःपरम् ।
पदमप्रतिमेत्यादौ प्रभावन्तदनन्तरम् ॥ ७८ ॥
महाविभूततदनु महामायापदन्ततः ।
अथदर्शकशब्दन्तु तदन्तेतालकेतवे ॥ ७९ ॥
चतुर्विंशाक्षरोमन्त्र स्त्वयमुक्तस्समासतः ।
शान्तात्मनेपदंदद्या तदन्तेयमविन्यसेत् ॥ ८० ॥
नियमाश्रयायदद्या त्परमधिप्रदायच ।
नारायणायशब्दंवै पूर्वसंख्यासमंस्मृतम् ॥ ८१ ॥
भवभंगपदंचैव कारिणेतदनन्तरम् ।
ततोभगवतेशब्दं दत्तात्रेयायवैततः ॥ ८२ ॥
वर्णाश्रमपदंचाथ धर्मशब्दमतःपरम् ।
परिग्रहायप्रणव मष्टाविंशाक्षरस्स्मृतः ॥ ८३ ॥
सर्वलोकमयायेति सर्वज्ञायपदन्ततः ।
सर्वेश्वरायन्यग्रोध शायनायपदंत्वथ ॥ ८४ ॥
त्रयोविंशत्यक्षरश्च स्त्वयमन्यंनिबोधतु ।
भूतशब्दमथादाय भावनायतदन्ततः ॥ ८५ ॥
शब्दंविश्वात्मनेचाथ विमलेतिपदन्ततः ।
दद्याद्विदितशब्दंवै तदन्तेविभवायच ॥ ८६ ॥
षड्विंशार्णस्त्वयंमन्त्रः परमस्मान्निबोधतु ।
भूतशब्दमथादाय व्यापिनेतदनन्तरम् ॥ ८७ ॥
पदंसहस्रार्चिषेतु दद्यात्पंचाक्षरंशुभम् ।
त्रिविक्रमायाथपदं ततोपरिमितेतिच ॥ ८८ ॥
प्रभावायपदंदद्या त्त्रयोविंशाक्षरःस्मृतः ।
नरनाथायशब्दन्तु पुरुषप्रवरायवै ॥ ८९ ॥

आत्मध्यानपरायेति प्रायवैद्व्यक्षरन्ततः ।
एकविंशाक्षरोमन्त्र स्ततोन्यमवधारय ॥ ९० ॥
नारायणायशब्दन्तु दद्यान्निरतिवैपदम् ।
शयानन्दमयायेति पदन्निरभिमानवै ॥ ९१ ॥
पदासक्तायतदनु पञ्चविंशाक्षरस्त्वयम् ।
परायपदमादाय ततोविपरमात्मने ॥ ९२ ॥
योगेश्वरायहरये मन्त्रोयंषोडशाक्षरः ।
सप्तार्णपदमादाय प्राङ्नमःपरमात्मने ॥ ९३ ॥
कृष्णायशब्दंतदनु कमलंव्यक्षरन्ततः ।
दळशब्दन्तुवितत नेत्रायपदनन्तरम् ॥ ९४ ॥
श्रीह्मिष्टायब्रह्मणेवै अष्टाविंशाक्षरस्ततः ।
भगवन्पदमादाय युगान्तदहनेतिच ॥ ९५ ॥
दीप्तयेयपदंदद्यात् संसारपदमेवहि ।
बन्धविच्छेदकर्त्रेवै द्वाविंशार्णस्त्वयंस्मृतः ॥ ९६ ॥
पदंचतुर्मूर्तयेवै चतुर्गतिमयायच ।
शरशार्ङ्गभृतेदद्या च्छरदिन्दीवरात्विषे ॥ ९७ ॥
ततोभगवतेदद्या दभिरामपदन्ततः ।
शरीरायपदंचैव त्वष्टत्रिंशाक्षरस्स्मृतः ॥ ९८ ॥
दद्याद्विदितशब्दंवै परमार्थपदन्ततः ।
ततोवेदविदेशब्दं विदुषेव्यापकायच ॥ ९९ ॥
स्वामिस्तदनुवैदद्या द्व्यक्षरंचापरूपदम् ।
अयंविंशतिभिर्वर्णै रकबत्वन्यमतःशृणु ॥ १०० ॥
दद्याद्गरुडशब्दन्तु वदन्तेवाहनेतिच ।
सर्वशास्त्रोपदेष्टेचमतश्शु [शमयाशु] अमयेतिच ॥ १ ॥
ततोधुनधुनादाय कर्मबन्धांस्ततोवदेत् ।
धर्मपाहिततोदद्या जगद्धर्मंतदोवदेत् ॥ २ ॥

चतुर्विंशाक्षरोमन्त्र एषवक्ष्याम्यतःपरम् ।
संहारमूर्तयेशब्दं कालवैश्वानरार्चिषे ॥ ३ ॥
पाताळशयनायेति स्वज्ञाननिगळेतिवै ।
निचयंहनवीप्सातः प्रणवन्तदनन्तरम् ॥ ४ ॥
पञ्चत्रिंशाक्षरोह्येष सर्वसिद्धिकरस्स्मृतः ।
प्रणवालंकृतास्सर्वे नमस्कारविभूषिताः ॥ ५ ॥
संस्मृताःपूजिताश्चैव ध्याताजप्ताविशेषतः ।
तत्रास्तियत्रयच्छन्ति भक्त्याउत्कर्मणांभुवि ॥ ६ ॥
अथलांछनमन्त्राणां शास्त्राणांलक्षणंशृणु ।
सहस्रदीधितिपदं दद्याच्छुरितवैततः ॥ ७ ॥
विग्रहायदशार्णंच त्र्यधिकंमकुटस्यच ।
आदायवांछितपदं ततस्सिद्धिप्रदायवै ॥ ८ ॥
महाचिन्तापदंदद्या न्मणयेतदनन्तरम् ।
त्रिद्विपंचदशार्णंच दशार्णमपरंशृणु ॥ ९ ॥
[सर्वलक्षणशब्दन्तु ततस्सम्पत्प्रदायवै ।
ततश्चिन्तापदंदद्या न्मणयेतदनन्तरम्] ॥ ११० ॥
सौभाग्यशब्दमादाय जननिध्यक्षरन्ततः ।
सर्वप्रदेतुतदनु अयंमेवंदशाक्षरः ॥ १ ॥
प्राणात्मनेथसत्याय विद्धिसप्ताक्षरंत्विह ।
कालकर्त्रेथचक्राय फडष्टार्णःप्रकीर्तितः ॥ २ ॥
विश्वात्मनेपदंदद्या त्ततोविश्वप्रदायच ।
नवाक्षरमिदंविद्धि परमष्टाक्षरंशृणु ॥ ३ ॥
समादायपदंविद्ये ततोविद्येश्वरार्चिते ।
प्राक्शब्दमूर्तयेकुर्या च्छंखायाष्टाक्षरःस्मृतः ॥ ४ ॥
पदंरसनिधेकुर्यात् भीष्मशब्दमतःपरम् ।
भीषणायतदन्तेवै दशाक्षरमिदंस्मृतम् ॥ ५ ॥

प्राग्भुवनाधिपतये स्तम्भभूतायवैपदम् ।
त्रयोदशाक्षरंविद्धि ततोन्यमवधारय ॥ ६ ॥
पदमिन्द्रियकोशाय इष्वस्त्रायदशाक्षरम् ।
कल्पान्तानिलघोषाय विद्युल्लसितवैपदम् ॥ ७ ॥
प्रभायषोडशार्णन्तु नवाक्षरमतश्शृणु ।
महामायापदं दद्या द्वन्धवर्ण द्वयं ततः ॥ ८ ॥
ध्वंसिने पद मादाय एतत्संख्यम्पदंशृणु ।
सर्वास्त्रग्रसनादाय पराय तदनन्तरम् ॥ ९ ॥
सन्तापकायशब्दन्तु दर्पविध्वंसिनेततः ।
एकादशाक्षरं विद्धि नवाक्षरमथोच्यते ॥ १२० ॥
अज्ञान खण्डनपदं परायतदनन्तरम् ।
त्रैलोक्यमोहनपदं मूर्तयेतु नवाक्षरम् ॥ १ ॥
आकर्षणपरपदं महामाया मयेतिवै ।
द्वादशाक्षर संख्यस्तु नवाक्षर मथोद्धरेत् ॥ २ ॥
प्रागखण्डित शब्दन्तु तदन्ते विनियोज्यच ।
पराक्रमायशब्दन्तु सप्ताक्षरमतश्शृणु ॥ ३ ॥
दर्पप्रशमकर्त्रेतु पञ्चार्णं विनिबोधवै ।
तेजोमाक्तिनिचेत्येत द्वाविंशत्यनुकीर्तिताः ॥ ४ ॥
प्राग्वदाद्यन्तसंरुद्धाः स्वनामपदभूषिताः ।
संख्यानिष्ठाक्षरस्यान्ते दद्यात्संज्ञा पदं सदा ॥ ५ ॥
चक्रवच्चास्त्र मन्त्राणां कुर्यान्नामा वशानकम् ।
क्रमाच्चतुर्दशानान्तु शक्त्यन्तानाञ्चफट्पदम् ॥ १२६ ॥

इति श्रीपांचरात्रे श्रीसात्वत संहितायां
विभवदेवता मन्त्रोद्धारविधि नाम

त्रयोविंशः परिच्छेदः ॥ २३ ॥

अथ चतुर्विंशः परिच्छेदः ।

श्रीनारदः ।

विप्रप्रधाना श्शुत्वेवं मन्त्राणां लक्षणं स्फुटम् ।
चोदितो भगवानेवं पुन र्वै तालकेतुना ॥ १ ॥

संकर्षणः ।

ब्राह्मणः क्षत्रियो वैश्य श्शूद्रोवा भगवन्मयः ।
नित्याराधनका मस्तु यदि मन्त्रमयं वपुः ॥ २ ॥
कर्तु मिच्छति लक्षार्थं तत्र किं लक्षणो विधिः ।

श्रीभगवान् ।

चित्रमृत्काष्ठशैलोत्थं सल्लोहमय मेव वा ॥ ३ ॥
भेदभिन्नं द्विजातीनां हितं बिम्बं फलार्थिनाम् ।
तदभिन्न मकामानां मामं चाप्यविरोधकृत ॥ ४ ॥
अत्र चित्रमयं विद्धि भित्तिकाष्ठाम्बराश्रितम् ।
पूर्वं वर्णक्रमेणैव चतुर्धाचाम्बरोत्थितम् ॥ ५ ॥
तच्च कार्पासकौशेय क्षौमशाणमयन्तु वै ।
मृज्जमेवं सितावुत्थं सार्क्षं विविध मेव च ॥ ६ ॥
आश्वत्थं ब्रह्मवृक्षोत्थं श्रीपर्णी सुरदारुजम् ।
वा[सा]लताल मयं चैव शाशव[शैंशुपं]न्ती न्दुसारजम् ॥ ७ ॥
एवं द्वयं द्वयं विद्धि द्विजादीनां यथाक्रमम् ।
अतोन्ये दृढमूला श्च सारवन्तो हि याज्ञिकाः ॥ ८ ॥
साधारणा श्चतुर्णान्तु प्रतिमाद्ये च कर्मणि ।
सामान्यं मुक्तिभुक्त्यर्थं मश्म मृण्मयवत्स्मृतम् ॥ ९ ॥

तारहाटकताम्रोत्थ मारकूटमयं तथा ।
एवं हि भूमयो वज्रपाषाणा धातवो द्रुमाः ॥ १० ॥
वज्रादयो खिला रत्ना स्सितरक्तादिलक्षणाः ।
असामान्याः फलेप्सूनां लाभालाभवशा त्पुनः ॥ ११ ॥
सम्यक् स्वमूर्तिमन्त्रैस्तु जपहोमार्चनादिना ।
नये त्सामान्यभावित्वं तथा तत्कारणार्चनात् ॥ १२ ॥
यजेत् सेन्द्रां धरां शैल मृदापादनकर्मणि ।
एवं पटद्रुमार्थन्तु वरुणं सवनस्पतिम् ॥ १३ ॥
सरत्नानां च धातूनां सम्बन्धैर्केन्दुपावकान् ।
रत्नाश्रयेण धातूत्थे [त्वर्थे] नार्च्यादेशेन वै विना ॥ १४ ॥
तथार्चनासनेनैव चक्रपद्ममयादिना ।
नरात्नी प्रतिमा शस्ता ध्यायिनां ध्यानसिद्धये ॥ १५ ॥
केवला लघुमाना च प्रमाणावयवोज्झिता ।
वर्णाश्रमगुरुत्वाच्च स्वामित्वा दखिलस्य च ॥ १६ ॥
भूतादिदेवरूपत्वात उत्त माद्येषु वस्तुषु ।
नृप श्चार्हति वै नित्यं सविशेषपदे स्थितः ॥ १७ ॥
किं पुन र्यो फलाकांक्षी भक्तिश्रद्धापर स्सदा ।
बुध्वैवं चित्रबिम्बार्थी यत्नेनेदं समाचरेत् ॥ १८ ॥
गुह्यकान् गृहदेवांस्तु हृदार्च्योर्घ्यादिना पुरा ।
मलभस्मतुषांगार केशकीटनखा स्तृणम् ॥ १९ ॥
मूलकण्टकचर्मास्थि सामान्ये श्माद्रिभित्तिका ।
भवत्यनर्थदावश्य मतः प्राक्चतुरंगुलम् ॥ २० ॥
विहाय मृदकं भित्ते रीषद्भिम्बात्तु चाधिकम् ।
उक्तदोषविमुक्ताथ पंचगव्येन साम्भसा ॥ २१ ॥
मर्दितया मृदा भूय स्तद्भिरयंशं प्रपूर्य च ।
शस्त्रेण काष्ठफलकां मृगचर्मसमां पुरा ॥ २२ ॥

छविं विहाय शुद्ध्यर्थं तुरी मुक्तन्तु वै घटम् ।
प्रक्षाल्य सलिलेनैव त्वस्त्रजप्तेन समधा ॥ २३ ॥
हृन्मन्त्रेणतु सास्त्रेण मूर्ति मन्त्रांचितेन च ।
तीर्थोद्देशा न्नदीतीरा त्पुण्यक्षेत्राच्च पर्वतात ॥ २४ ॥
अपास्य दोषसंकीर्णा मृत्स्वा दादाय मृत्तिकां ।
सावचूर्ण्याथ संशोध्या सुपश्लिष्टे धरातले ॥ २५ ॥
शाण मौर्णं च कार्पासं सूत्रं चाकवि [ससूत्रं चावि]जं तथा ।
कृत्वा पाषाणभिन्नं मा ग्योज्यं तत्र सवालुकम् ॥ २६ ॥
ईषद्गोमययुक्तेन भूरिक्षीरघृतादिना ।
भावये त्पंचगव्येन खादिरेण कषेण च ॥ २७ ॥
सिद्धार्थकालसिस्नेह विलोल्येन च वै सह ।
क्लेदयेच्च त्रिसप्ताहं भाण्डे कृत्वा यसादिके ॥ २८ ॥
मारुतानलसूर्येन्दु दर्शनेन विनैवाहि ।
तया समाप्यं तद्बिम्बं शुभकाष्ठान्तरीकृतम् ॥ २९ ॥
वस्त्रवच्चैव लोहानां कृत्वा प्रक्षालनं ततः ।
मार्जनं भूतिना भूय स्तथा तन्मन्त्रितेन च ॥ ३० ॥
भक्त्या प्रवर्तमानस्तु बिम्बसाधनकर्मणि ।
सर्वत्र चास्त्र मन्त्रस्य कुर्या न्निर्विघ्नशान्तये ॥ ३१ ॥
पूजनं हवनं भूत बलिदानं सदक्षिणम् ।
सम्यक् [न्मृद्] ग्रहणकालेतु एत त्सामान्य मेव हि ॥ ३२ ॥
सच्छैलदारुग्रहणे विशेष स्त्वधुनोच्यते ।
सर्वत्रारम्भकालेतु निमित्त मुपलक्ष्य च ॥ ३३ ॥
विशेषा द्ध [च्चं] नया त्रायां तच्छुभेन शुभोदयः ।
अशुभेन निमित्तेन यात्रा विघ्नवती भवेत् ॥ ३४ ॥
विरामेणतु जप्येन शान्तिस्वस्त्ययनादिना ।
निवर्तनेन तद्धन्या द्दहते शुभकृत्ततः ॥ ३५ ॥

मन्त्र मभ्यर्च्य यात्राया मभ्यर्थ्याज्ञां विनम्य च ।
नैवेद्यशेषभुग्वाम चारस्थ स्संयतेन्द्रियः ॥ ३६ ॥
प्राङ्मुख स्संस्मरे न्मन्त्रं समुत्थायामृतोदये ।
परिज्ञाय पुरा मूर्तिं तन्मूर्त्यन्तर मेव वा ॥ ३७ ॥
याया त्तदीयं दिग्भागं तदभावात्तु चान्यदिक् ।
सहाये रप्रमत्तैस्तु शिल्पिभि स्सह संवृतः ॥ ३८ ॥
लाजदध्यक्षतैः कुम्भै र्याया त्पुष्पपुरस्सरैः ।
सौमनस्यं महोत्साह स्त्वंगस्पन्दश्च दक्षिणः ॥ ३९ ॥
शुभा वाणी ध्वनि श्शांख स्तन्त्री वाद्यं फलादयः ।
गोगजाश्वद्विजाः कन्या नवभाण्डं च मृद्दधि ॥ ४० ॥
आर्द्रमांसान्यलंकारो मदिराग्नी घृतं पयः ।
सिद्धान्नं शालिबीजादि दर्भा स्सद्रुममञ्जरी ॥ ४१ ॥
छत्रवस्त्रध्वजायानं रोचना कुंकुमं मधु ।
दर्पणं चामर श्चैव धातव श्शस्त्रवर्जिताः ॥ ४२ ॥
रत्नानि वैबुधं बिम्बं मधु मत्तो ह्यकातरः ।
जीवन्मत्स्या निमित्तश्च मनसो यद्खेददम् ॥ ४३ ॥
तत्सर्व दर्शने श्रेष्ठं तद खेदद मशोभनम् ।
स्वगृहद्वारदेशाच्च पथि सप्तपदावधि ॥ ४४ ॥
क्रममाणे निमित्तं च फलं यच्छत्यनेन हि ।
निर्गत्य नगरा द्ग्रामा त्क्रोशार्धं क्रोश मेव वा ॥ ४५ ॥
गृह्णीया च्छाकुनं चिह्नं नकुलादिमयं स्वतः ।
पूर्णा त्सार्धाधिका त्क्रोशात् द्वितकृन्मृगदर्शनम् ॥ ४६ ॥
दिङ्मुखे निर्मले सिद्धि र्व्रजे. द्यत्र विशेषतः ।
असकृच्चाम्बरं स्वच्छं सुदीप्ता भास्करादयः ॥ ४७ ॥
मरुत्सुखावहस्स्निग्धः प्रदक्षिणगतिस्स्थिरः ।
दिव्याद्युत्पातनिर्मुक्त स्सकालस्सिद्धिसूचकः ॥ ४८ ॥

हंसश्शुको भरद्वाजः कोकिळः खंजरीटकः ।
मयूरो भ्रमर श्चक्र वाकाद्याः खेचरा श्शुभाः ॥ ४९ ॥
भूचरानकुळास्सौम्या स्सिसादि र्गृहगोधिका ।
गन्धाखुर्जम्बुकश्चैव सर्वेषां दर्शनं शुभम् ॥ ५० ॥
मृगाणां हरिणस्सिंहो व्याघ्रश्शशकचित्रकाः ।
सिद्धिसंसूचकास्सर्वे सर्वेषां विहितन्तुवै ॥ ५१ ॥
प्रदक्षिणं विशेषेण व्यत्यये जम्बुक श्शुभः ।
द्विजादिकं [दीनां] रुतं स्निग्धं सिद्धिकृतत्त्वसौख्यदम् ॥ ५२ ॥
समुत्पन्ने निमित्ततु धातुसंक्षेपकर्मणि ।
प्रतीक्षितुं नयुज्येत यदाशान्ति तदाचरेत् ॥ ५३ ॥
पूर्वोक्तां चित्तशुद्ध्यर्थं सविशेषां सदक्षिणाम् ।
प्रविश्यविधिवत्क्षेत्रं निरीक्षेत स्वतेजसा ॥ ५४ ॥
पश्येच्छिळांगुणवतीं तरुंवाकर्मणिक्षमम् ।
वर्जयेदतिवृद्धाश्च परीक्षीणत्वचंतथा ॥ ५५ ॥
सभङ्गांदावदग्धांच निश्शब्दां रूक्षविग्रहाम् ।
सवालुकांच सच्छिद्रां बिन्दुयुक्तांपुटोद्वहाम् ॥ ५६ ॥
आखुदर्दुरमीनाहि मार्जारशशकोपमाम् ।
सुवर्णपरवर्णांतथ सिराजालेन सन्ततां ॥ ५७ ॥
प्रागुक्तरूपस्याभावा दमीषांग्रहणंहितम् ।
पारावतशुकाब्जाभा मधुमाञ्जिष्ठमाषभा ॥ ५८ ॥
गुर्वीहृद्याशुभास्निग्धा अतोवान्याभिशस्यते ।
सुहृद्ये भूतले मग्ना जळाशयतळस्थिता ॥ ५९ ॥
छत्रातरुवरेणैव वनराजिष्ववस्थिता ।
वेष्टितावल्लिबृन्देन तथैवोषधिभिर्वृता ॥ ६० ॥
ऊर्ध्वगाजानदेशाच्च एकपिण्डीकृताभृगोः [मृदुः] ।
मोक्षदाचलवक्त्रावै भोगदासुतद्धानना ॥ ६१ ॥

दिङ्मुखाचोभयकरी प्राङ्मूर्धाभूतिरायुषे ।
अतोन्यमस्तकाकीर्ति यशोवृद्धिकरीमता ॥ ६२ ॥
वंशवृद्धिदमारोग्य शान्तिकृत्कंयदाप्यदिक् ।
पुष्टिसुन्नतिसन्मेधां यच्छत्युत्तरमस्तका ॥ ६३ ॥
एवंपुरापरिज्ञाय पृष्ठोरुचरणंशिरः ।
बलात्मनासवीर्येण प्रोद्धृत्यसहाशिल्पिभिः ॥ ६४ ॥
प्राङ्मुखंचोत्तरस्यांवै प्राग्भागेचोत्तराननम् ।
स्थलेवतार्यमन्त्रेश मिष्ठास्रक्चन्दनादिना ॥ ६५ ॥
ध्यात्वाशिलान्तस्संरुद्धं सम्पूज्यजुहुयात्ततः ।
उक्तदिग्द्वितयस्यैक देशेकुण्डेथवास्थले ॥ ६६ ॥
हुत्वापूर्णाहुतिंध्यान जपयुक्तःक्षपेदहः ।
निशागमेर्चनंकुर्या द्बलिभिर्भूततर्पणम् ॥ ६७ ॥
नैवेद्यशेषमश्नीया न्मन्त्रविन्यस्तविग्रहः ।
तद्दक्षिणेनदर्भेषु प्राक्छिराःप्रस्वपेज्जपन् ॥ ६८ ॥
पूर्वव त्स्वप्नलाभार्थ मुत्थाय रजनीक्षये ।
कुर्या त्स्वकार्यं जुहुया दशुभस्वप्नशान्तये ॥ ६९ ॥
अभिनन्द्य शुभं स्वप्नं हृदयावर्जकं स्फुटम् ।
पर्वतं च स्व मात्मानं स्थानं तदुपलं स्थलम् ॥ ७० ॥
स्फटिकामलसंकाशं पश्ये द्वा तप्तहेमवत् ।
निर्धूमांगारकूटाभं तदाशु लभते शुभम् ॥ ७१ ॥
सशस्त्र मथ चादाय मुद्गरं चास्त्रमन्त्रितम् ।
प्राङ्मुखश्चतुरो वारां स्ताडये न्मस्तकावधेः ॥ ७२ ॥
पाददेशाच्च वा मध्या दवेक्ष्य च फलं पुरा ।
चतुरश्रायतां कृत्वा भिन्नां पीठेन यन्त्रगाम् ॥ ७३ ॥
आनाय्य वा पृथक्पीठां छन्नां कर्मालयं शुभम् ।
विन्यस्य वै पुरा तेन विधिना चोद्धरे च्छिलाम् ॥ ७४ ॥

पीठार्थं भिन्नवर्णां च तद्रूपां वा यथेच्छया ।
अंगांगिभाव गुणव द्दृषदां तु महामते ॥ ७५ ॥
काष्ठलोहमणीनां चा प्यलाभे सति वै शुभम् ।
सति लाभे न वै कुर्यां द्वैषम्यं व्यत्ययं च वा ॥ ७६ ॥
तत्काल मेव चाहृत्य रत्नाधारां शिलां शुभाम् ।
पुंस्त्रीनपुंसकोत्थाभि शिलाभि स्स्यात्तथा [त्रितयं] हितम् ॥७७॥
बिम्बाख्यं विद्धि चाभावात् सर्वं बिम्बो पलात्तु वै ।
निषिद्धं भगवद्बिम्बं रत्नपीठमयोपलात ॥ ७८ ॥
लक्ष्म्याद्या देवताकारा स्स्वोपला स्सर्वसिद्धिदाः ।
या हता ऽ नलविन्दून्वै सनाद मभिमुंचति ॥ ७९ ॥
पुमानिति शिला सा वै निस्तेजा स्सस्वना ऽ बला ।
आदिमध्यावसानेषु नाग्नि यस्या नच ध्वनिः ॥ ८० ॥
नपुंसकेति सा ज्ञेया स्वपदस्था फलप्रदा ।
शिलाग्रहण मित्युक्तं दारुग्रहण मुच्यते ॥ ८१ ॥
आपर्वतान्तस्संचारो निर्व्रणं सरलं बृहत ।
रोग मुक्तं न विहगाद्यैः प्राङ्नखे स्सक्षतीकृतम् ॥ ८२ ॥
नानिलाशनिदावाग्नि हतवीर्यं न बाह्यगम् ।
सलक्षणेतु सुस्निग्धे भूभागे चोन्नते स्थितम् ॥ ८३ ॥
प्राग्वत्तमधिवास्यादौ परेद्ह्न्यर्चयेत्ततः ।
तदाश्रिता मविज्ञात स्वरूपां देवतां पठन् ॥ ८४ ॥
इहाश्रितात्मने तुभ्यं नम स्सर्वेश्वराय च ।
क्षमस्वावतरान्यत्र सन्तिष्ठाव चिदात्मना ॥ ८५ ॥
अथास्त्रोदकशुद्धेन विलिप्तेन घृतादिना ।
जपन् मन्त्रवरं वौषट् छिन्द्या द्वै क्रकचादिना ॥ ८६ ॥
प्राच्या मुदीच्या मैशान्यां पतत्यभिमुखं यदि ।
परिज्ञेयं शुभं कुर्यां दन्यपातेर्चनादिकम् ॥ ८७ ॥

अनाद्या देवभागं वा ऽप्यनादेयेन वै विना ।
बिम्ब मिच्छति वै कर्तुं वार्क्षं चैवाति विस्तृतम् ॥ ८८ ॥
अनेकभुजवक्त्राब्जभूषितं तत्तदास्थितैः ।
भिन्ने ऽवयवे मान युक्ते दुं [शि] ष्टे न दूष्यति ॥ ८९ ॥
भक्ति श्रद्धा वशाच्चैव सर्वं चार्णमयं यतः ।
एवमेकतमस्यापि भक्तिपूर्वस्य वस्तुनः ॥ ९० ॥
संग्रहंच पुराकृत्वा कुर्यादाकारमीप्सितम् ।
तादर्थ्येनतुसामान्यं सौम्यमानं पुराशृणु ॥ ९१ ॥
ऋज्वाख्य मविकारंच व्यापकं त्वेकमूर्तिमत् ।
भूभागे सुसमे श्लक्ष्णे मानमुद्दीयतेनवै ॥ ९२ ॥
निरूप्यावयवानांच लक्ष्मविस्तृतिपूर्वकम् ।
अष्टाधिक शतांशोय स्स्वोन्नतेरंगुलश्चतत् ॥ ९३ ॥
द्वे अंगुलेकलानेत्रं गोळकं भावएवच ।
अंगुला दष्टभागोय स्सयवः परिकीर्तितः ॥ ९४ ॥
षट्कलंचपरिज्ञेयं तालं बिम्बादि कर्मणि ।
मुखांगनाभि मेढ्रस्मा स्तालमाना स्सथोरुयुक् ॥ ९५ ॥
द्विकलेच तथाजंघे गुल्फंजानुर्गलंचकम् ।
त्र्यंगुलं त्र्यंगुलंज्ञेय मित्युन्मान मुदाहृतम् ॥ ९६ ॥
जटाधराणां बिम्बानां दीर्घह्रस्व वशेनतु ।
चतुष्कलंच त्रिकल स्मानम्मानाद्वहिः क्षिपेत् ॥ ९७ ॥
त्रिपंच सप्तशिखरो मौळिरष्टकलोन्नतः ।
निर्जटानां ललाटोर्ध्वे मकुटंवा सुशोभनम् ॥ ९८ ॥
तालेन द्वासप्तत्यर्द्धातु कार्यंतत्र व्यपेक्षया ।
यथोदितेषु भागेषु एकैकेनां गुलेनतु ॥ ९९ ॥
आस्यनासा ललाटार्धं वदनांशंभजेत्त्रिधा ।
ततोग्रतः कलामानं घ्राणंस्या त्तिलपुष्पवत् ॥ १०० ॥

कळार्धेनतुविस्तार स्सोन्नतिस्तत्पुटद्वये ।
नासाग्र ग्रासनिर्मुक्तं गोजीमानं चतुर्यवं ॥ १ ॥
तच्चतुर्यवमानेन घ्राणाग्रेणान्तरीकृतम् ।
अर्धांगुलंचोत्तरोष्ठ मधरोष्ठन्तुचांगुलम् ॥ २ ॥
गोळकंचिबुकंविद्धि सृक्किण्यो चतुरंगुळे ।
आद्यस्य नासिकाशस्य मध्यभाग समाश्रिते ॥ ३ ॥
कुर्यान्नेत्रश्रुतिच्छिद्रे तन्नेत्रे कळान्तरे ।
कळायामसमन्दैर्ध्यात कळार्धेनतुविस्तृतम् ॥ ४ ॥
यदुत्पल दलाकारं द्वियवेनाधिकन्तुतत् ।
कुर्यात्पद्म दळाकारं नेत्रार्धं वृत्ततारकम् ॥ ५ ॥
तारादैर्घ्यंत्रिभागेन त्वाद्यस्यान्यस्यवाधिका ।
यवेने केन सार्धेन ज्योतिस्तत्पंचभागिकम् ॥ ६ ॥
त्रिभागेनापि विहितं तत्पद्मदळलोचन ।
द्विषड्यवंनेत्रकोशं विस्तारेणयवाधिकम् ॥ ७ ॥
सार्द्धांगुळद्वयंदैर्घ्यात् भ्रूलते द्विकळेस्मृते ।
मध्यतो द्वियवेबाळ चन्द्रतुल्ये क्रमक्षते ॥ ८ ॥
तदन्तरं कलार्द्धंच तत्कोटी समसूत्रके ।
श्रोत्रद्वयंगुळविस्तीर्णे आयामेन द्विगोळके ॥ ९ ॥
द्वियवः कण्ठपरिधिः पर्वणीद्वे चतुर्यवे ।
मध्यन्ताभ्यां तथाविद्धि श्रोणीसार्द्धांगुळान्वै ॥ ११० ॥
कळार्धेनतुतच्छिद्रं पाशमानं यथारुचि ।
अंगुलाद्विकळान्तस्तु वैषम्यमपि तत्रयत ॥ १ ॥
अन्तश्छिद्र विनिर्मुक्तं वद्विस्तियं चतुर्यवम् ।
सदलं करणोपेत मेवं श्रोत्रद्वयं स्मृतम् ॥ २ ॥
चतुष्कलं ललाटन्तु शिखरे द्वे द्विगोळके ।
तच्छाया स्त्र्यंगुळेचैव अग्रसांगुळ विस्तृते ॥ ३ ॥

केशभूमेस्समुद्भूतं ललाटोपरिसंस्थितम् ।
कुर्या त्कलार्द्धमानन्तु वक्रश्चालकसंचयम् ॥ ४ ॥
कपोलपरिधिं कुर्या त्कर्णा त्कण्ठगतं समम् ।
तन्मध्ये वर्तुलौ गण्डौ परिच्छिन्नौ पुरोदितैः ॥ ५ ॥
शिरसःपरिणाहन्तु विद्धि षट्त्रिंश दंगुलम् ।
श्रोत्रकोटिद्वयाच्चैव मस्तकस्य यदन्तरम् ॥ ६ ॥
तत्षोडशांगुलंविद्धि वर्तिभ्यां पृष्ठतस्तथा ।
सार्द्धतालंपरिज्ञेयं ललाटात्कशुद्धान्तरम् ॥ ७ ॥
सत्कम्बुसदृशीग्रीवा मूलमध्याग्रतोद्विषा ।
परिधे द्वादशकला एकविंशांगुलाग्रतः ॥ ८ ॥
अष्टादशांगुलाचैव स्वांशात्त्र्यंशेनविस्तृता ।
तन्मूलं विस्तृतोस्कन्धौ तुंगौ वृत्तायतौ समौ ॥ ९ ॥
षडंगुलन्तद्बाहुल्यं बाहुमान मथोच्युते ।
स्कन्धोत्तमांगं त्रिकलं सन्ध्यन्तं षट्कलं स्मृतम् ॥ १२० ॥
स्कन्धेर्मणिबन्धान्तं मानं नवकलं स्मृतम् ।
मणेर्मध्यमशाखान्तो हस्तस्सप्तांगुलोन्नतः ॥ १ ॥
परिज्ञेयं कलाहीनं तन्मात्रम्मध्यमांगुले ।
तच्चतुर्थवहीनाच सानामानुप्रदेशिनी ॥ २ ॥
द्विकलाचपरिज्ञेया सांगुष्ठातुकनीयसी ।
द्विपर्वाचस्मृतोंगुष्ठ स्सर्वाश्चांगुलिविस्तृताः ॥ ३ ॥
सर्वासांमूलपर्यन्ता द्धासयेत्त्र्यवंयवम् ।
अग्रपर्वार्द्धमानेन कार्यालिंगोपमानखाः ॥ ४ ॥
मानमंगुष्ठमूलस्य परिधेश्चतुरंगुलम् ।
तच्चतुर्थवहीनंच ज्ञेयंत्रिष्वंगुलीषुच ॥ ५ ॥
मूलां [न्यूनांगुले] गुलेःकलाशार्द्धां मागवद्ध्रासश्च वेष्टनात् ।
अंगुष्ठमंगुलंचापा त्रिस्त्रोन्याष्वश्चवासमृताः ॥ ६ ॥

अर्धांगुळाग्रतोन्यूना विद्धिमध्यं क्रमक्षतम् ।
नजलक्ष्मी [चळक्षा] पमंचाग्रात् सांगुळं द्विकळंकरम् ॥ ७ ॥
ईषन्निम्नतळंचैव लक्ष्मरेखाविभूषितम् ।
शाखामूलावधेःपाणौ बाहुल्यन्द्वेयवंगुळम् ॥ ८ ॥
चतुर्यवाधिकंचैव मणिबन्धावधेस्स्मृतम् ।
मध्येकलाधर्हीनन्तु तद्बाहुळ्यमुदाहृतम् ॥ ९ ॥
मणिबन्धावधेर्बाह वेष्टनंषट्कलंस्मृतम् ।
सन्धेस्सप्तकळंविद्धि सांगुळंत्रयवमप्युतम् ॥ १३० ॥
हीनमध्यांगुळेनैव मूलाद्धेनवगोळकम् ।
तथैवसन्धेरूर्ध्वन्तु विस्तारः प्राग्वदत्रच ॥ १ ॥
अत्रापि पूर्ववत् दृष्टचा कार्यान्तस्था क्षिति स्स्वयम् ।
तालं गळावधे स्त्यक्त्वा तन्माननान्तरीकृते ॥ २ ॥
स्तनद्वयं समं कुर्या त्तद्धारा च समांसळा ।
निम्नं हृद्गोळकार्धेन ऊर्ध्वतो रत्नराज्युतम् ॥ ३ ॥
स्तनाभ्यां त्रिकलौ पार्श्वौ त्रियवं स्तनमण्डलम् ।
यवोन्नतं तथाचाग्रात् विस्तृतं तेन चूचुकम् ॥ ४ ॥
लोचनं त्रियवं सार्धं कक्षमान मुदाहृतम् ।
स्कन्धमानविनिर्मुक्तं पृ [ष] ष्ठमंसावधे स्स [श] मम् ॥ ५ ॥
द्रोणीनिकाशसदृशं मध्वराशे स्समांसळम् ।
कक्षान्तर्वेष्टनं विद्धि पंच तालं सुलोचनम् ॥ ६ ॥
विनांगुळद्वयेनैव द्व ताले द्विगुणीकृते ।
यवत्रयसमायुक्तं विद्धि तत्कुक्षिवेष्टनम् ॥ ७ ॥
त्रियवोनकलामानं विज्ञेयं नाभिमण्डलम् ।
तन्मानान्त त्र्यवोनन्तु तन्निम्नत्वं विधीयते ॥ ८ ॥
परिधि र्नाभिमध्येतु त्रिकाल स्स त्रिलोचनः ।
षड्गोळकंच तन्मानपरिद्धयर्धं कटे स्मृतम् ॥ ९ ॥

करिकुम्भोपमौ पीनौ परितः पंच गोळकौ ।
स्फिजौ कौपीनराजीच द्व्यंगुळा मूळतः स्मृता ॥ १४० ॥
परितोंगुळमाना सा मेढ्रन्तु त्रिकळं स्मृतम् ।
चतुर्यवश्च तत्कोशं वेष्टनन्तु षडंगुळम् ॥ १ ॥
द्व्यंगुळौ वृषणौ दैर्घ्या न्मूळान्तसमविस्तृतौ ।
परितो द्वियवं [द्व्यंगुळं] विद्धि वायुरन्ध्रं सुवर्तुळम् ॥ २ ॥
ऊरुमानं परिज्ञेयं मध्यभूमे र्नवांगुळम् ।
षट्कळं मूळदेशाच्च अग्रान्तं त्रिकळं स्मृतम् ॥ ३ ॥
हीनमेकांगुळेनैव द्विकळं जानुमण्डलम् ।
विस्तारेणोन्नतत्वेन चतुर्यवसमन्तु तत् ॥ ४ ॥
जंघामूळे परिज्ञेयं वेष्टनं नवगोळकम् ।
द्विसप्तांगुळकं मध्ये सार्धपंचांगुळं [कळं] ततः ॥ ५ ॥
अत्रापि वेष्टना द्विद्धि तृतीयांशेन विस्तृतिम् ।
मध्यमूळावसानेभ्यो विस्तार मनुगुण्यतु ॥ ६ ॥
भुजाभ्यां मध्यदेशस्य तथांगुळिगणस्य च ।
ऊरुयुग्मस्य जंघाभ्या मापाद्याद्विपहस्तता ॥ ७ ॥
सताळभागमानं च दैर्घ्यं मे चारणं स्मृतम् ।
पार्ष्णीद्विगोळकततन्मध्ये सांगुळे कळे ॥ ८ ॥
त्रिकळं चाग्रत श्चैव बाहुल्येन कळासमम् ।
पद मंगुष्ठनिकरा त्त्रियवोनं प्रकीर्तितम् ॥ ९ ॥
बाहुळंच कळामानं गुल्फदेशाच्च सांगुळम् ।
कनीयांगुळिमूळाच्च गुल्फान्तं पिण्डकांगुळम् ॥ १५० ॥
जंघावसानदेशाच्च वेष्टनं समलोचनम् ।
कळाहीनं तदेवाग्रात परिणाहो विधीयते ॥ १ ॥
चरणं विधिनानेन कूर्मपृष्ठं समाप्य च ।
त्र्यंगुळेन च तद्दैर्घ्या दंगुष्ठस्य च दीर्घता ॥ २ ॥

पंचांगुलःपरिज्ञेयः परिधिस्तस्यळांगळिन् ।
यवद्वयाधिकाकार्या तद्दैर्घ्यात्तुप्रदेशिनी ॥ ३ ॥
अंगुष्ठायामतुल्याथ कार्यावैपादमध्यगा ।
मध्यांगुलेद्विरष्टांश हीनातदनुयास्थिता ॥ ४ ॥
तद्वत्तदनुगायाच त्रिपर्वास्तास्तु पूर्ववत् ।
संयुक्तानखजाळेन कूर्मपृष्ठोपमेनच ॥ ५ ॥
द्विकलन्तुकला [यत्रा] द्धोनं पादतर्जनिवेष्टनम् ।
चतुश्चतुर्यवोनंच तच्छेषाणां प्रकीर्तितम् ॥ ६ ॥
त्र्यंशेनवेष्टनाद्विद्धि सर्वासांचैवविस्तृतिम् ।
सर्वसमांसळास्सौम्या स्समास्त्ववयवाश्शुभाः ॥ ७ ॥
दशनावळिवाह्यस्थे दंष्ट्रेसमयवोन्नते ।
यवद्वयोन्नतंमानं [illegible] चतुष्टये ॥ ८ ॥
तत्पक्ष्मगानांसर्वेषां मानंविद्धिचतुर्यवम् ।
त्रियवंद्विजविस्तार मग्रान्मूलाद्यवद्वयम् ॥ ९ ॥
तत्सार्धमध्यदेशाच्च सर्वेदन्तानिरन्तराः ।
लोमप्रदक्षिणावर्तं मयुग्जन्मोत्थितं शुभम् ॥ १६० ॥
सुनिश्चितंहितंचैत न्मानमव्यभिचारियत् ।
मनोहारित्वमेकत्र रूपलावण्यभूषितम् ॥ १ ॥
सर्वदाचानयोर्विद्धि अन्योन्यत्वेनसंस्थितिम् ।
ससौन्दर्यन्तुमानस्य क्वचिदाक्रम्यवर्तते ॥ २ ॥
लावण्यस्यक्वचित्पात्रं समान्छायावतिष्ठते ।
यथातिरूपवान्लोके दरिद्रोप्यतिमान्यताम् ॥ ३ ॥
विरूपोप्यतिवित्ताढ्यो नारूपोनैवनिर्धनः ।
एवंद्वयोज्झितंविम्ब मनादेयत्वमेतिच ॥ ४ ॥
आदेयमेकयुक्तंच नित्यंयस्मान्महामते ।
सम्यङ्मानेचसौन्दर्ये भक्तानुग्रहकाम्यया ॥ ५ ॥

मन्त्रसान्निधिशक्तिर्वै सफलाह्यधितिष्ठते ।
साम्यकप्रतिपन्नस्य बिम्बेदृग्गोचरस्थिते ॥ ६ ॥
आमूर्तांह्लादयत्याशु ज्ञात्वैवं यत्नमाचरेत् ।
मानोन्मानप्रमाणाना मथसौन्दर्यसिद्धये ॥ ७ ॥
ऋजोस्तुसमपादस्य त्र्यंगुलंचरणान्तरम् ।
तद्द्वैविषमपादस्य अग्रात्तालसमंस्मृतम् ॥ ८ ॥
तत्पार्ष्णिद्वयमद्ध्यात्तु परिज्ञेयंद्विगोळकम् ।
स्थित्यर्थंब्रह्मनाड्यावै तथामार्गद्वयस्यच ॥ ९ ॥
सूत्रेणसुसमेकुर्या द्देहाथदक्षिणोत्तरे ।
समपादस्यबिम्बस्य ललाटान्मेढ्रमस्तकम् ॥ १७० ॥
प्रसार्यसूत्रमाच्छाद्य तेननाभिहृदन्तरम् ।
घ्राणाग्रमलकानांच सन्धिर्यस्तिलकोर्ध्वगः ॥ १ ॥
एवंविषमपादस्य दक्षांगुष्ठाग्रगंनयेत् ।
गात्रसाम्यंसमापाद्यं क्षेत्रात्क्षेत्रगतेनच ॥ २ ॥
सूत्रेणसर्वबिम्बानां वैषम्यविनिवृत्तये ।
चतुस्त्रिद्व्यश्रिपरितः परिशुद्धायतश्शुभा ॥ ३ ॥
अशुभापरिशुद्धात्तु बिम्बोत्थावयवीस्थितिः ।
ललाटमश्वयवक्त्रस्य विस्ताराद्द्वादशांगुलम् ॥ ४ ॥
अष्टलोचनमायामा दग्रतश्चतुरंगुलम् ।
कलार्द्धसुषिरेघ्राणे रन्ध्रभागान्तराकृते ॥ ५ ॥
अष्टांगुलेतु हनुके सृक्विण्यौ द्वेय तत्समे ।
मध्यत श्श्रोत्रगुर्वा द्वे द्व्यंगुले द्विकलोन्नते ॥ ६ ॥
द्व्यंगुळं घ्राणवंशान्तु तदूर्ध्वं द्विकळं स्मृतम् ।
विद्धि वक्त्रविकासं च द्वियवं चाग्रतः क्रमात् ॥ ७ ॥
तमेवहि यवांशेन हन्वन्तं तनुतां नयेत् ।
घ्राणवंशस्य पक्षौ द्वौ मध्यनिम्नौ च संहतौ ॥ ८ ॥

यवद्वयेन सार्धेन दृग्घ्राणाभ्यां तु चान्तरे।
अथोर्ध्वन्तु दृग्द्रोणे यवमानेन संचितम्॥ ९ ॥
ललाटं सालकं प्राग्वत् इडूमध्यं सांगुला कला।
नृसिंहस्य मुखे विद्धि परित श्वाष्टलोचनम्॥ १८० ॥
ततोष्ठकण्ठदेशाच्च कुर्या त्कर्णद्वयोज्झितम्।
तत्कर्णद्वयमानेन ललाटान्तं नये त्पुनः॥ १ ॥
प्रमाणा त्मा कमणीताञ्च संरम्भाघ्रातलक्षणम्।
प्रफुल्लविकसच्छिद्रं घ्राणं वंशान्वितं भवेत्॥ २ ॥
तच्छिद्रपूर्वमानाच्चा प्यस्य वै त्रियवाधिकम्।
सगोळ मुत्तरांगेषु सकलांशं च लोचनम्॥ ३ ॥
अधरोष्ठः परिज्ञेयः स चतुर्यव मंगुलम्।
सार्धं चतुष्कलं धर्कं शेषायामो हनौ स्स्मृतः॥ ४ ॥
लाङ्गिकाक्षः परिज्ञेयो नेत्रमानं यवाधिकम्।
अग्रतो ग्रास मायामि सृक्विण्यन्तं द्वि चांगुलम्॥ ५ ॥
सर्ववृत्तं तदर्धेन नेत्रयुग्मं सविस्मयम्।
पूर्ववद्विस्तृतं श्रोत्रं कलार्धेन तदुन्नतेः॥ ६ ॥
तुल्या चेन्दुकला युग्मयोगस्य भ्रूस्त्रिगोळका।
तन्मध्यन्तु कलामानं शंखावर्तोपम म्मदत्॥ ७ ॥
भागमानं सटावृत्तं कार्यं तच्छिरसि स्फुटम्।
दैर्घ्येण सार्धतालं च स्माधरस्याननं स्मृतम्॥ ८ ॥
विस्तारेण ललाटाच्च तन्मानं द्व्यंगुलोज्झितम्।
सौम्यरूपस्य च विभोः मौघतस्य कलोज्झितम्॥ ९ ॥
तच्चतुर्थांशमानेन पोत्रदेशस्य विस्तृतिः।
तस्योपरिष्टा द्बाहुल्यं तत्समं चांगुलत्वधः॥ १९० ॥
हनद्वयस्य वै मानं सार्धं समांगुळं स्मृतम्।
शेषमाननरन्ध्रं तु सृक्विणीभ्यां यदन्तरम्॥ १ ॥

तद्विकासश्च सार्धेन कलार्धेनाग्रदेशतः ।
स एवांगुळमानेन विज्ञेय स्त्रक्विणीद्वयात ॥ २ ॥
घ्राणरन्ध्रश्च वक्त्रोक्ते दंष्ट्रे द्व्यर्ध [त्र्यर्ध] कलांत्रते ।
नासावंशं यथापूर्वं कदळीनाडिपृष्ठवत् ॥ ३ ॥
श्रोत्रे वाजिमुखोक्तेतु कोटे स्सप्तकळान्तरे ।
तत्तुल्ये लोचने किन्तु प्रान्ततीक्ष्णे यथोज्झिते ॥ ४ ॥
एतेषां विहिता ग्रीवा ह्यंगुळिद्वितयेन तु ।
प्रत्येकदेशा स्संयुक्ता सौम्यमूर्त्युदिता च या ॥ ५ ॥
विनोच्छ्रायेण नृहरे र्यस्य गात्रस्य या प्रमा ।
सा सा सवेष्टना द्व्यासा त्कलार्धेनाधिका भवेत् ॥ ६ ॥
वक्षः कटयुदरांसस्फि क्कलामानाधिकानि च ।
तथैव नखपत्राणि देह श्चास्य समांसळः ॥ ७ ॥
सम्पूर्णो दक्षिणावर्तै र्लोमभि श्चातिकुंचितैः ।
त्रिचतुःपंचवक्त्रस्य विनैवोर्ध्वमुखेन तु ॥ ८ ॥
दक्षिणोत्तरवक्त्राभ्यां ह्रासं कुर्या द्विगोळकम् ।
विकास स्सिंहवक्त्रोक्त उदग्वक्त्रस्य तत्र च ॥ ९ ॥
समो हस्तन्निवेश स्तु चतुर्णां मोक्षसिद्धये ।
आरोग्यभोगकैवल्यप्राप्तये र्धांगुळेनतु ॥ २०० ॥
कुर्या त्सव्यापसव्याभ्या मधो हस्तन्निवेशनम् ।
सह पूर्वानने चैव सम्यक्प्रत्यङ् मुखस्य च ॥ १ ॥
निष्ठा [ष्का] सा यामविस्तारघ्राणदृक् भ्रूश्रुतिष्वथ ।
ईषत्तिर्यक्षितिन्यस्त हङ्मुखं दक्षिणं शुभम् ॥ २ ॥
तद्वच्च पोत्रदृग्वक्त्र मुत्तरं सर्वसिद्धिकृत् ।
स्वकार्यसूचना न्न्यूनं तन्मन्त्रस्य च सन्निधिः ॥ ३ ॥
अतोन्यथा समाश्रित्य शान्ति मास्ते च मन्त्रराट् ।
नित्यं तत्सन्निधानाच्च भूतवेताळराक्षसाः ॥ ४ ॥

आदर्शाना त्पलायन्ते आविशन्ति च दर्शनात् ।
आदाय शिरसा मन्त्रिसमाज्ञां सम्प्रयान्ति ते ॥ ५ ॥
अत स्समाचरे यत्ना येन स्या द्बिम्बसन्निधिः ।
नाद्द तत्सन्निधाना द्वे कश्चि दारभते शुभम् ॥ ६ ॥
वराहदंष्ट्रं सिंह्माक्षं तथा चिपिटनासिकम् ।
विधेयं पंचमं वक्त्रं पंचवक्त्रस्य वै विभोः ॥ ७ ॥
अस्याधरोत्तराभ्यां त्वष्ठोष्ठाभ्यां समता भवेत् ।
विभिन्नतांगुळार्धेन ताभ्यां तन्मध्यगा स्फुटा ॥ ८ ॥
कार्या दशनपाळी वै मूलमध्याग्रत स्समा ।
कळार्धेनोल्बणं वृत्तं तद्गण्डद्वितयं ततः ॥ ९ ॥
द्विकळं चाग्रतःश्मश्रु कळाचार्धकळाक्रमात् ।
सम्बन्धवेणिः पूर्वोक्त मानेन शुभकृद्भवेत् ॥ २१० ॥
सिंहसूकरवाज्या [न्यु] ख्यवक्त्राणां सौम्यतां नयेत् ।
प्रमाणं दृग्गता लक्षा द्व्यवहारमयात्तु ये ॥ १ ॥
विकास श्वाश्ववक्त्रोक्त स्सौम्यरूपस्य भूभृतः ।
तदाद्योक्तस्तु नृहरेः प्रागुक्तो य स्सचोदितः ॥ २ ॥
तथा वक्त्रांगभावित्वे विभो श्शक्तीश्वरस्य च ।
हारनूपुरवस्त्रस्रक्कटकांगदभूषिता ॥ ३ ॥
माल्योपवीतकेयूर मकुटाद्युपशोभिता ।
प्रतिमामन्त्रमूर्तीनां कृता भवति सिद्धिदा ॥ ४ ॥
यत्पुरा पंचधा प्रोक्तं वाहनं प्राप्यदैवतम् ।
तस्य बिम्बसमुत्थेन ताळेन मुखमण्डकम् ॥ ५ ॥
द्व्यंगुळन्तु ललाटोक्तं जटाबन्धो द्विलोचनः ।
द्व्यंगुळेनोन्नतः कण्ठः उरः पंच कळं स्मृतम् ॥ ६ ॥
अष्टांगुळं तदुदरं कटिः पंचांगुळोन्नता ।
नवांगुलायता वूरू जानुनी द्व्यंगुळे स्मृते ॥ ७ ॥

अष्टांगुलोच्छ्रितेजंघे द्व्यंगुकेपादपिण्डके ।
शममेकंकलाहीन न्तद्ग्रीवायाश्चवेष्टनम् ॥ ८ ॥
बिम्बतुल्यापरिज्ञेया सर्वदास्यांगविस्तृतिः ।
तद्विभागाधिकंविद्धि वेष्टनंह्युदरस्यच ॥ ९ ॥
परिधिःकटिदेशस्य चतुर्नेत्राधिकस्तुवै ।
बिम्बोक्तमष्टशंविद्धि तदूर्वोर्मूलवेष्टनम् ॥ २२० ॥
तदेवजंघामध्यस्य जंघान्तस्यतदेवहि ।
पादंपंचकलायामं चतुरंगुकविस्तृतम् ॥ १ ॥
ऽयंगुलंपाणिदेशाच्च अंगुष्ठोर्धकलासमः ।
विज्ञेयाअंघ्रिदेश्यां [देशा] त्रयवो [वे] नांगुलयःक्रमात् ॥ २॥
नाभिरन्ध्रंतुविस्तीर्णं द्व्यर्धलोचनविस्तृतम् ।
मध्यमांगुलिपर्यन्तं मणिबन्धान्नवांगुलम् ॥ ३ ॥
त्रिकलःपाणिविस्तार स्तन्नखानिशितोन्नताः ।
तद्बाहुमस्तकंविद्धि उच्छ्रायेणद्विलोचनम् ॥ ४ ॥
भुजोपभुजयुग्मंयत् तद्वितालसमंस्मृतम् ।
कलार्धेनाधिकंबिम्बं बाहोस्तद्बाहुवेष्टनम् ॥ ५ ॥
बिम्बोक्ताद्विहीनेच [?] स्तनभूर्लोचनोल्बणा ।
वृत्तवैपुल्यमानेन लोचनेपद्मपत्रवत् ॥ ६ ॥
भ्रूयुगंनरसिंहोत्थं घ्राणाग्रंशुकचंचुवत् ।
कलार्धमानंदीर्घंच सद्वंशंगजपृष्ठवत् ॥ ७ ॥
स्वायामदीर्घतत्पक्ष युगलंकुक्षिदेशगम् ।
तदेवदैर्घ्यादर्धेन विस्तृतंहंसपक्षवत् ॥ ८ ॥
स्वपक्षमानाद्द्विगुणं तत्पुच्छंशतशाखकम् ।
सपक्षाग्रिमआयामं सात्यन्तवयवान्वितम् ॥ ९ ॥
सर्वेषांविद्धिसामान्यं विशेषाख्यमथोच्यते ।
ऊरुद्वयात्रयेभाग मंगुलानांत्रयंतथा ॥ २३० ॥

जंघाकाण्डोच्छ्रितेःकुर्या जंघाभ्यांबाम्रवेष्टनम् ।
बिंबाख्यंमणिबन्धस्य समभूलांमहामते ॥ १ ॥
उत्तालदेशात्तदर्धेन सद्यार्धांगुळनतु ।
पादंभाळंपरिज्ञेयं विस्तारेणषडंगुळम् ॥ २ ॥
शेषंसत्योदितंसर्वं सर्वेषांविद्धिसर्वदा ।
किन्तुपादोज्झितौपक्षौ दैर्घ्यांत्तद्वळविस्तृतौ ॥ ३ ॥
एषाश्चोड्डीयमानानां स्वापामापक्षाविस्तृतिः ।
पंचानांचपरिज्ञेया स्थितानामर्धलक्षणा ॥ ४ ॥
एतदादायमानन्तु पुच्छभूपक्षवर्जितम् ।
विद्धिवामनरूपस्य लक्षणंकिन्तुलांगळिन् ॥ ५ ॥
ललाटनासावक्त्रेभ्य स्समादायांगुळत्रयम् ।
मस्तकस्योपरिष्टात्तु जटाबन्धंप्रकल्पयेत् ॥ ६ ॥
जटावसानमायामं यथास्यात्पंचतालकम् ।
इत्युक्तंलेशतोबिम्ब लक्ष्मपीठमथोच्यते ॥ ७ ॥
बिम्बानामुपविष्टानां चतुरश्रन्तुतद्भवेत् ।
चतुरश्रायतश्चैव मोत्थितानांसदैवहि ॥ ८ ॥
वृत्तवृत्तायतत्वेन ह्यनयोरूपमन्यथा ।
यांगुलैः परमाणूर्ध्वे राराधकमयैस्तुवा ॥ ९ ॥
यत्तत्वांतुसमायामं द्वाराद्वामान्दिरोत्थितात् ।
तन्मानेनतुपीठस्य दैर्घ्यमर्धेनविस्तृतिः ॥ २५० ॥
द्वारोर्ध्वाञ्च त्रिरन्तानि एकपूर्वाणि वै पुरा ।
सन्त्यज्य द्वादशांशा द्वे अधः पीठोन्नति स्त्रिभिः ॥ १ ॥
शेषेणाष्टांशसंघेन प्रतिमा चोत्थिता भवेत् ।
अथवा वाहनारूढा न्यूना वा मध्यमोत्तमा ॥ २ ॥
स्तुर्भि द्वादशांशे स्तदुपविष्टस्य चोन्नतिः ।
विहिता चास्य सर्वत्र प्रतिमार्धेन विस्तृतिः ॥ ३ ॥

सत्र्यंशपरिलुप्तात्त्व चतुर्थांशोज्झिताथवा ।
परिवारवशेनैव चातुरात्म्यस्यवैपुनः ॥ ४ ॥
अलुप्तांशंचविहितं पीठायामंचसर्वदिक् ।
चतुर्दिक्द्वगतस्यैव मेकदिग्द्वगतस्यच ॥ ५ ॥
तदेवदैर्घ्यद्विगुणं लांछनैरावृतस्यच ।
सार्द्धंचानावृतस्यैव तद्वाहुल्यंपुरोदितम् ॥ ६ ॥
एकैकंलक्ष्मभेदेन तत्संख्यंविद्धिवैपुनः ।
अनन्तासनमाद्यंच द्वितीयंपक्षमन्दिरम् ॥ ७ ॥
कमलांकं तृतीयन्तु चतुर्थं चक्रभूषणम् ।
एवंहिसर्वसामान्यं पीठानांहिद्विरष्टकम् ॥ ८ ॥
भेदाभिन्नं समासेन पुनरेवनिबोधतु ।
दिक्षुलक्ष्माणिपीठानां विद्धिकण्ठगतानिच ॥ ९ ॥
अन्योन्यसन्निवेशाच्च तेषां वद्वात्मनापुनः ।
चक्रांवुजाभ्यां तास्थाभ्यां लुप्ताभ्या मपितक्षितेः ॥ २५० ॥
ताभ्यामन्योन्ययोगाच्च दिक्ष्वनन्त खगाश्रयात ।
द्विद्वयात्मनाद्व्यात्मनावा बहुरूपमवधारय ॥ १ ॥
पद्मेनोर्ध्वगतेनैव द्वयं चक्रेण तद्वहिः ।
एवं ह्यधोगतेनैव परिज्ञेयं द्वयं द्वयम् ॥ २ ॥
उपरिष्टात्तु पद्माभ्या मधश्चक्रं द्वयं द्वयम् ।
द्विसयव्यत्ययाच्चान्य त्परिज्ञेयम्महामते ॥ ३ ॥
अन्तर्वहिस्स्थितिवशा च्चक्र पद्म द्वयस्यच ।
व्यत्ययात् द्वयो विद्धि ऊर्ध्वभागाच्चतुष्टयम् ॥ ४ ॥
अधोभागा द्देवमेव च्चतुष्कमपरन्तुवै ।
पीठाना मष्टक मिद मधस्ता दूर्ध्वत स्तु वा ॥ ५ ॥
युक्तमेकेनवैकुर्या च्चक्रेण कमलेन वा ।
च्चक्राकारास्तु विहिता ह्येकभ्रम समाश्रिताः ॥ ६ ॥

महद्योदि दळास्तद्व द्वीषद्वैकर्णिकान्विताः ।
इतिलांछन संचारो बहुधाते मयोदितः ॥ ७ ॥
यस्मिन् प्रकृति भूतेतु पीठे तदधुना शृणु ।
कृत्वा द्विदंशधा पीठं पुरा यामा स्तमैः पदैः ॥ ८ ॥
एकेन चरणं जंघा कळशो च त्रिभि स्त्रिभिः ।
कण्ठ [र्णं] वीधिमथैकेन षड्भिः कण्ठं [र्णं] तदूर्ध्वतः ॥ ९ ॥
भागेन कण्ठ [र्णं] सूत्रन्तु शुक्तिकांशत्रयेण तु ।
उष्णीषं च तदूर्ध्वेतु कुर्या दंशद्वयेन वै ॥ २६० ॥
निर्गमःस्वदळेनैव विहितश्च रणस्य च ।
चतुर्दिक्षु महाबुद्धे क्षेत्रतोभ्यधिकःस्मृतः ॥ १ ॥
सर्वेवृत्तं घटं कुर्याद् पल्लवे वारके युतम् ।
परितांशद्वयेनैव कर्ण [ण्ठ] पीठं प्रवेशयेत ॥ २ ॥
अन्तःप्रवेश मेकेन विध्यंशेन गळस्य च ।
कुर्या द्गळप्रवेशस्य समां सूत्रस्य निस्सृतिम् ॥ ३ ॥
शुक्ते रधःक [र्णं] ण्ठ सूत्रभागा त्पादेन निर्गतम् ।
वदनान्तं समासेन शुक्ते स्संकोच माचरेत् ॥ ४ ॥
उष्णीषघटजंघाना मश्रिसाम्यं यथास्थितम् ।
घटवद्रूपये च्छुक्तिमरके वाब्जपल्लवैः ॥ ५ ॥
तत्रोपरिष्टा त्परिधिं चतुरंशकसम्मितम् ।
सन्त्यज्य निखनेत् द्रोणी मंशनिम्नां समन्ततः ॥ ६ ॥
विस्तृते मध्यभागेथ स्वत्र्यंशेनतु निर्गमम् ।
तन्मानं चतुरश्रन्तु पीठक्षेत्रा द्विनिर्गतम् ॥ ७ ॥
तच्चाग्रत स्त्रिधा कृत्वा पक्षभागौ क्षय न्नयेत ।
अनुपादेन चामूलाद् सम्यक् लांगळवक्त्रवत् ॥ ८ ॥
अग्रतो मूलदेशाच्च कृत्वादौ वै त्रिधा त्रिधा ।
भूय स्तत्रिखने न्मध्या जलं याति यथाद्रुतम् ॥ ९ ॥

सूकराननतुल्यन्तु भवत्येव म्महामते ।
कुर्या द्वै शंखसदृश म्मकरास्योपमन्तु वा ॥ २७० ॥
जलनिर्गम मेतद्वै पीठे मुदितलक्षणम् ।
न कुर्या त्कर्मबिम्बाना मशमादिमितात्मनाम् ॥ १ ॥
चित्रमृत्काष्ठजानां तु चपलानां विशेषतः ।
समणालं भवे त्पीठ मासनं च प्रणालकम् ॥ २ ॥
भूरि नीरादिना स्नानं यत्र यच्छति साधकः ।
प्रत्यहं यद्विना तत्र प्रत्यवायो भवे त्स्फुटम् ॥ ३ ॥
एवमेव बृहद्बिम्बभूषितानां विधीयते ।
धातुशैलोत्थितानां च निमित्तस्नपनार्थतः ॥ ४ ॥
भद्रासनगते कर्मबिम्बे तस्य समाचरेत ।
सततं च यथालाभं दधिक्षीरघृतादिना ॥ ५ ॥
तोयेन तन्नये यत्नात् भूभागं वा प्रतिग्रहम् ।
यथा नाक्रम्यते पादै जन्तुभि स्तन्महर्धिदम् ॥ ६ ॥
अतः प्रणालं विहितं निषिद्ध मत एव हि ।
तत्संस्थापनकालेतु देवानां दिग्विधेहि तम् ॥ ७ ॥
प्राक्प्रत्यगाननानां च तदुदक् दिग्गतं शुभम् ।
उदक्दक्षिणवक्त्राणां प्राग्भागे विहितं सदा ॥ ८ ॥
तत्पुन भद्रपीठीय देवा द्वामेथसिद्धिकृत ।
सदैवाराधकानान्तु विलोमा द्विपरीतदम् ॥ ९ ॥
पीठवच्च परिज्ञेयं प्रासादस्य स उच्यते ।
शुभे दिनेनुकूले च नक्षत्र पूजिते ग्रहे ॥ २८० ॥
कर्मे स्थिरे स्थिरांशे च स्वशुद्धे चोत्तरायणे ।
दिव्या युत्पातसंशुद्धे सितपक्षे मलेश्वरे ॥ १ ॥
आजलान्तं कृते खाते पूर्ववत्सम्प्रपूरिते ।
विमुक्तदोषे भूभागे सर्वलक्षणलक्षिते ॥ २ ॥

पूरणा दंशशेषेतु सुपलिप्ते धरातले ।
चतुष्षष्टिपदे भूते प्रागस्तुत्रेण सर्वदिक् ॥ ३ ॥
स्नात श्शुक्लाम्बर स्स्रग्वी कृतन्यास स्सुशान्तधीः ।
सर्वसाधनसंयुक्त आर्घ्यपात्रसमन्वितः ॥ ४ ॥
मङ्गळपकुम्भ मादाय ध्यायमानोच्युतं हृदि ।
सहचैकायने विप्रै स्सदागमपरायणैः ॥ ५ ॥
तथा ऋक्मयपूर्वैस्तु आमूलाद्ब्रगवन्मयैः ।
विशे त्प्रासादभूभाग मध्ये कुम्भ न्निधाय तम् ॥ ६ ॥
कुर्या न्निरीक्षणं भूते स्ताडनं प्रोक्षणं ततः ।
सेचनं पंचगव्येन सह चाष्ठोदकेनतु ॥ ७ ॥
ॐकाराद्यं पवित्रान्तं मन्त्राणां माक्चतुष्टयम् ।
पाठयेच्च सपुण्याहं ब्राह्मणान् कृतमण्डनान् ॥ ८ ॥
बह्वृचाचोत्र (न् शाकुनं) ना सूक्तं ततो भद्रं यजुर्मयान् ।
इडामयेति सामज्ञां श्छान्तायो रित्यथर्वणान् ॥ ९ ॥
ईशकोणा त्समारभ्य प्रागादौ प्रतिपङ्क्तिषु ।
द्वादशाक्षरमन्त्रेण स्वनाम्ना तु पदे पदे ॥ २९० ॥
नतिप्रणवगर्भेण दैवतं देहलक्षणम् ।
पष्ठव्यो वास्तुपुरुषो दधिस्त्रक्चन्दनादिना ॥ १ ॥
सात्विकेनोपहारेण अग्नौ सन्तर्पये ततः ।
कुर्या त्कुम्भप्रतिष्ठानं यथा तदवधारय ॥ २ ॥
पूर्ववत्तोरणाद्यैस्तु भूभाग मुपशोभयेत् ।
कर्णिका (निर्णिक्ता) ळपथक्त्रस्य अग्रत स्तात्क्षिते बहिः ॥ ३॥
सर्वोपकरणोपेतं कुर्या न्मण्डप (ळ) मुत्तमम् ।
कुण्डाष्टकान्तरस्थं च स्थलं तत्राष्टहस्तकम् ॥ ४ ॥
स्थण्डिका द्विहस्तास्तु कुण्डाः पूर्वोक्तलक्षणाः ।
त्रिहस्ता [स्त] पाचि[रि]ता वीथी स्यादेवं द्विनव श्शमः ॥५॥

पूर्ववत्प्रतिकुण्डेतु विनिवेश्यं च साधनम् ।
आत्मन श्चोत्तरे कुर्यात् कुण्डं चाथ समस्थले ॥ ६ ॥
दक्षिणे पूर्ववद्देव मवतार्य यजे त्क्रमात् ।
स्थलायां स्थण्डिलस्योर्ध्वे उन्नतायां च पूर्ववत् ॥ ७ ॥
तर्पयित्वा यथाकाम मुद्धृत्याग्निगणं ततः ।
दिक्कुण्डेषु विनिक्षिप्य संस्कृतेषु च पूर्ववत् ॥ ८ ॥
तथैवच्च विदिक्स्थेषु उद्धृत्याभ्यर्च्य वै क्रमात् ।
ततःप्रभययोगेन चतुर्दिक्षुनिवेशयेत् ॥ ९ ॥
चतुरोवासुदेवादीन् नाम्नाएकायनान् द्विजान् ।
स्वाभिःस्वाभिरसंख्यन्तु तैः कार्यमभिधायच ॥ १०० ॥
कर्मावसानंहवनं साज्यैस्तुतिलतण्डुलैः ।
एवमध्ययोगेन वाय्वादीशानगोचरम् ॥ १ ॥
ऋग्वेदाद्यांस्तु चतुर स्संस्कृत्यादौ तथान्यसेत् ।
तैरप्यच्युत लिंगैस्तु स्वशाखोक्तै श्चपावनैः ॥ २ ॥
हवनंविधिवत्कार्यं भक्तियुक्तेनचेतसा ।
अथेशकोणमासाद्य ब्राह्मणैरपैरस्सह ॥ ३ ॥
प्राङ्निर्दिष्टन्न्यसेत्तत्र स्नानोपकरणन्तुयत् ।
दशार्द्धगन्धपूर्वन्तु कलशेषु पृथ क्पृथक् ॥ ४ ॥
तानर्च्यार्घ्यादिनापश्चात् द्विषट्केनाभिमन्त्र्यच ।
समानीयशिलोपेतान् कलशान् पूर्वसम्भृतान् ॥ ५ ॥
उत्कृष्टधातुसम्भूतान् नवशैलमयांस्तुवा ।
समान् सपक्वान् सुघनान् न्मृण्मयांस्तदभावतः ॥ ६ ॥
द्वादशांगुलविस्तीर्णा स्वन्मानेनतुचोन्नतान् ।
द्विगुणान् सशिखामध्ये नृपाणां हेमजान् हितान् ॥ ७ ॥
ततःउत्थं चतुरश्रन्तु द्वादशांगुलविस्तृतम् ।
तत्त्वंशतुल्यंबाहुल्यात् शिलाकुन्दं समाहरेत् ॥ ८ ॥

संस्थाप्यविधिवत्कुम्भान् पूर्वोक्तेनक्रमेणतु ।
कम्बुतुल्यमथैकंवा सत्कण्ठं त्र्यंगुळोन्नतम् ॥ ९ ॥
तद्गुणैरपिविस्तीर्णं तत्खातोष्टांगुळस्स्मृतः ।
परितःकर्णवर्जन्तु शंखोवासुषिरोमहान् ॥ ३१० ॥
विहितोहतनासन्तु अन्वश्शुद्धस्तुसाक्षतः ।
एवंहिसान्तराद्वाह्या स्समाळभ्याधिवास्यच ॥ १ ॥
फलैर्हेमादिकैरत्नै स्सर्वौषधिमयैस्ततः ।
गन्धैर्बीजैस्तथाधान्यै र्विद्रुमाद्यैस्तुमौक्तिकैः ॥ २ ॥
नेत्रवस्त्रैरळंकारै र्भूषयेत स्रग्वरैश्शुभैः ।
द्वादशाक्षरमन्त्रेण एकैकस्यसमाचरेत् ॥ ३ ॥
मूर्तिसंसिद्धयेन्यासं प्रणवेस्तच्चिदात्मना ।
ततश्चार्घ्यादिकैर्भोगै र्वेदयन्त्रैर्विविधैर्यजेत् ॥ ४ ॥
शिलास्वेवं कृतःपश्चा न्निनयेत्कुण्डसन्निधिम् ।
सशिलंकुम्भवृन्दन्तु आधारेषुपरिन्यसेत् ॥ ५ ॥
सदाधारशिलापश्चात तन्त्रवामण्डपाद्वहिः ।
एवमेवचसंस्कृत्य भावयेत्प्रणवेनतु ॥ ६ ॥
ज्वलन्तींगोसहस्रेण खचितांसूर्यबिम्बवत ।
तत आराध्यमन्त्रन्तु सन्तर्प्य शतसंख्यया ॥ ७ ॥
मध्ये तत्कलशं न्यस्य सांगं सपरिवारकम् ।
निश्शेषशक्तिगर्भन्तु व्यापकं ब्रह्मतत्त्ववित ॥ ८ ॥
अत ऊर्ध्वं तिर्यगाभि र्योगाद्याभिश्च शक्तिभिः ।
ब्रह्ममूर्तिसमेताभि रभिन्नाभिस्तु तावतः ॥ ९ ॥
पाठये द्ब्राह्मणा स्तत्र आत्मव्यूहन्तु मन्त्रराट् ।
तथैवात्मानुवाद्यं च प्रणवाद्यन्तगन्तु वै ॥ ३२० ॥
तमर्चयित्वा विधिव त्तर्पयित्वा त्वनन्तरम् ।
दिक्स्थितानां च कुम्भानां वासुदेवादिकान्न्यसेत् ॥ १ ॥

पूर्ववच्चानिरुद्धाद्यान् विदिक्संस्थापितेषु च ।
पाठये च्चातुरात्मीयं संज्ञामन्त्रचतुष्टयम् ॥ २ ॥
प्रभवाप्यययोगेन तत स्सूक्तन्तु पौरुषम् ।
ऋग्वेदान् पाठये द्भक्त्या युंजते त्यपरान्यजुः ॥ ३ ॥
रथन्तराख्यं यत्साम सामज्ञान् भगवन्मयान् ।
सहस्रशिरसं चेति मन्त्रा नाथर्वणा स्ततः ॥ ४ ॥
एकस्मि न्वा महाकुम्भे सर्वोक्तं कळशे हितम् ।
तथैव हवनं कुण्डे मध्यमे विहितं स्वयम् ॥ ५ ॥
किन्तु क्रमेण वै मन्त्रान् पाठयेच्च यथास्थितान् ।
एवं सम्पातहोमन्तु कृत्वा पूर्णान्तिकं ततः ॥ ६ ॥
महाशक्तिसमूहस्तु पर स्सामर्थ्यलक्षणः ।
अभेदेन च मन्त्रादिमूर्तीनां य स्स्थित स्स्फुटम् ॥ ७ ॥
स सन्धेय शिलानां च स्वनाम्ना प्रणवेनतु ।
ज्ञानभासा निवसति तथानन्तबला प्रभा ॥ ८ ॥
सर्वगा ब्रह्मवदना द्योतकी सत्यविक्रमा ।
सम्पूर्णा चेति कथिता श्शक्तयो विश्वधारिकाः ॥ ९ ॥
या शिला कलशाधारसंज्ञातां विद्धि सर्वगाम् ।
सामर्थ्यशक्तिसामान्यां निष्कलां पारमेश्वरीम् ॥ २२० ॥
सन्तर्प्य मूलमन्त्राच्च शिखामन्त्रेण लांगलिन् ।
अजस्य नाभावध्येक मन्त्रेणैकायनै स्ततः ॥ १ ॥
तादर्थ्येनतु होतव्यं मृण्मयैस्तु तथैव हि ।
होतव्य मस्य चाग्नीयं गायत्रीभि स्ततो परैः ॥ २ ॥
होतव्यं ब्राह्मणै स्तस्य स्तद्व्यासै रुपलक्षकैः ।
दत्वा पूर्णां स्वयं कृत्वा स्थलस्यस्यार्चनं पुनः ॥ ३ ॥
बलिदानञ्च भूतानां समाचम्य ततो व्रजेत् ।
प्रासादब्रह्मभूभागं न्यसे त्तत्र महाशिलाम् ॥ ४ ॥

संस्मरं श्चक्रमन्त्रन्तु सानन्तं प्रणवेन वै ।
बीजभूतं तदन्तस्स्थ मध्यपट्कं स्मरन्यजेत् ॥ ५ ॥
निश्शेषमन्त्रवृन्देन होमस्याद्ये रनन्तरम् ।
द्वारदिग्वीक्षमाणन्तु मध्ये मन्त्रघटं न्यसेत् ॥ ६ ॥
स्वदिक्ष्वन्यान्यथावस्थान् स्वे स्वे मन्त्रे निवेशयेत् ।
तत स्स्वशक्तिपाषाणे रेकैकं स्थगयेत् घटम् ॥ ७ ॥
पूरये दस्त्रमन्त्रेण घटाना मन्तरं ततः ।
मृदु मृद्वालुकाभिस्तु सुधयाचलसिद्धये ॥ ८ ॥
संवेष्ट्य नेत्रवस्त्रैस्तु ऋग्वेदान् पाठये ततः ।
आत्वाहार्षेति सूक्तन्तु प्रतिष्ठा सामसामगान् ॥ ९ ॥
द्वादशाक्षरसंयुक्तं बलमन्त्रं पुनः पुनः ।
वक्तव्यं ब्रह्मनिष्ठैस्तु प्रणवान्तं सुभावितैः ॥ ३४० ॥
तदेकतनुतां यातं संस्मरे त्प्रणवेनतु ।
मूर्त्या दिशन्ति निष्टं दन्नामरूपाक्रियात्मकम् ॥ १ ॥
द्वादशाक्षरमन्त्रेण भूय स्सहृदयंगमैः ।
तत्राराध्यं स्वमूर्तिन्तु संयजे त्तेजसां निधिम् ॥ २ ॥
तत सर्वां भगवन् भोगैः पाठये त्पांचरात्रिकान् ।
अर्चामि तेति ऋग्वेदा नर्चा सामच तद्विदः ॥ ३ ॥
ततः परिगृहीतेतु क्षेत्रे देवगृहीयके ।
द्वादशांगुलमानन्तु दिग्विदिक्ष्वष्टकं न्यसेत् ॥ ४ ॥
स्थापितं पूजितं सम्य क्शिलानां शुभलक्षणम् ।
तदन्त स्सन्निरोद्धव्या बुद्धिधर्मगुणाः क्रमात् ॥ ५ ॥
धर्माद्या श्चाग्निकोणात्तु याव दीशपदं पुनः ।
प्रागादा वुत्तरान्तं च अधर्माद्यं चतुष्टयम् ॥ ६ ॥
शिलाना मन्तरे भूमौ षट्कं षट्कं क्रमेण तु ।
न्यस्तव्यं पूर्ववर्णाश्च वर्णानां स्वावसानकम् ॥ ७ ॥

शब्दब्रह्मानुविद्धां च कृत्वैवं बुद्धिवागुराम् ।
सूत्रभूतां न्यसेत् सम्य क्प्रासादतलसंस्थिताम् ॥ ८ ॥
न्यसे त्प्राङ्गणभित्त्यर्थं तथैव हि शिलाष्टकम् ।
तासु संरोधये त्सम्य क्प्रागुक्तां स्तु दिगीश्वरान् ॥ ९ ॥
चक्रं तदन्तभूमीनां भ्रमद्वह्निस्फुलिंगवत् ।
क्षणेन चिन्तये द्व्याप्तं भूभागं चांगणीयकम् ॥ २५० ॥
आभोगं तदध श्शेषं तदूर्ध्वं गगनेश्वरम् ।
बहिः प्राकारभित्तीनां साक्षं सपरिवारकम् ॥ १ ॥
प्रागादा वीशकोणान्त मिन्द्राद्यं चाष्टकं न्यसेत् ।
तथाविधेषूपलेषु अन्तर्भूमिगतेषु च ॥ २ ॥
तत्स्वनाम्नार्चयित्वा तु ऋग्वेदान् पाठये त्ततः ।
ऋचो न विद्वानिति वै ये देवास्तु यजुर्मयान् ॥ ३ ॥
देवव्रतं च सामज्ञान् प्रविश्याभ्यन्तरं ततः ।
स्थित्वाग्रतो मन्त्रमूर्ते रध्वव्याप्ति मनुस्मरेत् ॥ ४ ॥
बीजत श्चांकुरीभूता पुरस्ता द्व्यक्ति मेति सा ।
प्रासादपीठपर्यन्तं कुम्भाधारोपलात्तु वै ॥ ५ ॥
भुवनाध्वा यथावस्थो भावनीयः पुरोदितः ।
गर्भोच्छ्रायावधिं यावत् पादाध्वानं विलोकयेत् ॥ ६ ॥
मन्त्राध्वा शुकनासान्त स्तत्त्वाध्वावेदिकावधिः ।
कलाध्वाण्डगजा [तुगळा] न्तश्च वर्णाध्वाच तदूर्ध्वतः ॥ ७ ॥
समीकृत्य पुरा सर्वं प्रासादं प्रारभे त्ततः ।
तलान्न्यूनाधिकाच्चैव सांगुलै रुचितैः करैः ॥ ८ ॥
द्विद्वादशकरं याव त्तालेनोनाधिकेन तु ।
शुभाय सिद्धये विद्धि गर्भं देवगृहस्य च ॥ ९ ॥
कृत्वा क्षेत्रांगुलानां च कराणां वा घनं पुरा ।
त्यजे तदष्टभि स्सम्य ग्यच्छेषं तद्विचार्य च ॥ २६० ॥

एकाद्यष्टमपर्यन्ता ध्वजधूमसृगेश्वराः ।
श्वाच गोखरमातंग वायसा स्तु तव शुभाः ॥ १ ॥
एकत्रिपंचसप्ताख्या स्सर्वत्रैव विधीयते ।
गर्भषट्भाग मानेन तद्बाह्ये भित्तिविस्तृतिः ॥ २ ॥
तन्मानं परित स्त्यक्त्वा भित्ति रन्या विधीयते ।
एवमत्रक्रमेणैव सहभित्तिगणेनतु ॥ ३ ॥
गर्भाद्द्विगुणविस्तीर्णं क्षेत्रंदेवगृहस्यच ।
मन्दिरेत्वेकभित्तीये क्षेत्रमानंविधीयते ॥ ४ ॥
गर्भोक्तंतत्रिभागेन युक्तंयुक्तेन वर्मला ।
तत्रापिह्रासवृद्ध्यातु आयशुद्धिंविचारयेत् ॥ ५ ॥
एवंनिर्जगतीकंच भागपीठेविवर्जितम् ।
प्रासादक्षेत्रमानच तद्युक्तमवधारय ॥ ६ ॥
षट्भागेनाधपादेन त्रिभागेनोभयात्मिका ।
विहिताजगतीभाग स्तत्क्रियाविस्तृतिर्भवेत् ॥ ७ ॥
अधिकार्द्धचतुर्दिक्षु तापंचांशैस्तुवेत्रिभिः ।
तृतीयांशेनवैमध्ये निर्गमस्तुविधीयते ॥ ८ ॥
कोणात्कोणात्तुवेशेषं भागेभागंप्रवेशयेत् ।
उच्चंगर्भसमंपीठं तत्पीठेनदळेनवा ॥ ९ ॥
पीठोक्ताळयपीठस्य ळक्ष्मस्पिस्त्वंशकल्पना ।
चतुर्दिक्षुविधेयावै बहुधानन्तपूर्विका ॥ १७० ॥
अथोच्छ्रयन्तुवेक्षेत्रा त्त्रिगुणंमन्दिरस्यच ।
कुर्याद्व्यर्धगुणंचैव द्विगुणंवायथेच्छया ॥ १ ॥
द्विरेकादशधाकुर्या त्तंचभागेस्वमन्युरा ।
,वेधेयंपीठवत्पश्चा देकांशेनमसूरकम् ॥ २ ॥
तदूर्ध्वंविहिताजंवा गर्भमानेनत्वोन्नता ।
भद्योपकरणीयाभि र्देवताभिरळंकृता ॥ ३ ॥

जंघायामंशयुग्मेन उपयूनाधिकेनच ।
कार्यंशिखरपीठन्तु पूर्वलक्षणलक्षितम् ॥ ४ ॥
किन्तु प्रवेश निर्यासो तत्रचार्धांशसम्भितौ ।
शिखरंचात्रविहितं भूमिकानवकान्वितम् ॥ ५ ॥
संकोच्यतत्पुरासूत्र मादायोन्नतिसम्मितम् ।
एकस्मादेकवर्णात्तु जंघोर्ध्वायात प्रसार्यच ॥ ६ ॥
संस्पृशेत् शिखरंपीठ मग्रसातं निरोध्यच ।
प्रासादाद्बहिरायत्र भूभागेत्वमलेक्षण ॥ ७ ॥
कर्णादूर्ध्वं नयेत्सूत्रं लांछयमानं क्रमणतु ।
शिखरोन्नतिपर्यन्तं चतुर्दिक्ष्वेवमेवहि ॥ ८ ॥
पर्यटेल्लांछयमानन्तु कर्णा॰॰र्ण महामते ।
यावत कुमुदपत्राभा सास्याच्छिखरमंजरी ॥ ९ ॥
एवमालेख्यदृष्टयातु सम्पाद्यावन्तु पातत: ।
भूमिकाण्डमसिद्ध्यर्थं कार्यांशादशधापुन: ॥ १८० ॥
उपरिष्टात्तुभागेन भवेदामलसारकम् ।
भूमयोभागमानास्तु ततस्तासांसमाचरेत् ॥ १ ॥
क्षयवृद्ध्याविधानन्तु त्यक्त्वास्थानंचभूमिकाम् ।
चतुस्त्रिद्व्येकसंख्यानि समभागांगुलानिच ॥ २ ॥
निजभूमेस्समारभ्य तानियोज्यान्यध:क्रमात् ।
पूर्वभूमेस्समारभ्य ह्यधस्थभूमिकागणे ॥ ३ ॥
सर्वासांव्यवधानन्तु तद्विरष्टांशसम्मितम् ।
विभिन्नापीठरन्ध्राना तासुकार्यायथास्थिता ॥ ४ ॥
सचक्रैर्विविधै:पद्मै: मादुर्भावैस्तुचाखिलै: ।
सर्वैर्वालांछनैस्सूत्रै नृत्तगीतरसास्थितै: ॥ ५ ॥
नवांशेनोर्ध्वभागात्तु स्वपादेनविनिर्गतम् ।
उष्णीषमूर्धभूमे॰तु कार्यं वै रन्ध्रनोज्झितम् ॥ ६

शिष्टं कृत्वा त्रिधा पीठं मण्डलस्थेन पूर्ववत् ।
द्वितीयेन ततः कण्ठं तृतीयेनोर्ध्वगेनतु ॥ ७ ॥
सुसमं श्रीयुतं कुर्या दण्डं धात्री फळाण्डवत् ।
नवधोष्णीषकं कृत्वा चतुर्भि र्वेदिकाश्रमम् ॥ ८ ॥
त्रिभागपृथुळं कण्ठ मण्डं पंचांगसम्मितम् ।
पंचधा सप्तधा कृत्वा गर्भं वा नवधा पुरा ॥ ९ ॥
विहाय पक्षगौ भागौ मध्यभागगणेनतु ।
प्रासादनाडिका कार्या गर्भार्धेन विनिर्गता ॥ ३९० ॥
पादेन वा त्रिभागेन सस्तम्भाप्यथ केवला ।
उन्नता शिखरार्धेन साप्युत्पलदळोपमा ॥ १ ॥
कार्या शिखरपीठोर्ध्वे दिव्यकर्मविभूषिता ।
तत श्शुभतरं कुर्या न्मण्टपं स्तम्भसंयुतम् ॥ २ ॥
भूषितं विहगेन्द्रेण वळिमण्डळगेन च ।
चतुर्द्वारे तथा दिक्षु विधेयं मण्टपत्रयम् ॥ ३ ॥
प्रवेशत्रितयोपेतं मण्टपे मण्टपं भवेत् ।
कुर्या न्मण्टप मुक्तं वा यथाभिमतनिर्गमम् ॥ ४ ॥
रथोपरथकार्यन्तु तेषां गर्भा द्विधीयते ।
निर्यासो दशमांशेन द्वादशांशेन वांगळिन् ॥ ५ ॥
अथवा षोडशांशेन ते कार्या नेमिवत्पुनः ।
चतुर्दिक्पक्षसंलिप्ताः पीठकर्मविभूषिताः ॥ ६ ॥
शिखरस्य चतुर्दिक्षु पीठोपरि समापयेत् ।
समं रथकयुत्त्यात्तु नासिकामंजरीगणम् ॥ ७ ॥
मध्यदेशाच्चतुर्दिक्षु कुर्याद्द्वारगणं समम् ।
त्रिचतुःपंचषट् भागे ततो गर्भा द्विधीयते ॥ ८ ॥
द्विगुणं चोन्नतत्वेन त्रिपंचनवशाखिकम् ।
युक्तं द्वास्थद्वयेनैव कुम्भभद्रशनैस्तु वा ॥ ९ ॥

विधिवत्स्थापनं तस्य मन्त्रपूर्वं समाचरेत् ।
संस्नाप्य मूलमन्त्रेण सम्पूज्यार्घ्यादिना हृदा ॥ ४०० ॥
शाखामूलगतां कुर्या द्धातुरत्नमयीं स्थितिम् ।
सर्वधारामयं मन्त्रं सन्निरोध्यहि तत्र च ॥ १ ॥
ज्ञानक्रियात्मकं ध्यात्वा शिखामन्त्रेण शाश्वतम् ।
दक्षिणोत्तरभागाभ्यां शाखायुग्मन्तु विन्यसेत् ॥ २ ॥
हृन्मन्त्रेण तदूर्ध्वंतु ध्यात्वाद्यं परमेश्वरम् ।
सन्निधीकृत्य सम्पूज्य गगनस्थे ह्युदुम्बरे ॥ ३ ॥
द्विविधं धातुजालन्तु रत्नं सिद्धार्थका स्तिलान् ।
चन्दनाद्यादिगन्धा ये क्षीरं दधिघृतं मधु ॥ ४ ॥
शालय स्सर्वबीजानि सर्वौषध्य स्सविद्रुमाः ।
कृत्वा नेत्रेण नेत्रस्थान् द्वारोर्ध्वे विनिवेश्य तान् ॥ ५ ॥
दृश्यं भोगाप्तये चैव त्वदृश्यं मोक्षसिद्धये ।
चतुष्पा त्सकलो धर्म स्तत्रोर्ध्वे सन्निरोध्य च ॥ ६ ॥
चत्वारिशृंगाइति यत्पाठये हृन्मया स्ततः ।
कर्महोमचयं कृत्वा पूर्णां मूलेन पातयेत् ॥ ७ ॥
एतद्विम्बप्रतिष्ठानात् प्राग्व त्पश्चा त्समाचरेत् ।
सिद्धय [स्थित्य] पेक्षावशेनैव ह्यालयस्यतुचैविभोः ॥ ८ ॥
अनन्तभुवनंनाम सर्वकामापवर्गदम् ।
चतुष्प्रकारमेवंहि प्रासादंसिद्धिपीठवत् ॥ ९ ॥
रचनासन्निवेशोऽथ भेदेनानेकधास्तथा ।
पतत्रीशमृगेन्द्रैस्तु निधिभूतोपमैर्घटैः ॥ ४१० ॥
शंखपद्मांकिताभिस्तु सोपानपदपङ्क्तिभिः ।
पुरस्तंद्वारवशेनैव तथापीठवशात्तुवै ॥ १ ॥
विस्तारःप्रतिदिक्संस्थ स्त्वरुणस्य विधीयते ।
गर्भोत्थक्षेत्रसंज्ञाच जगतीकस्यलांगलिन् ॥ २ ॥

ज्ञेयस्सजगतीकस्य तन्मानेनापिसर्वदिक्षु ।
एभ्यःपादादिकंकुर्यात् पादायंशोज्झितन्तुवे ॥ ३ ॥
बुध्वाचायतनानांच संस्थितश्चांगने [कणे] पुरा ।
चतुरायतनंविद्धि प्रासादेःदिक्त्रयस्थितेः ॥ ४ ॥
आद्येनसहकोणस्थे स्तस्यचायतनंस्मृतम् ।
विज्ञेयमष्टायतनं त्रिभिरन्यैस्तुदिग्गतेः ॥ ५ ॥
विनामद्ध्यस्थितेनैव दिग्गतैस्तु द्विभिर्दिभिः ।
तद्वायतनन्तेन युक्तमेकाधिकं भवेत् ॥ ६ ॥
प्रवोळीपक्षगेनैव प्रासादद्वितयेनतु ।
द्वादशायतनंविद्धि सहमध्यस्थितेनतु ॥ ७ ॥
तदेवाधिकसंज्ञन्तु अतोन्योनन्तसंज्ञिकः ।
परस्परमुखौकुर्या प्रासादौद्वारदेशगौ ॥ ८ ॥
प्रासादाभिमुखाश्चैव दिक्त्रयेवास्थितास्तुये ।
कोणस्थाभ्यांचसाम्मुख्यं द्वाभ्यांद्वाभ्यां विधीयते ॥ ९ ॥
द्वाभ्यामभिमताभ्यांतु कुर्यादुचितदिङ्मुखम् ।
द्वौपरस्परवक्त्रौतु कोणदेशसमाश्रितौ ॥ ४२० ॥
द्वाराण्यनन्तायतने प्रासादानामिहामते ।
यथाभिमतदिक्स्थानि कर्तव्यान्यविशंकया ॥ १ ॥
नतत्रदेषाभवति वेधदोषःपरस्परम् ।
अंगभावगतत्वाच्च प्रधानायतनस्यवै ॥ २ ॥
अर्धेन च त्रिभागेन हितःपादेनचांगणात् ।
परण्डकस्यचोच्छ्राय स्तद्विस्तार स्तथोच्छ्रितेः ॥ ३ ॥
तच्चपीठोपमंकुर्यात् श्लक्ष्णसोष्णीषमेववा ।
युक्तंकोटिगणेनाथ मानादेवान्तगेनतु ॥ ४ ॥
यदेकायतनंचैव स्थगनन्तन्महामते ।
युक्तंलघुपरण्डेन केवलंवापरण्डकम् ॥ ५ ॥

यदाद्व्यायतनाद्यश्च द्वादशायतनान्तिमम् ।
एकादिग्वीक्षमाणंच चतुरश्रायतंगने ॥ ६ ॥
वृत्तायतेवावितते प्रासादेचोक्तलक्षणे ।
यस्माद्देवालयानांच अंगनानांविशेषतः ॥ ७ ॥
चतुरश्रादिपीठानां नित्यमेवमहामते ।
अन्योन्यानुगतंत्वन्तु हितंसापेक्षकंन्तुवै ॥ ८ ॥
भूमिभागवशेनैव तथैवार्चावशेनतु ।
नानाफलवशेनापि तथाशोभावशेनच ॥ ९ ॥
भूलाभश्चतुरश्रात्तु चतुरश्रायताद्धनम् ।
वर्तुळा त्सर्वकामाप्ति निर्वृति स्तु तदायतात् ॥ ४३० ॥
दृष्टादृष्टफलेप्सूनां लोकास्तु महदादयः ।
यच्छन्ति वैष्णवं स्थान मारोग्यं भूति मुत्तमाम् ॥ १ ॥
वैष्णवाना मकामानां च्युते रन्ते परं पदम् ॥ ४३१ ॥

इति श्रीपाञ्चरात्रे श्रीसात्वतसंहितायाम्
प्रतिमाप्रासादलक्षणविधि नाम

चतुर्विंशः परिच्छेदः ॥२४ ॥

अथ पंचविंशः परिच्छेदः ।

श्रीनारदः ।

सर्वलोकगुरु विंप्रा यदुक्तो विश्वधारिणा ।
तदिदानीं प्रवक्ष्यामि मन्त्रबिम्बनिवेशनम् ॥ १ ॥
भोगेप्सूनां च वर्णानां साम्प्रतं यदभीष्टदम् ।
कैवल्यदं शमाढ्येव चातुराश्रम्यसेविनाम् ॥ २ ॥

यज्ञधर्मरतानां च सहायं च फलेस्तु तत ।
प्राग्वद्देवगृहस्याग्रे दिक्काभे [ग्भागे] ऽति मण्टपम् ॥ ३ ॥
चतुरश्रं चतुर्द्वारं दर्भमालान्तरीकृतम् ।
अन्यत्र तद्लाभेतु यथाभिमतदिङ्मुखम् ॥ ४ ॥
चतुर्दशकराच्चैव यावत्त्रिंशत्करावधि ।
षट्करान्तं पुन स्तस्मात् विम्बमानव्यपेक्षया ॥ ५ ॥
कार्या मध्ये स्थला तेषां द्विसमांशे स्ततोष्टभिः ।
समन्तभद्रा सुश्लक्ष्णा चितापक्वेष्टकादिकैः ॥ ६ ॥
तालोन्नते स्समारभ्य सामान्येस्मिन् हि कर्मणि ।
उन्नतांगुलवृद्ध्यातु नीता तद्ध्रासतां क्रमात ॥ ७ ॥
द्वि[त्रि]रिष्टकांशकैर्मध्ये सर्वासां मण्टपं [ण्डलं] भवेत् ।
चतुरश्रंचतुर्द्वारं चक्रांबुरुहभूषितम् ॥ ८ ॥
दक्षिणेशयनंसौम्ये कुण्डमग्नेस्तु पूर्ववत् ।
समेखलं द्विहस्तन्तु चक्रपद्माकितं शुभम् ॥ ९ ॥
तदध श्चतुरश्रं प्राग्वामेखलिकान्वितम् ।
अथ दक्षिणदिग्भागे कुर्या द्वे चक्रचिह्नितम् ॥ १० ॥
वर्तुळं पश्चिमे सौम्ये कमळांकं मनोहरम् ।
शंखांकं सर्वकोणेषु मान मेषां यथोर्ध्वगे ॥ ११ ॥
सर्वे दशान्तहस्तानां चतुर्णा मेकमेखलाः ।
मण्टपानान्तु किं त्वत्र ऊर्ध्वगं सर्वमेखलम् ॥ १२ ॥
अतोध स्संस्थिता स्सर्वे एककुण्डास्तु मण्टपाः ।
तेषां समेखलं चाद्यं द्वाविंशत्यंगुळे भवेत ॥१३ ॥
ह्रासा दंगुळयुग्मस्य याव द्वे षोडशांगुळम् ।
स्यात षट्करे गृहे कुण्डं कार्या वा मेखलाधिका ॥ १४ ॥
अष्टहस्तोच्छ्रितः पूर्वः अधोर्ध्वकरवर्धिताः ।
न ह्रास ष्षट्करान्तानां न्यूनाना मुच्छ्रिते भवेत ॥ १५ ॥

त्रयोदशकरादीनां चतुर्णां पातये ततः ।
अष्टकं चांगुलानां तु सप्त पंच चतुः क्रमात् ॥ १६ ॥
एवं स्नानगृहाणान्तु विस्तार श्चोन्नत स्सह ।
किन्तु वै वालुकापीठे मध्यत श्चोपशोभिताः ॥ १७ ॥
द्वि त्रतुर्भि र्द्विसमां [हस्तां] शै र्विस्तृताः प्राग्वदुन्नताः ।
स्नानीयां यागगेहा द्वा दिक्त्रयेभिमते शुभम् ॥ १८ ॥
अर्धमानसमं मुख्यात् सुपीठशयनान्वितम् ।
हृदानभवनं कुर्या न्मंगल्यकलशै स्सह ॥ १९ ॥
सर्वेषां कर्मभूभागं कोणस्तम्भै र्विभूषितम् ।
सुनेत्रै र्वेष्टितं कुर्या च्चक्राद्यैः पूर्ववद्युतम् ॥ २० ॥
सुस्थिरं दृढपादं च स्नानाम्भो ग्रहणक्षमम् ।
अर्धेन वालुकापीठं दीर्घमाद्यक्रमेण तु ॥२१ ॥
वर्धितं चाग्रहस्तेन ह्रासितं चतुरंगुलैः ।
स्वदैर्घ्या दर्धविस्तीर्णं कृत्वैवं सप्रणाळकम् ॥ २२ ॥
तेन तद्वालुकापीठं भूषये न्मध्यगेनतु ।
यागागारस्य च दिक्षु द्वारार्धं तत्र चान्तरे ॥ २३ ॥
शामार्धवृत्तियोगेन ह्रासोन्यत्र कळादिकः ।
तोरणानि बहिः कुर्याद् दृढैः काष्ठै स्सुपूजितैः ॥ २४ ॥
पंच हस्तानि चार्धेन वर्धितानि करेणतु ।
न ह्रास माचरे त्तेषा मन्यत्र करणे सति ॥ २५ ॥
न[द] शमा त्पंच हस्ताना मूले भूमौ प्रवेशयेत् ।
शमार्धं वर्धितानां च द्वे द्वे संवर्धये त्कले ॥ २६ ॥
दैर्घ्या त्प्रवेशशिष्टात्तु त्रिभागेन तदन्तरम् ।
सर्वे चक्रध्वजाः कार्याः वस्त्रस्त्रङ्मञ्जरीयुताः ॥ २७ ॥
सुधाद्यै र्वर्णकैः पीतै श्चन्दनाद्यै स्तु लेपिताः ।
भिन्नांग मेत दखिलं यथैकास्मिन् हि युज्यते ॥ २८ ॥

कर्मयागगृहे शस्त्र द्विभूते वा वने विना ।
पंच त्रिंशत्करं क्षेत्रं स्वतुल्यांशेन विस्तृतम् ॥ २९ ॥
तन्मध्येतु चतुर्हस्तं स्थाप्यं स्थलसप्तकम् ।
स्थलानां व्यवधानन्तु कुर्यां द्वे तालसम्मितम् ॥ ३० ॥
एकापायेन वै कुर्यात् द्विहस्तान्तं स्थलांगणम् ।
क्रमेणाष्टांगुला न्मानात् द्व्यंगुलं द्व्यंगुलं विना ॥ ३१ ॥
स्थलानां संकटनां च व्यवधानं द्विगोळकम् ।
एव मेव समुच्छ्राय स्सर्वेषां परिकीर्तितः ॥ ३२ ॥
परितो विहितं वीधि मान मत्र स्वपीठजम् ।
एवं वासंकटे कुर्या दाद्योक्ता न्मण्टपद्वयात् ॥ ३३ ॥
मध्ये मण्डलपीठन्तु तस्य दक्षिणदिग्भवेत् ।
समीपे शयनस्थानं कुम्भानां स्थापनायनम् ॥ ३४ ॥
एवं हि वामनिकटे भोगानां मन्त्रतर्पणम् ।
ऋग्यजुस्सामपूर्वाणां श्रुतीनां हवनं परे ॥ ३ ॥
प्राग्दानं शयनस्थाने ह्यन्यस्मिन् शयने हितम् ।
प्रासादस्याष्टदिङ्मूर्ति शक्तिपानां यथोदितम् ॥ ३६ ॥
स्थण्डिले ष्वथ कुण्डेषु तादर्थ्येनाथवा स्वयम् ।
स्वकुण्डे हवनं कुर्याच्चतुर्वेदमये परे ॥ ३७ ॥
समस्तमूर्तिपीयं वा स्वय मेव समाचरेत् ।
सामग्रीविरहा द्योग्य मूर्तिपाना मभावतः ॥ ३८ ॥
यश्च यत्रोपयोज्यस्तु तत्रतं सम्प्रवेशयेत् ।
मन्त्राणा मुपदेष्टातु आत्मतुल्यो महामतिः ॥ ३९ ॥
योक्तव्यः कर्मदक्षस्तु सर्वे ष्ववसरेषुच ।
स्वयं वसवनुसन्धाय हवनार्चनकर्मणाम् ॥ ४० ॥
आस्तेष्वुत्पत्तिपूर्वाणां न्यासान्ताना मनन्यधीः ।
कृत्वा दीक्षाविधानोक्तं सहोमं कलशार्चनम् ॥ ४१ ॥

कुर्या त्तत्तोरणानां च ध्वजानां स्थापनं ततः ।
सितरक्तादिभेदेन प्रागादौ च ध्वजाष्टकम् ॥ ४२ ॥
निवेश्य मध्यवेद्यान्तु पुन रघ्ययवत्तथा ।
यजे त्सत्यादिकं तत्तच्चतुष्कं ह्येव मेवहि ॥४३॥
उत देवा अवहित मृद्धयान् पाठये त्ततः ।
ऊर्ध्वं सह सुपर्णेन चक्रं तोरणगं यजेत् ॥ ४४ ॥
पाठयेद् द्वारपालीयं सामसामविद स्ततः ।
अथार्घ्यपुष्पहृन्मूर्तिधरे यायात् समावृतः ॥ ४५ ॥
यत्र तिष्ठति विश्वेशः पीठब्रह्मशिलान्वितः ।
तत्रावलोकनं तेषां कुर्या त्सन्ताडनादिकम् ॥४६ ॥
चक्रास्त्रमन्त्रिते स्स्नानकळशे स्स्नापये त्ततः ।
सिद्धार्थकै स्तथा पंचगव्य मृद्भूतिवारिणा ॥ ४७ ॥
वल्मीक मृज्जलेनाथ चक्रांकौषधिवारिणा ।
संक्षाळ्याभ्यर्च्य चोद्धर्त्य क्षाळये द्रत्नवारिणा ॥४८॥
तमर्घ्येणार्चयित्वा च तत स्तन्मान्त्रितान् करे ।
सिद्धार्थकान् दक्षिणेतु बध्वाये पाठये द्दचम् ॥ ४९ ॥
रक्षोहणं तथा सर्वा त्रये त्प्रतिसरे मणीन् ।
सद्वस्त्रवेष्टितं कृत्वा समारोप्य रथोत्तमे ॥ ५० ॥
कर्मारम्भं चपठत स्तस्य दक्षिणदिङ्न्यसेत् ।
ऋक्सामपूर्वा न्वामेतु ब्राह्मणांस्तु चतु श्चतुः ॥ ५१ ॥
पुरतोऽस्त्रं स्मर न्यायात् स्वयं विघ्नांस्तु सूदयन् ।
सनृत्तगेयवादित्र स्तुतिमंगळपाठकैः ॥ ५२ ॥
इदं विष्णु र्विचक्रम ऋङ्मये स्सह पाठयेत् ।
एकायनास्तदन्तेतु ॐ नमो ब्रह्मणेतु यत ॥ ५३ ॥
तथैव शाकुनं सूक्तं श्रीसूक्तेन समन्वितम् ।
स्वर्णादिनार्थिन श्शक्त्या तर्पयं स्ता न्प्रवेशयेत ॥ ५४ ॥

स्वस्थानं यज्ञभूमे वैं प्रासादाद्यन्तरन्तु वा ।
वक्ष्यमाणविधानेन युक्तं रत्नशिलादिना ॥५५॥
कृत्वा द्रव्याधिवासं प्रा क्कर्मभूमौ पुरोदितम् ।
स्नानकर्मशिलादीना मीष स्कृत्वातु सार्चनम् ॥५६॥
यथावद्रत्नविन्यासं प्रीतिपूर्वं निवेश्य च ।
बृह द्बिम्बं ततः कुर्या त्कर्मबिम्बेखिलन्तु वै ॥५७॥
सन्निरोधस्तु मन्त्राणां तत्र ह्यग्रोदये स्मृतः ।
थाबृहत्स्नापना त्सर्वं यत्किञ्चि दथ तत्र तत ॥ ५८ ॥
निर्वर्तनीयं पूर्णान्तं बुध्वैवं प्राङ् महामते ।
तथा कार्यं शुभो येन मुहूर्तो नावसीदति ॥ ५९ ॥
एवं हि चित्रपूर्वाणा मन्येषां कमलेक्षण ।
सरत्नब्रह्मपाषाणवर्जितानां समाचरेत् ॥ ६० ॥
स्नानाद्यं कर्मबिम्बेतु तत्समीपेथ दर्पणे ।
कर्मबिम्बंविनातेषां प्रस्थापाद्यंहिविष्टरे ॥ ६१ ॥
कुर्यात्प्रवेशपूर्वन्तु सर्वमुत्सवपश्चिमम् ।
एवंप्रवेश्यतद्बिम्बं सांप्रतं विनिवेश्यच ॥ ६२ ॥
निषण्ण दृढकाष्ठोत्थ तोरणेष्वाहुता स्ततः ।
निवेश्य स्नानकलशान् हेमाद्युत्थांस्तु निर्व्रणान् ॥ ६३ ॥
पूर्ववद्रचनोपेतान् सुसमांस्त्रास वर्जितान् ।
निरीक्षणादि संशुद्धान् कृत्वा सहृदयेनतु ॥६४॥
द्वादशाक्षरमन्त्रेण मन्त्रयेत्तान्सकृत्सकृत् ।
तेनैव पूजयेत्पश्चात् अर्घ्यस्रक्चन्दनादिना ॥ ६५॥
तदाहरणहोमन्तु यथाशक्ति समाचरेत् ।
पूर्णांत मथ सम्पूर्य क्रमाद्द्रव्यै र्नियोजयेत् ॥ ६६ ॥
पाद्या द्याचमनीयार्थं द्रव्यैः पूर्वोदितै स्त्रयन् ।
नागाद्याद्यन्त मध्येभ्यो नदीमृत्तीर्थ सम्भवा ॥ ६७ ॥

ह्रदाद्वल्मीक शिखरात् गजदन्त क्षतीकृतात् ।
हलोत्था वृषशृंगोत्था शालिक्षेत्रेषु सम्भवा ॥ ६८ ॥
तथैव पद्म षण्डोत्था त्वेकस्मिन् गोमयं परे ।
वनदाहसमुद्भूतं तथैव च महानसात् ॥ ६९ ॥
त्रेताग्नि भस्मत्वपरे विनिवेश्यं घटान्तरे ।
अन्यस्मि पंचगव्यन्तु कुशोदक समन्वितम् ॥ ७० ॥
सघृतं तैलकुम्भन्तु चमसीवारि पूरितम् ।
पलाश खदिरा श्वत्थ शमी लोहित चन्दनम् ॥ ७१ ॥
कषायोदक मन्यस्मिन् परस्मि त्रिफलोदकम् ।
वचा शतावरी कन्या व्याघ्री सिंही कृतांजलिः ॥ ७२ ॥
गोलोमी सिंहलोमी च कुष्ठं भूतजटा तथा ।
महागरुड वेगाच कलशे न्यत्र लांगलिन् ॥ ७३ ॥
महानील [निला] गरूचीनरा सहदेवी शतावरी ।
विष्णुक्रान्ताच कार्कोटी सह्यावह्नि शिखापरे ॥ ॥ ७४
यष्टीवराहकर्णीचा प्यन्यस्मिन् गजपिप्पली ।
श्रीफलाद्यानिचान्यस्मिन् पावनानिफलानिच ॥ ७५ ॥
दधि क्षीराज्य कुम्भाश्च द्वौ मध्विक्षु रसान्वितौ ।
मूलान्यम्भोरुहाणांच तान्यन्यस्मि न्द्वयेन्यसेत् ॥ ७६ ॥
द्रुमाणां पावनानान्तु सक्षीराणां विशेषतः ।
पुष्पपत्र फलोपेत मेकस्मि न्मंजरीगणम् ॥ ७७ ॥
जात्यादिकं मथैकस्मिन् कौसुमीय लताचयम् ।
रोचना रजनीयुग्मं बलामोटाच पद्मकम् ॥ ७८ ॥
इतिपंचक मेकस्मिन् दर्भा न्दूर्वांकुराणिच ।
सास्यं शाल्यंकुरच्चयं कलशेन्यत्रवै न्यसेत् ॥ ७९ ॥
सिद्धार्थकान् सिताद्यांस्तु प्रियंगुं गन्धसंज्ञकम् ।
अपरस्मिन्नचलेत्कुंभे सहवैनागकेसरैः ॥ ८० ॥

ग्राम्याश्चौषधय स्सप्त सप्तारण्या घटद्वये ।
बाह्लीकं चन्दनं चैव रसं कर्पूर संयुतम् ॥ ८१ ॥
चतुष्कमेतदपरे त्वन्यस्मि न्धातवश्शुभाः ।
ताम्रजाम्बूनदाद्यास्तु परेरत्नचयंमहत ॥ ८२ ॥
न्यसेद्विद्रुमजालंच द्वयो मुंक्ताफलानिच ।
अर्घ्योदकमथैकस्मि न्नदीतीर्थोदकंद्वये ॥ ८३ ॥
सर्वौषधि घटंचैव सुशीताम्भोघट न्ततः ।
सुगन्धिपुष्पकलशा श्चत्वारिंशत्समीस्मृताः ॥ ८४ ॥
वामभागेतु देवस्य अग्निकोणादितोन्यसेत ।
पुनरीशानकोणात्तु शयनेसप्तधान्यसेत् ॥ ८५ ॥
गन्धोदकेन सम्पूर्णा स्तथावायुपदावधि ।
सर्वाण्याधाररूढ़ानि पूरितान्यमलांभसा ॥८६ ॥
मूलमन्त्रेणतद्वत्तु पूजयेद्द्वादशात्मना ।
संवेष्टयच पुरासूत्रे श्छादयेत्तदनन्तरम् ॥ ८७ ॥
विधानैस्सूत्रसम्बन्धे वस्त्रेणाच्छादयेततः ।
तदर्पणावसानेथ शयनंकल्पयेद्विधा ॥ ८८ ॥
सर्वोपकरणोपेत मनन्तंतदधोयजेत ।
प्रभवाप्यययोगेन तदूर्ध्वेसर्वगंमभुम् ॥ ८९ ॥
पाठयेत्सर्पसामाथ संहां ज्ञानवलाग्निकाम् ।
हुत्वाशताष्टसंख्यंच मूलंतदनुकल्पयेत ॥ ९० ॥
मण्डलंपावनैरागे स्सिताद्यैर्मांगलीयकैः ।
तदूनाधिकशान्त्यर्थं हुत्वाकुण्डगणन्ततः ॥ ९१ ॥
संस्कुर्यात प्रतिकुण्डस्य निकटेकुम्भमध्यगम् ।
प्रभवाप्ययोगेन चातुरात्म्यन्तु संयजेत ॥ ९२ ॥
हृदादियद्वादिक्स्थेषु विदिक्स्थेषु तदस्त्रराट् ।
दत्वातदर्थंपूर्णान्तु पूर्णांतपूर्णंचपाठयेत ॥९३ ॥

एकायना न्यजुर्मया नाश्रावितदनन्तरम् ।
यथाख्यमन्त्रेणपुरा मङ्गल्यकळशांभसा ॥ ९४ ॥
संसेच्यबिम्बंतदनु स्नापयेत्तन्मृदम्भसा ।
पाठयेत्तत्रकूश्माण्डान् बळमन्त्राननन्तरम् ॥ ९५ ॥
ततोगोमयकुम्भेन इहगावःप्रपाठयेत् ।
भूतिरसमितिमन्त्रेण पठ्यमानेनभूतिना ॥ ९६ ॥
पंचगव्येनतदनु पाठयेच्चतुरस्ततः ।
पूर्ववच्चततोभ्यज्य विधिवच्चमसांबुना ॥ ९७ ॥
क्षाळयित्वार्चयित्वाच निवेश्यशयनान्तरे ।
नेत्राभिमन्त्रितांकृत्वा शलाकान्तेजर्षास्वयम् ॥ ९८ ॥
संस्मरन्परमंज्योति रीक्षन्नेत्रेतु चोल्लिखेत् ।
तन्मन्त्रितेनशस्त्रेण शिल्पीस्नातोवलोकितः ॥ ९९ ॥
यथावत्प्रकटीकुर्यात् विधिदृष्टेनकर्मणा ।
वारुणंपाठयेत्साम सहचान्द्रेणसामगान् ॥ १०० ॥
ततःपात्रद्वयेकृत्वा तैजसेमधुसर्पषी ।
वौषडन्तेनमूलेन सम्पूज्यजुहुयात्ततः ॥ १ ॥
मुञ्चन्तममृतौघन्तु हृदाद्यन्तेनसेचयेत् ।
तन्मूर्ध्निशशिबिम्बन्तु ध्यायेत्ताडनशान्तये ॥ २ ॥
सदक्षिणंशलाकाद्यं दद्याच्छिल्पिजनायच ।
गोदानमाचरेत्पश्चात् गुरोराराधकस्ततः ॥ ३ ॥
यथाशक्ति तथान्येषां मूर्तिपानां च दक्षिणाः ।
दत्वा समाचरे त्पश्चा द्धाहं साप्यायनन्तु वै ॥ ४ ॥
आमूर्धो द्वादशार्णन्तु मूर्त्यर्थं पूर्ववन्न्यसेत् ।
श्वासित्ता समायुक्ते संस्कृत्य प्रोक्षणादिना ॥ ५ ॥
पीठेवतार्यं संवेष्ट्य वाससा ह्यधरोर्ध्वतः ।
अधःक्रमोदितैः कुम्भैः द्विष्षोढावर्तिते हृदा ॥ ६ ॥

स्नापये त्पाठये द्विमान् ओषधीना मिति श्रुतिम् ।
या ओषधय इत्यादि ऋग्वेदांस्तदनन्तरम् ॥ ७ ॥
एवं दशावशिष्टान्वै स्वेचिते कळशे स्वति ।
ततः कुम्भचतुष्केण चतुर्भि र्मूर्तिधारकैः ॥ ८ ॥
ऋक्सामपूर्वं विधिवत् स्नापनीयं च पाठयेत् ।
उदुत्तमं हि ऋग्वेदान् पाठये द्दविणं यजुः ॥ ९ ॥
ततस्तु वारुणं सामसामत्तोथर्वण स्ततः ।
अयं ते वरुणश्चेति पवित्रं ते ततो ऋचा ॥ ११० ॥
वसोः पवित्रं हि यजुः पाठयेत सामगास्ततः ।
पवित्रं तेहि य स्सामवश्चोथैकायनी स्ततः ॥ १ ॥
मूर्तिपान् समुदायेन पावमानी चतुष्टयम् ।
तदन्तेतु परं मन्त्रं व्यूहीयं भगवानिति ॥ २ ॥
पवित्रमन्त्रं तदनु इदं विष्णु र्विचक्रमे ।
ततो विभवमन्त्रैस्तु सर्वं स्सम्मन्त्रितेनं च ॥ ३ ॥
कुम्भेन सेचयित्वातु व्यूहमन्त्रैः परेणतु ।
स्नापयित्वा र्चयित्वातु जुहुयात साधिसं शतम् ॥ ४ ॥
यथावत्प्रणवेनाथ व्याप्तिं कृत्वा च पाठयेत ।
मामगामेति ऋग्वेदा नाम्नेनायु र्यजुर्मयान् ॥ ५ ॥
प्राणापानं हि यत्साम ततः प्राणाय वै नमः ।
यातव्येति परं मन्त्रं विप्रा नैकायनी स्ततः ॥ ६ ॥
ध्यानयुक्तो धिया सम्य क्पठे दाराधक स्ततः ।
ॐ ॥ आवाहया म्यमरवृन्दनतांघ्रियुग्मं
लक्ष्मीपतिं भुवनकारण मप्रमेयम् ।
आद्यं सनातनतत्त्वं प्रणवासनस्थं
पूर्णेन्दुभास्करहुताशसहस्ररूपम् ॥ ७ ॥

ध्येयं परं सकलवेदविदां स येषां
वाराहकापिलनृकेसरिसौम्यमूर्तिम्।
श्रीवत्सकौस्तुभमहामणिभूषितांगम्
कौमोदकीकमलशंखरथांगहस्तम् ॥ ८ ॥
सर्वत्रगोसि भगवन् किल यद्यपि त्वा
मावाहयामि हि यथा व्यजनेन वायुम्।
गूढो यथैव दहनो मथना दुपैति
ह्यावाहितोपि हि तथा त्व मुपैहि चार्चाम् ॥ ९ ॥
मालाधराच्युत विभो परमात्ममूर्ते
सर्वज्ञनाथ परमेश्वर सर्वशक्ते।
आगच्छ मे कुरुथयां प्रतिमां भजस्व
पूजां गृहाण मदनुग्रहकाम्ययाद्य ॥ १२० ॥
ततो विसृज्य मन्त्रेण भोगैः पूर्वोदितैर्यजेत्।
अर्घ्याद्ये दक्षिणान्तैस्तु पाठये ह्यन्मयांस्ततः ॥ १ ॥
अर्चामितेतिवैमन्त्रं सामयच्चार्चितस्त्विति।
भगवानितिसञ्ज्ञांस्तु ततस्संतर्पयेतनले ॥ २ ॥
स्तुत्वाजितन्ते मन्त्रेण सामज्ञान् पाठयेत्पुनः।
सहगायत्रसाम्नातु तद्रथन्तरसंज्ञितम् ॥ ३ ॥
प्रजप्य द्वादशार्णन्तु मुद्रांबद्ध्वा प्रणम्यच।
अष्टांगेनाथविज्ञाप्यो भगवान्भूतभावनः ॥ ४ ॥
मूर्तिभूतेनरूपेण अनेनैवहिसांप्रतम्।
लोकानुग्राततरवांस्तु समाह्लादय नागराम् ॥ ५ ॥
येनान्तस्सम्प्रविष्टेनं इत्याकालवशात्तवे।
जन्मान्तरसहस्रोत्था न्मोक्षमायान्तिकिल्बिषात् ॥ ६ ॥
एवमभ्यर्थ्योहि भगवां ल्लोकानुग्रहकृत्प्रभुः।
करावंघ्रिगतौकृत्वा पाठयेद्द्रव्यांस्ततः ॥ ७ ॥

उत्तिष्ठेति ऋचो मन्त्रं कृत्वा ब्रह्मरथे स्थिरे ।
सुयन्त्रितेच क्षीराज्ये दध्योधनसमन्विते ॥ ८ ॥
दुर्भिक्षक्षामशान्त्यर्थं परमान्नफलैर्युते ।
पाठयेदस्यवामीय मृङ्मयां स्तदनन्तरम् ॥ ९ ॥
तन्मयान्बलमन्त्रन्तु दशार्धेतिमहामते ।
स्वयमाद्यन्तसंरुद्धं हृदातुकवचञ्जपेत् ॥ १३० ॥
भ्रामयेद्बलिदानन्तु क्रियमाणन्तुसर्वदिक् ।
रत्नकाञ्चनवस्त्राणां पूर्ववत्क्षेपमाचरेत् ॥ १ ॥
दिव्याद्यायतनानांच कार्यापूजायथोदिता ।
पंचरात्रविदांचैव यतीनां ब्रह्मचारिणाम् ॥ २ ॥
षट्कर्मनिरतानांच दानन्दीनजनेष्वपि ।
रथस्थेमन्त्रबिम्बेतु यावत्पदशतं व्रजेत् ॥ ३ ॥
सरथस्तूर्यघोषेण तावत्क्रतुफलम्बहु ।
आप्नोत्याराधकश्शश्वत् सकामोनियतव्रतः ॥ ४ ॥
ततस्तोरणदेशस्थं रथंकृत्वार्चयेत्प्रभुम् ।
पाद्यार्घ्यपुष्पधूपैस्तु नमस्कृत्यचपाठयेत् ॥ ५ ॥
उत्तिष्ठेतिद्विषट्कार्णं सजितन्तन्तु चाखिलम् ।
सम्पठन्पौरुषंसूक्तं यागवेश्मप्रवेशयेत् ॥ ६ ॥
हृदाशयनगंकृत्वा यात्राहोमं समापयेत् ।
ततस्ताच्छिरसोदेशे चक्राधारस्थितेघटे ॥ ७ ॥
पूर्वोक्तलक्षणेनेत्र मन्त्रसम्पुटितंयजेत् ।
पूजयित्वार्घ्यपुष्पाद्यै श्शयनस्थंचवैपुनः ॥ ८ ॥
वर्मणाच्छाद्यवस्त्रेण ततोग्निनिकटे विभोः ।
स्थित्वालांछनमन्त्रांस्तु यथास्थानगतान्नचयेत् ॥ ९ ॥
पादाद्विद्वादशांगेषु ततोदामोदरादिकान् ।
तच्छक्तिकांस्तथामन्त्रान् भास्वद्व्यापक लक्षणान् ॥ १४० ॥

ऐश्वरेणाथ बीजेन यथावस्थेनभावयेत् ।
पादादितन्मयेनैव तद्वन्मन्त्रवरेणतु ॥ १ ॥
प्राग्वद्व्ययुक्तयातु अन्तर्ज्योतिर्मयात्मना ।
विभुनावाक्स्वरूपेण तदेवाथपरम्परम् ॥ २ ॥
सुशान्तंसर्वगम्बुध्वा निस्तरंगमिवोदधिम् ।
विद्यांगदामित्याद्यंच त्पाठयेत त्पांचरात्रिकान् ॥ ३ ॥
देहस्थान्नचासिकंमन्त्रं धारणाख्यमनन्तरम् ।
जीमूतस्येतिऋग्वेदा न्नासदासीन्निपाठयेत ॥ ४ ॥
क्रमेणानेनभुक्त्वा[हुत्वा]तु पादार्धशतसंख्यया ।
तिलानान्तुतथाज्यस्य मन्त्रैरेभिर्महामते ॥ ५ ॥
दत्वापूर्णाहुतिंसम्य गुपसंहारलक्षणाम् ।
ततस्तत्परमंब्रह्म ह्युदितंपूर्ववत्स्मरेत् ॥ ६ ॥
सर्वशक्तिमयेनैव स्वभावेनस्वकेनतु ।
ओजोबलात्मनायद्वत् गन्धद्रव्यात्मनातुवै ॥ ७ ॥
बीजन्तदस्वरूपेण समुद्रोबुद्बुदात्मना ।
एवमव्यपदेश्याया श्शक्तेस्स्वेशक्तिदर्पणे ॥ ८ ॥
स्थितिमादायविश्वेशः स्वातन्त्र्याच्चमहामते ।
मन्त्ररूपान्तनुन्धत्ते सम्यगाराधनायच ॥ ९ ॥
नानात्वमुपयातस्य प्रसरन्तस्यचस्वयम् ।
निष्प्रभत्वंमयातस्य चिद्बीजनिचयस्यच ॥ १५० ॥
आविष्कृतस्यभेदेना प्यमूर्तेनबलीयसा ।
अज्ञानगहनेनैव नित्यानित्यमयात्मना ॥ १ ॥
स्मृत्वैवंमूलमन्त्रन्तु बिम्बहृत्पद्मगंस्मरेत् ।
षट्शक्तिकिरणोपेते स्तैस्तद्रूपमयोन्ततुम् ॥ २ ॥
संस्मरेत्संहरन्तंच प्रागुक्तेनैववर्त्मना ।
स्वरूपममलम्भूय स्मरेन्मूर्त्यात्मनाततः ॥ ३ ॥

नयन्तंपूर्वविधिना एवंसपरमेश्वरः ।
मन्त्रात्मनाऽवसन्नाव सुपयावोयदावदा ॥ ४ ॥
सहस्रशिरसन्देव मितिस [श्यध] र्षास्तु चोदयेत् ।
पाठयेत ब्राह्मणान्धातयंध्यक्षेति च मन्त्रराट् ॥ ५ ॥
योविश्वतश्चक्षुरिति यातथ्योभवतीतिच ।
द्वासुपर्णेतितदनु अतोदेवेतिवैपुनः ॥ ६ ॥
ऋङ्मयानूपोरुषं सूक्तंततःपरतमात्वि [न्विति] ति ।
ततोर्चयित्वामन्त्रेशं शयनेबिम्बवृत्तिगम् ॥ ७ ॥
नित्यसन्निधिसिद्ध्यर्थं मासमाप्तिन्तुमण्डके ।
संरोद्धयसन्निधीकृत्य महताविभवेनतु ॥ ८ ॥
सांगंसन्तर्प्यविधिवत सद्दमूर्ति धरैस्ततः ।
स्वमूर्तिकुम्भान्मन्त्रेण जलमुद्धृत्यभाजने ॥ ९ ॥
बिम्बमूर्ध्निक्रमाद्दयं सर्वैरेकायनादिकैः ।
सन्तर्पयित्वातदनु मन्त्रंसपरिवारकम् ॥ १६० ॥
आज्यादिनाप्रभूतेन दत्वापूर्णाहुतिन्ततः ।
बिम्बात्मनाप्रयातानां क्ष्मादीनां मंगलपिणाम् ॥ १ ॥
आपादानेपिपूर्णत्वात् पिण्डीभःवार्थमेवच ।
आरम्भादेवजातानां छिद्राणांशमनेतुवै ॥ २ ॥
आप्यायनार्थमन्त्राणां द्रव्यैर्होमंसमाचरेत ।
द्विषट्केनाहुतीनान्तु एकैकेनचतुर्दश ॥ ३ ॥
आचांघ्रे जांनुपर्यन्तं स्पृष्ट्वाज्यं होमयेत्पुरा ।
आनाभिजानुदेशाच्च तयैव जुहुया दधि ॥ ४ ॥
नाभे राकर्णतः क्षीर माकर्णा दाशिरो मधु ।
सम्मेळ्य जुहुया त्सर्वं स्पृष्ट्वा देहन्तु चाखिलम् ॥ ५ ॥
संस्कृत्य बिम्बवत्पीठं भिन्नं ब्रह्मशिळां तथा ।
प्राणाभिमानदेवं सा यस्य यो विहित स्तु वै ॥ ६ ॥

वेष्टयित्वाम्बरे श्वित्रे श्चक्रमन्त्रेण वै ततः ।
कार्यो ब्रह्मशिलाहोम श्शताष्टाधिकसंख्यया ॥ ७ ॥
गायत्रीभि स्तदर्थं च वह्नृचाद्यैः पृथ क्पृथक् ।
अजस्य नाभावित्यादिमन्त्रै रेकायनै स्ततः ॥ ८ ॥
अध्वाधिभूतमूर्तन्तु　भोग्यं वापि पृथ क्स्थितम् ।
देवतानां त्वधिष्ठानं पीठं कृत्वा थ बुद्धिगम् ॥ ९ ॥
होतव्यं प्रणवेनैव स्वयं व्याहृतिभि स्सुतैः ।
अपरे मूलमन्त्रेण प्रणवान्तेन लांगलिन् ॥ १७० ॥
ततो वाहनमन्त्रेण　तर्पणीय स्सदैवहि ।
स्वनाम्ना प्रणवेनैव स्वाहान्तेनापरे स्ततः ॥ १ ॥
संरोध स्त्वर्पितानान्तु कार्यः पूर्णान्त एव हि ।
साम्भसा विष्टरेणैव भावेन सजपेनच ॥ २ ॥
सर्वेश्वरस्य देवस्य स्वकीयासु च मूर्तिषु ।
शब्दात्मिकासु मूर्तासु तद्वच्छ्रुतिमयस्य च ॥ ३ ॥
कुर्वेवंच यथादिक्षु मूर्तिपान् विनिवेश्य च ।
पार्श्वदेशेषु कुण्डानां तर्पये त्पायसेनतु ॥ ४ ॥
गृहीत्वा दक्षिणां मन्त्रः प्रीणनीयस्तु ते स्ततः ।
अथ निद्रायमाणन्तु देवं स्मृत्वावकुण्ठ्य च ॥ ५ ॥
अर्चयित्वा नमस्कृत्य तत्र सर्वान् प्रवेशयेत् ।
स्तुतिपाठकपूर्वांस्तु नृत्तगेयपरायणान् ॥ ६ ॥
विदिक्स्थान् प्रणवे जापे द्वादशार्णेन दिक्स्थितान् ।
सार्घ्यपुष्पाक्षतकरः प्रासादन्तं प्रजेत्ततः ॥ ७ ॥
हन्यात् सिद्धार्थके स्तस्मा द्विप्रा नस्त्राभिमन्त्रितैः ।
प्राङ्गमध्ये विधिनानेन श्वभ्रं वा साम्प्रतं खनेत् ॥ ८ ॥
विनिश्चितं यथा मानं गार्भं कुर्यात्तु षड्विधा ।
द्वारदेशा त्समारभ्य समे स्सूत्रैस्तु सर्वदिक् ॥ ९ ॥

द्वारमध्ये पदान्तन्तु पादाना मधिदेवताः ।
पिशाचानां न्मानवा देवा परमः पुरुषो हि यः ॥ १८० ॥
चातुरात्म्यं विनान्येषां स्थापितानां महामते ।
आराधनं च स्वस्थाना दचिरादेव सिद्धिकृत् ॥ १ ॥
आक्रम्य देवभागं च देव आराध्यते यदि ।
भवन्ति बहवो विघ्नाः वर्जनीया स्ततस्तु सः ॥ २ ॥
शुभेन भद्रपीठेन देवीयेनाथ लांगलिन् ।
चातुरात्म्यप्रतिष्ठायां शिलाख्यं मध्यमं पदम् ॥ ३ ॥
गर्भमध्यपदस्योर्ध्वं योजनीयं प्रयत्नतः ।
अतोन्वितांश मेकन्तु त्यक्त्वा वै पृष्ठदेशतः ॥ ४ ॥
शिलापदद्वयस्यान्ते योजनीया महामते ।
अग्रदेशेथ बिम्बस्य वेदि भांगद्वयोपरि ॥ ५ ॥
चतुरश्रायतस्यैवत पीठस्यस्थापनेहितम् ।
एवंहिचतुरश्रस्य विधानंकिन्तुलांगलिन् ॥ ६ ॥
संचार्यात्वग्रतोवेदि नित्यमाराधनार्थतः ।
पीठोपर्यथवादेवं यस्त्वाराधयतेसदा ॥ ७ ॥
निवेशनीयावेतेन मध्यदेशेनसाशिला ।
एवमाराधनवशा त्तथाफलवशात्तुवै ॥ ८ ॥
सपीठानांचबिम्बानां कार्यसम्यङ्निवेशनम् ।
देवमानुषभागाच्च ऐहिकामुष्मिकम्भवेत् ॥ ९ ॥
विबुधब्रह्मभागाच्च सैहिकन्तुगुणाष्टकम् ।
अपवर्गेतुसामान्य मकामानामयंविधिः ॥ १९० ॥
भिन्नपेक्षावशान्मध्ये सतिभूयस्समाचरेत् ।
गालितेस्त्वांबुनालिप्ते हृदावैचन्दनादिना ॥ १ ॥
श्वभ्रेयोधटरुद्धानां मन्त्राणांचनिरोधनम् ।
पूर्वोक्तेनविधानेन धियास्वेस्वेयनेतथा ॥ २ ॥

कृत्वार्चनंयथोद्दिष्टं पूर्णान्तंतत्रविन्यसेत् ।
बाहुल्येनतुषट्पंच चतुर्गोळकसम्मिताम् ॥ ३ ॥
पीठाद्विनिर्गतांकिंचित् भूतयेतुस्थिरांशिळाम् ।
अस्तांपीठेनमुक्त्यर्थं नवरन्ध्रकृताम्पुरा ॥ ४ ॥
सुमन्त्रेणतुतत्रापि प्रतिष्ठाख्यांतिपाठयेत् ।
प्रागादौप्राभवेनाथ पंचकंपंचकंन्यसेत ॥ ५ ॥
शिलावटेषुद्रव्याणां तत्रवज्रश्चहाटकम् ।
हरितालमुशीरंच व्रीह्योर्दक्षिणेत्वथ ॥ ६ ॥
षाष्टिकांस्वीशदिग्वाय्वोः पुष्परागोहरीतकी ।
मध्येसर्वाणितदनु ततोगर्तंगणन्तुतत् ॥ ७ ॥
क्षेपेराच्छादितंकृत्वा सांगंमन्त्रंपदेपदे ।
पूजयित्वायजुर्वेदां श्रमपट्कांश्चपाठयेत ॥ ८ ॥
तदूर्ध्वेविन्यसेत्पीठं तच्छ्वभ्रेविनिवेश्यच ।
अष्टलोहमयंचक्रं तदूर्ध्वेतुमहामते ॥ ९ ॥
द्वादशाख्याद्विशेषोथा दाधारोयस्ययःस्वकः ।
हैमंतदूर्ध्वेकमलं तज्जंवाताम्रमेववा ॥ २०० ॥
यथाक्रमस्थितंह्येत त्पंचकंचतुरात्मनि ।
न्यसेदनन्तंचक्रस्य मीनकूर्मौकृतस्यच ॥ १ ॥
सर्वस्यविहितंपद्मं तस्यानन्तन्तुविन्यसेत् ।
मण्टपेतुखगेशस्य चक्रस्थापनकर्मणि ॥ २ ॥
न्यस्यपूर्वान्तिकंकृत्वा कर्मण्यत्रचतर्पणम् ।
स्वमूर्तिधरैःप्राग्वत् कार्यादर्भोदकक्रिया ॥ ३ ॥
ततःप्रबोधयेद्देवं अर्चयित्वा इदंपठेत ।
मन्त्रात्मन्रूपमात्मीय मग्नेयमुपसंहर ॥ ४ ॥
समाश्रयस्वसौम्यत्वं स्थित्यर्थंपरमेश्वर ।
नमस्तेस्तुहृषीकेश उत्तिष्ठपरमेश्वर ॥ ५ ॥

मदनुग्रहहेत्वर्थं पीठभूमिसमाश्रय ।
इत्युक्त्वाहृदयेनाथ त्यक्तनिद्रन्तुमन्वरं ॥ ६ ॥
उत्थाप्यमूर्तिमन्त्रेण सहमूर्तिधरैर्बलात ।
तोरणेनचनिष्क्रम्य प्रदक्षिणचतुष्टयम् ॥ ७ ॥
कुर्यात्प्रासादपीठस्य द्वाराग्रेसन्निरोध्यच ।
पाद्यार्घ्याचमनन्दत्वा हृन्मन्त्रेणप्रवेशयेत् ॥ ८ ॥
शाखाग्रमस्पृशन्तंच पाठयेत्तद्विदस्ततः ।
चतुश्चक्रेतितद्गत्तु पुरमेकादशेतियत् ॥ ९ ॥
वर्माभिमन्त्रितेनाथ दुकूलेनसितेनच ।
पादांबुरुहनालश्मा श्शिखामन्त्रेणवेष्टयेत् ॥ २१० ॥
अग्नीषोमौसमीकृत्य प्रणवाद्यन्तगेनतु ।
निवेश्यमूलमन्त्रेण वामतोमारुतंत्यजेत् ॥ १ ॥
प्रतिष्ठालिंगशब्दौच द्वौमन्त्रौ पाठयेत्क्रमात् ।
शांतम्ब्रह्ममयंरूपं स्वकंसमवलम्ब्यच ॥ २ ॥
यतोहितार्थसर्वेषां निर्गतस्त्वत्गुणात्मना ।
अतोब्रह्मपदादीष देवभागेसमानयेत् ॥ ३ ॥
मोक्षादिफलसिद्धीनां प्रापयेत्सविचारतः ।
करस्थमथमोक्षार्थं कौतुकंहृदयेनतु ॥ ४ ॥
सर्वांगमर्दमन्त्रेण दत्वामूलमनुस्मरेत् ।
इतिसामान्यसन्धानं प्राक्कृत्वातद्विशेष्यच ॥ ५ ॥
हृदास्त्रपरिजप्तेन वज्रलेपेनवैततः ।
बिम्बपीठशिलानांतु एकत्वेनाचरेत्स्थितिम् ॥ ६ ॥
मूलमन्त्रन्ततोध्यात्वा सुशान्तब्रह्मलक्षणम् ।
आचाधाराद्गर्ध्वजाक्रांतं व्यापन्तेनाखिलंस्मरेत् ॥ ७ ॥
इतिसामान्यसन्धानं प्राक्कृत्वातद्विशेष्यते ।
स्थूलसूक्ष्मपरत्वेन स्थूलंपोडाशिलान्तगम् ॥ ८ ॥

पिण्डिकायां तथासूक्ष्मं तत्परंबिम्बविग्रहे ।
विन्यासंपीठमूलेथ देवतानां समाचरेत् ॥ ९ ॥
भवोपकरणीयानां पीठोर्ध्वेत्वथतद्विना ।
न्यसेद्विभवदेवांस्तु उपर्युपरिपूर्ववत् ॥ २२० ॥
घटोद्देशात्समारभ्य परमर्चागतन्ततः ।
एवंहिसर्वदेवानां सन्निवेशवशात्तवै ॥ १ ॥
चिन्तामणिमयोन्यासः कृतोभवतिसिद्धिदः ।
अथमण्टपमध्येतु देवदेवस्यसम्मुखम् ॥ २ ॥
स्थितेपितन्मुहूर्तांशे स्थापनीयश्चपक्षिराट् ।
स्नातोनुछिमोमन्त्रेण स्वेनयस्संस्कृतःपुरा ॥ ३ ॥
शक्तयासहबिम्बेन यस्माद्विन्त्रेषुवस्तुषु ।
बिम्बसन्निकटस्थेषु अथवान्यत्रलांगलिन् ॥ ४ ॥
तत्कालमंगभावत्वं व्रजमानेषुसर्वथा ।
हवनांतंचनिश्शेषं ध्यानार्चनपुरस्सरम् ॥ ५ ॥
स्वयमेवानुरूपेण कर्मसामान्यतात्यजेत् ।
तस्मात्प्रागभवनात उत्थाप्याद्यबिम्बवत् ॥ ६ ॥
देवंप्रदक्षिणीकृत्य प्राग्वत्संस्थापनावनौ ।
एकस्मिन्मध्यरन्ध्रेतु वज्राद्यंपंचकंन्यसेत् ॥ ७ ॥
एकएवतदूर्ध्वेच आधारोप उदीरितः ।
प्राग्वन्निवेशनीयंच तत्पीठोर्ध्वास्तुभावनाः ॥ ८ ॥
भावनीयं शरीरेच शेषं विज्ञातिलक्षणम् ।
पाठये ब्राह्मणां स्तद्वत्सुपर्णोसीति मन्त्रराट् ॥ ९ ॥
तमेवाभ्यर्चितं कृत्वा याया द्देवनिकेतनम् ।
कलशैः पृष्ठभागस्थै स्स्नापनीय स्ततो विभुः ॥ २३० ॥
सह मूर्तिधरै स्सर्वै र्यथाचानुक्रमेणतु ।
सदाघमर्षणेनैव गायत्र्या वर्तितनतु ॥ १ ॥

प्रागुक्तमयस्तु तदनु चतुर्थावर्तिते स्स्वयम् ।
हृदाद्यावर्तिते ष्षड्भि र्यजु र्भिस्तेन सेचयेत् ॥ २ ॥
भूय स्स्वयं तथा कुम्भे स्सामवित् स्नापये त्ततः ।
षड्भि रन्यै स्स्वयं पश्चात् तेनैवाथर्ववित्ततः ॥ ३ ॥
पवित्रावर्जिते रेवं कलशै रन्तरान्तरा ।
सह चैकायनीयैस्तु स्नपनीय मनन्तरम् ॥ ४ ॥
चतुर्मूर्तिमये र्मन्त्रैः बहुशः परिभावितैः ।
स्नापये त्कळशेनाथ शेष मादाय वै घटम् ॥ ५ ॥
सच्छतावर्तितं कृत्वा समूलेनाथ मूर्तिना ।
सार्धं वै देवदेवस्य मूर्ध्नि चोत्कीर्य पाठयेत् ॥ ६ ॥
जितन्त इति वै सर्वा स्ततश्चाक्षोदकेन च ।
प्रासादं शोधयित्वा च स्नानवर्जं समाचरेत् ॥ ७ ॥
पूर्वोक्त मासनाद्यं यथागदानावसानिकम् ।
सदक्षिणं विशेषेण गुरो मूर्तिधरेष्वथ ॥ ८ ॥
देवं प्रणम्य विज्ञाप्य कर्मणा मनसा गिरा ।
त्वमर्चान्तर्गतो देव मया यच्छयनादिषु ॥ ९ ॥
नीतोसि चाभिमुख्यन्तु क्षन्तव्यं तन्ममाच्युत ।
एवं प्रणम्य विज्ञाप्य क्षान्त्वा निष्क्रम्य सम्मुखम् ॥ २४० ॥
आचम्य च बलिं दत्वा याया द्देवगृहं ततः ।
तत्रासनादिकै रिष्ट्वा स्नानान्तैः पूर्ववत्प्रभुम् ॥ १ ॥
अपनीताम्बरैः कुम्भे र्धान्यपीठोपरि स्थितैः ।
हृन्मन्त्रपूजितै र्भूय स्सलिलेन सुपूरितैः ॥ २ ॥
सह मूर्तिधरैः प्राग्वदन्तरान्तरयोगतः ।
कार्यं वा स्नानकर्माथ विधिदृष्टेन कर्मणा ॥ ३ ॥
निरोदकेथ प्रासादे पुन राराध्य पूर्ववत् ।
भोगै रासनपूर्वैस्तु सम्प्रदानान्त मच्युतम् ॥ ४ ॥

मुद्रां बध्वा जपे न्मन्त्रं स्तुत्वा क्षान्त्वा वहि र्व्रजेत् ।
शतं सहस्रं साष्टं वा जुहुया न्मन्त्रराट् स्वयम् ॥ ५ ॥
सांगं सपरिवारं च संहितोच्चारयुक्तितः ।
मूर्तीयैः प्रणवाद्याभि र्गायत्रीभि श्शतं शतम् ॥ ६ ॥
एकायनै रभिज्ञाभि स्स्वकीयाभिस्तु तत्समम् ।
प्रदापये त्ततः पूर्णा मृग्वेदाद्यां स्तु मूर्तिपान् ॥ ७ ॥
एकायनांस्तदन्तेतु क्रमात्तान्पाठयेत्ततः ।
पूर्णात्पूर्णेतिवैमन्त्र माद्यात्पूर्णमसीतियत् ॥ ८ ॥
सनमस्केनमन्त्रेण स्वयंसांगेन निक्षिपेत् ।
बलिभिस्तुततस्सर्वान् भूतपूर्वांस्तुतर्पयेत ॥ ९ ॥
प्रविश्याचम्यतदनु क्षान्त्वादेवन्तुकुम्भगम् ।
पूर्ववन्मण्डलस्थन्तु कुण्डस्थन्तदनन्तरम् ॥ २५० ॥
भूषयेद्गुरुपूर्वांस्तु भूषणैः कटकादिकैः ।
गुरोर्वागुरुपुत्रस्य यागद्रव्यं निवेदयेत् ॥ १ ॥
बिम्बमेकायनान्तन्तु सर्वसाधनसंयुतम् ।
दासीकर्मकरोपेतं शुद्धदेवळकान्वितम् ॥ २ ॥
शैलोत्थं पूर्ववत्कुम्भं कृत्वाधातुमयन्तुवा ।
नद्दिगोळकमानेन मन्त्रबिम्बेनवैसह ॥ ३ ॥
शुभेन्यस्मिन्दिनेयाग मण्टपेप्युक्तलक्षणे ।
अधिवास्ययथान्यायं सर्वोपकरणान्वितम् ॥ ४ ॥
स्नानाद्यमखिलन्ताभ्या मापाद्यचयथाविधि ।
तस्मिन्हृदादिसंयुक्ते बिम्बंकुम्भेनिवेश्यच ॥ ५ ॥
वस्त्रैराभरणैःपुष्पै रस्वच्छंकृत्वार्घ्यं पुष्पहृत् ।
शनैःप्रासादपर्यन्त मारोहेन्मूर्तिपैस्सह ॥ ६ ॥
तत्रभागासनादींस्तु कृत्वःसंक्षाळनान्तिमान् ।
आचरेद्बीजविन्यासं सर्वसावाहनोदितम् ॥ ७ ॥

निवेश्यानीयतन्मध्ये बिम्बंकुम्भसमन्वितम्।
हृदाद्यन्तनिरुद्धेन मूलमन्त्रेणलांगलिन् ॥ ८ ॥
तत्राद्यमनुसन्धान मेवं कृत्वापरात्मकम् ।
सामान्यलक्षणं पश्चा त्पूर्वोद्दिष्टेनवर्त्मना ॥ ९ ॥
समालभ्यार्चयित्वाच स्रगाद्यैर्मण्टपेततः।
पूर्ववत्पाठयेद्विमान् तत्प्रतिष्ठापनेतुवै ॥ २६० ॥
संरोध्यवर्ममन्त्रन्तु तन्त्रध्यानाधियास्वयम्।
पूर्णांतमखिलंकृत्वा विधिनानेनवैपुनः ॥ १ ॥
आरोहेतितुवैसाम पाठयेत्सामगांस्तुवै।
चक्रमामलसारस्य मध्यतःसन्निवेशयेत ॥ २ ॥
यथाभिमतरूपन्तु दिग्वक्त्रंशाम्बरानतम् ।
स्वशक्तिवर्णदृष्टस्थं चण्डमार्तांण्डभासुरम् ॥ ३ ॥
चक्रमन्त्रंन्यसेत्तस्मि न्वर्णाध्यानम्पुरोदितम् ।
गत्यागतिप्रयोगेन प्राक्प्रमेयजलक्षणम् ॥ ४ ॥
नान्यथावत्पुराज्ञात्वा द्रव्यमूर्तिस्वमागतम् ।
कुर्यात्तत्रोर्ध्वसन्धानं नान्यथातुमहामते ॥ ५ ॥
अमलंशांतसंज्ञंवै तथाशांतोदितोदितम् ।
एवमेवहितन्मूर्ति यश्चक्रंवेत्तितत्वतः ॥ ६ ॥
सोस्मिन्संसारचक्रेतु सर्वाश्रमनिवासिनाम्।
सर्वधर्मरतानांच चक्रमूर्तिस्वमाप्नुयात ॥ ७ ॥
यच्छक्तिर्ब्रह्ममूर्त्यैव सिद्धामाक्षात्त्रिराश्रया ।
अन्तर्बहिस्थं सर्वेषां मोक्षदंचामलंस्मृतम् ॥ ८ ॥
क्षीरोदार्णवतुल्यंच सहस्रादित्यसन्निभम् ।
निरंगन्तीक्ष्णधारंवै तच्छान्ताख्यंहियोगतः ॥ ९ ॥
यत्तनानांगभावेन स्वातन्त्र्यात्स्वयमेवहि ।
सर्वदिक्प्रसृतांकृत्वा स्वात्ममूर्त्तिहिवर्तते ॥ २७० ॥

ईषद्धलयवर्णाभे नराणामन्तरेखवत् ।
शांतोदितंच तद्विद्धि चक्रमिच्छामदंचयत् ॥ १ ॥
यावन्मूर्तौचसम्बन्ध स्सर्वंकृत्वावतिष्ठते ।
प्रसूतं नाभिपूर्वन्तु उदिताख्यं हि चक्रराट् ॥ २ ॥
तस्मि न्नाराधितो मन्त्र स्तद्वै सम्पूजितं स्मृतम् ।
जप्तं सन्तर्पितं भक्त्या सर्वेषां सर्वं मृच्छति ॥ ३ ॥
एवं चाभिमतं चक्रं सर्वविघ्नक्षयंकरम् ।
प्रतिष्ठाप्य समभ्यर्च्य तस्यैव समनन्तरम् ॥ ४ ॥
ध्यंशेन शिखरा दुच्चं खगराट्परिभूषितम् ।
संस्कृत्य ध्वजदण्डंच शिखामन्त्रेण विन्यसेत् ॥ ५ ॥
ततो विविधवर्णं च किंकिणीगणभूषितम् ।
ध्वजाग्रा च्छिखरार्धं च यावद्दीर्घं मकृत्रिमम् ॥ ६ ॥
दैर्घ्यांद्वादशमांशेन द्विनवांशेनवाततम् ।
कृत्वाऽस्त्रसन्निधिं तस्मिन् लांछनाख्ये पुरा पटे ॥ ७ ॥
निवेश्य ध्वजदण्डाग्रे गन्धाद्यै रर्चये त्ततः ।
स्वयंकृतानां बिम्बानां मयेदं सम्प्रकाशितम् ॥ ८ ॥
प्रतिष्ठापन मब्जाक्ष स्वतन्त्रे स्वयनेषु च ।
सांकर्येण विना ह्येवं कृतं भवति सिद्धिदम् ॥ ९ ॥
अन्यथा सिद्धिदं विद्धि नृणां व्यामिश्रयाजिनाम् ।
एकस्मि न्नासने स्थाने चतुस्त्रिद्व्यादिमूर्तिना ॥ २८० ॥
व्यक्तीभूतं यथा लोके लोकानुग्रहकाम्यया ।
स्वयं नानास्वरूपेण स्वर्गादौ स्थापनं तथा ॥ १ ॥
न कार्यं मनुजे र्वर्ण धर्मस्थै र्नैकभावनैः ।
तथा ये समबुद्धिस्थैः कृपया सम्प्रवर्तकैः ॥ २ ॥
क्रियाभेदरतै श्शुद्धै र्नानाविबुधराजकैः ।
प्रणवैकप्रलापस्थै श्शान्तचित्तै रमत्सरैः ॥ ३ ॥

मन्त्रमुद्राक्रमध्यान सम्भूतिळयळक्षकैः ।
तथा तत्संकरोत्पन्नदोषाणां ध्वंसनक्षमैः ॥ ४ ॥
प्रस्थापितस्तु वै सम्यक् ज्ञानमूर्तिं जगद्गुरुः ।
भिन्नमन्त्रक्रियारूपं न कुर्यात्तदपेक्षया ॥ ५ ॥
साधार माळयं पीठं भवाख्यं विभवात्मनाम् ।
देवानां मर्त्यधर्मस्थैः प्रतिष्ठा यज्ञकर्मणि ॥ ६ ॥
संसारदेवतानां च स्थापितानां तु वै पुरा ।
कृत्वा तु भगवद्बिम्ब माळयेवा तदासने ॥ ७ ॥
निवेशयति यो मोहात् बिम्बेन सह तस्य वै ।
जायते च भयं घोर मिहामुष्मिकदोषदम् ॥ ८ ॥
नाप्नोत्याराधकानान्तु सकाशा दर्चनं परम् ।
यथा बिम्बं तथा कर्ता नाप्नुया दुत्तमं फलम् ॥ ९ ॥
अर्चाया माधिके पीठे ह्यपेक्षा लक्षणोज्झिते ।
शक्ति द्विभवदेवानां स्थापनं न विरोधकृत् ॥ २९० ॥
नान्यकाले न चान्यस्य नान्यमूर्तिनिवेशनम् ।
विहितं भगवत्पीठे विनष्टव्यत्ययं विना ॥ १ ॥
यथा भवोपकरण देवानां मण्डलेर्चनम् ।
विहितं न तथा पीठे ह्येकस्मिन् सन्निवेशनम् ॥ २ ॥
भिन्नक्रमेपि यः कुर्यात् पृथग्वा पिण्डिकोपरि ।
वामदक्षिणयो रेवं देवानामप्रदक्षिणम् ॥ ३ ॥
सदक्षिणस्य वै तेन प्रतिष्ठाख्यमखस्य च ।
निहता चोन्नता कीर्ति स्तेनाथ श्वय मेव हि ॥ ४ ॥
प्राक्स्थितस्याधिकं माना द्द्विणेनोर्जहानिकृत् ।
शस्तमप्युतनस्यैव प्राक्स्थितंयत्ततोधिकम् ॥ ५ ॥
नेच्छन्त्यन्योन्यसामन्तु स्थानवृत्तिधनैस्सह ।
उन्नतासनसंख्यादि मानहीनस्तु सर्वदा ॥ ६ ॥

मानहीनस्तुकर्तॄणां कुर्यात्सुतसुखक्षयम् ।
बिम्बस्यबिम्बकर्तुर्वै देहिनांस्थापकस्यच ॥ ७ ॥
वामकृत्स्थापनं [वामे] यद्वा सममूनन्तुवाधिकम् ।
एवंज्ञात्वायथाशक्ति पृथक्कुर्यान्निवेशनम् ॥ ८ ॥
विद्धयेचापवर्गार्थं मर्चनांदेवताळये ।
प्रतोळीसांगनागार जगतीदेवमन्दिरम् ॥ ९ ॥
सपीठंभगवद्बिम्बं भक्तानांपत्रयुज्यते ।
सम्यक्प्रदक्षिणीकृत्य बलिधूपपुरस्सरम् ॥ ३०० ॥
श्वेतद्वीपसमंविद्धि देवतायतनंतुतत् ।
सन्निवेशस्स्वयंमुख्यः अमुख्यस्त्वपरोहियः ॥ १ ॥
मुख्यात्पूर्णफलप्राप्ति मुंख्याभावात्तथाविधा ।
सम्यक्स्थाप्यादिदेवीया मूर्तयोयाःपुरोदिताः ॥ २ ॥
स्थलंविनानचैवार्च्या नित्यंविप्रैस्तुबिम्बगाः ।
स्वेहेपीठगताबिम्बे पुनस्तापत्रगाथाहिः ॥ ३ ॥
सदैवतेस्समाराध्या भूतयेपिहिमुक्तये ।
सवाहनेऽवाहने वा बहिर्वास्वगृहान्तरे ॥ ४ ॥
नार्चनीयानृपाद्यैस्तु बिम्बेवैमण्ड [लक] काहते ।
सुपर्णेसंस्थितास्सर्वे बिम्बावैब्राह्मणैर्नृपैः ॥ ५ ॥
स्वगृहादौचसर्वत्र पूजनीयास्तदैवहि ।
एवमन्यास्तुवैश्यान्ते स्वसत्तमैरखिलास्तुयाः ॥ ६ ॥
सहशक्तीशभेदैस्तु नशक्तीशस्त्ववाहनः ।
बिम्बगोब्राह्मणाद्यैश्च नित्यमर्च्यःपृथग्विना ॥ ७ ॥
स्वाश्रमे बन्धुवर्गस्य मध्यस्थो ह्यनिशन्तुवै ।
अविनाशोऽभ्यरूपेण अभ्युत्पन्नजनस्यच ॥ ८ ॥
ह्यगतेभगवद्वक्त्रे कार्यंचैलोक्यभीतिदे ।
यच्छन्विशुभमात्रायां क्षितस्याश्वाशुभंगृहे ॥ ९ ॥

बहिष्कृताविशेषेण हर्म्यप्रासादभूमिषु।
आहूयैर्भोगपदस्थैस्तु साम्प्रतंसिद्धिकाळसैः ॥ ३१० ॥
निष्प्रभत्वान्नमृच्छैली कार्यादारुमयीगृहे।
ऋतेसांन्यासिकैश्शान्तै श्शश्वन्मोक्षपरायणैः ॥ १ ॥
तदुत्थाश्चबहिस्सर्वैः कार्यास्तास्सुसदेषहि।
जनयन्तिमहद्दीप्तिं चन्द्रसूर्योदयेनिशम् ॥ २ ॥
आद्येकमूर्तेस्सर्वासां मूर्तीनान्तुमहामते।
तथामूर्त्यन्तराणांच प्रादुर्भावगणस्यच ॥ ३ ॥
प्रादुर्भावान्तराणान्तु स्थितानांयत्रकुत्रचित्।
सर्वेषांसर्वदातेषां हितआराधनायच ॥ ४ ॥
प्रणवःपीठपूजार्थं नमस्कारपदान्वितः।
प्रसिद्धंचातुरात्मीयं संज्ञामन्त्रचतुष्टयम् ॥ ५ ॥
अर्चनेसाजितंतन्तु विनामन्त्रेणयोन्यथा।
करोतिपूजनंमूढ अक्षबिम्बगणस्यच ॥ ६ ॥
गृहेवाज्ञातमन्त्रस्य दोषस्तस्यमहायशे।
विनासामान्यमन्त्रैर्वं अक्षबिम्बगतस्यच ॥ ७ ॥
कुर्याद्विशेषमन्त्रेण विशेषाख्यस्यचार्चनम्।
तदुत्थमचिरेणैव शबळन्तस्य दोषकृत् ॥ ८ ॥
ज्ञात्वैवंसावधानेन क्रियासक्तेनसर्वथा।
भवितव्यं विशेषाद्वै गृहाश्रमपरेणतु ॥ ९ ॥
क्ष्माभंगाद्येषु दोषेषु ध्वजान्तेष्वेवमेवहि।
उपोद्धारे प्रवोक्तव्यं प्रणवाद्यंचपंचकम् ॥ ३२० ॥
होमार्चनविधानेषु सृष्टिसंहारकर्मणि।
ध्वजाद्यस्तुद्धरेत्सर्वं मथनीचफलेसति ॥ १ ॥
आधारोपलपर्यंतं तन्निवेश्यं तथापुनः।
चक्रप्रासादभंगेषु सोर्ध्वेबिम्बमहामते ॥ २ ॥

पीठभंगेतुवैबिम्बं बिम्बभंगेतदेवहि ।
यद्यदिच्छतिचेद्धर्तुं ततदादौतुसंयजेत् ॥ ३ ॥
मध्वाज्यगुलुक्षीर दधिलाजादिभिः क्रमात् ।
सन्तर्प्य तिलहोमैस्तु सहस्रशतसंख्यया ॥ ४ ॥
मन्त्रौघं हृदयात्तस्मिन् समुच्चार्यविनिक्षिपेत् ।
नालवद्भ्रामुराकारं तत्रचिच्छक्त्योखिलाः ॥ ५ ॥
विश्रान्तिपूर्वसंरुद्धा मन्त्रौघं पुनराहरेत् ।
पाठयेद्धर्मयान्सर्वा मुक्तिहेत्यथतद्विदः ॥ ६ ॥
कर्माद्भेतदन्तेषे परमां प्रकृतिन्निवति ।
चतुर्भिरनिरुद्धाद्यैः स्वै स्वै मंत्रैः पृथक्पृथक् ॥ ७ ॥
कृपाहोमंचतत्वनु तत्संज्ञार्णैर्विलोमतः ।
प्रणवाद्यन्तगैस्सर्वैः प्राग्वदष्टासुदिक्षुच ॥ ८ ॥
प्रासादस्यतुहोतव्यं गायत्रीभिस्तथैवच ।
वासुदेवाद्यभिख्याभि र्होमांतेत्वथतैस्सह ॥ ९ ॥
न्यासंवादनमन्त्रेण सांगंकृत्वात्मनातदा ।
वाहनानां तथाचैव प्रक्षेवं संस्मृतोरथ ॥ ३२० ॥
संचाल्यहृदयेनैवं जपन्क्रमथोद्धरेत ।
विमानवारयेकृत्वा ह्यगाधेभासिनिक्षिपेत् ॥ १ ॥
जपेत्संज्ञामनु [नारसिंह] स्पष्टा रमायधिवतार्थमेवच ।
सहस्रमेकमर्धन्त होतव्यं सर्वशांतये ॥ २ ॥
पूर्ववत्तोषयेत्सर्वान् कांचनाद्यैः स्वशक्तितः ।
तर्पयेदन्नपानाद्यै स्सर्वानाचार्य पूर्वकान् ॥ ३ ॥
वाचयन्तदादशार्णेन ह्यच्छिद्रंहृष्टमानसैः ।
भूयस्संस्थापनंकुर्या दुद्धृतस्यकृतस्यच ॥ ४ ॥
सामान्यलक्षणैर्मन्त्रै श्चतुर्मूर्तिमयैस्सह ।
गुरुस्समणवेनैव यस्सम्यग्भगवन्मयः ॥ ५ ॥

यतस्सप्रणवादन्य श्चातुरात्म्यंचविद्यते ।
मन्त्रोवादेवताऽरूप स्तत्वतोब्रह्मवेदिनाम् ॥ ६ ॥
प्रपंचःप्रणवोमन्त्रो देवस्य चतुरात्मनः ।
एवंज्ञात्वापुराकर्म स्थापनोत्थापनांतिमम् ॥ ७ ॥
विधिवद्यागपूर्वंतु बिम्बसंचालनंविना ।
योदिव्यायतनादीनां भक्त्याभूयः करोतिच ॥ ८ ॥
ध्वजंवामन्दिरंशुभ्रं पीठं भासञ्चपिण्डिकां ।
सल्लोहशैलकाष्ठोत्थैः पद्माद्यैरूर्ध्वतोंकितां ॥ ९ ॥
एकानेकदलैश्चैव वद्धैरायसपूर्वकैः ।
सुबद्धां सूर्यसोमाग्निप्रभाभ्यां सुमनोरमाम् ॥ ३४० ॥
स लोके शाश्वतीं कीर्तिं स्थापयित्वाकुले सह ।
स्थानं सायुज्यतापूर्वं देहान्ते नून माप्नुयात् ॥ १ ॥
नानारत्नप्रभाढ्यानि लांछनान्यंगदानि च ।
निर्मितानि सुवर्णाद्यै र्विभो स्संयोजयन्ति ये ॥ २ ॥
ते धौतकल्मषा स्सर्वे देह मासाद्य पावनम् ।
सम्यज्ज्ञानेन युज्यन्ते भवत्रायान्ति येन च ॥ ३ ॥
आत्मन श्चोपकाराय सर्वदुःखनिवृत्तये ।
अंगुष्ठाग्राच्च गुल्फान्त माजान्वंसावधीद्दवा ॥ ४ ॥
मणिमुक्ताप्रवाळाढ्य कवचं कांचनादिकम् ।
यः क्षिपत्यतिभक्त्या वै स्वशक्त्याच्यांगते च्युते ॥ ५ ॥
स याति परमं स्थानं सपुत्रपशुबान्धवः ।
लग्नं यद्भगवन्मूर्तौ वंगदं नूपुरादिकम् ॥ ६ ॥
वियोजयति यो मोहाव तस्य वीचौ स्थिरा स्थितिः ।
यः पंचकालसक्तानां विप्राणा मधिकारिणाम् ॥ ७ ॥

पञ्चरात्रविदां चैव द्विजानां सिद्धिकांक्षिणाम् ।
अथ योऽच्छिन्नशाखानां नारायणरतात्मनाम् ॥ ८ ॥
तपस्विनां वा व्रतिनां स्नातकब्रह्मचारिणाम् ।
भक्ताना मथवान्येषां मार्जनादौ रतात्मनाम् ॥ ९ ॥
प्रीतये परमेशाय कृत्वा तम्य क्रमयच्छति ।
शालाद्यायतनोपेत मश्मपक्केष्टकान्वितम् ॥ ३५० ॥
ग्राम्यै र्धान्यै स्तथारण्यैः पूर्ण सम्पति संयुतम् ।
वणिक्कुटुम्बभृतक रक्षापालै स्समन्वितम् ॥ १ ॥
सोनन्तं फल माप्नोति काल माचन्द्रतारकम् ।
संस्थितिं शाश्वतीं लोके प्राप्नुया दक्षयं यशः ॥ २ ॥
भोगोपभोगिनीं भद्रां रम्यां पूर्वोक्तलक्षणाम् ।
यागनिष्पत्तये कुर्या योग्रतः पीठसन्निधेः ॥ ३ ॥
बहि राराधनार्थं वा कर्मिणां ब्रह्मचारिणाम् ।
मनुष्यपितृदेवाख्या न्मुच्यते स ऋणत्रयात् ॥ ४ ॥
मध्यतो गरुडाक्रान्तं सचक्राम्बुरुहांकितम् ।
तुर्याश्रमथवा वृत्तं कुण्डवत्पदवीयुतम् ॥ ५ ॥
बलिपीठं बहिः कुर्या द्भक्त्या यस्त्वच्युतालये ।
स याति शाश्वतं स्थानं विमाने रिन्दुवर्चसैः ॥ ६ ॥
य स्समकार मारामं सम्प्रयच्छयति वै विभोः ।
नान पुष्पफलोपेतं वापीद्रुम [कूप] समाकुलम् ॥ ७ ॥
साब्जतो याशयोपेतं मारखड्गसमन्वितम् ।
स नन्दनवने भोगान् भुक्त्वा यात्यच्युतालयम् ॥ ८ ॥
क्षोणीं य स्सस्यसम्पूर्णां युक्तां वा गन्धशालिना ।
केदारं जलपातैस्तु परिच्छन्नं समन्ततः ॥ ९ ॥
सं यच्छति जगद्योनेः काल मासाद्य शाश्वतम् ।
स यायात् सुसितद्वीपं तत्रास्ते भगवानिव ॥ ३६० ॥

स्नानोपभोगमन्त्रार्थं सत्पुष्पेन्द्रन्तु गागणम् ।
समर्चयित्वा देवेशं वैष्णवं प्रतिपादयेत् ॥ १ ॥
सोचिरा न्मुक्तदोषस्तु विष्णुलोकं प्रयाति च ।
गजं रथं वराश्वं च दीपस्थालीं सुलक्षणाम् ॥ २ ॥
व्यजनं चामरं छत्रं वादित्रं गणिकागणम् ।
शुभवस्त्राणिनेत्राणि दिव्यान्याभरणानिच ॥ ३ ॥
वितानंवैजयन्तींच चित्रपत्रलतागणम् ।
सुस्वरामुपघण्टाश्च धूपस्थालींसुलक्षणाम् ॥ ४ ॥
भृंगारंदर्पणंतोयकुम्भंगन्धोपलंमदत् ।
पूर्वोद्दिष्टानिचान्यानि धान्यानिविविधानिच ॥ ५ ॥
योददातिहरेर्भक्त्या सतल्लोकमवाप्नुयात् ।
ईक्षमाणंविभोर्वक्त्रं वहन्तंदीपभाजनम् ॥ ६ ॥
महान्तमथवादीपं यन्त्रंकूर्मादिरूपधृत् ।
शरयष्ठासनस्थंच चित्रसम्पुटभूषितम् ॥ ७ ॥
सच्छास्त्रपीठंविविधं श्रद्धयायोमहामते ।
ददातिदेवदेवस्य सतत्स्थानंप्रयातिच ॥ ८ ॥
पुरस्कृत्यजगद्योनिं यथतभक्त्याप्रदीयते ।
तदाराधनसक्तानां तत्तदक्षय्यतामियात् ॥ ९ ॥
इतिसम्बोधिताविप्रा लोकधर्मव्यवस्थिताः ।
लांगलीबिवदेवेन सर्वानुग्रहकाम्यया ॥ ३७० ॥
मयाप्राप्तंजगद्धातुः प्रसादान्मोक्षसिद्धये ।
यथावदद्यसर्वेषा मग्रतःप्रकटीकृतम् ॥ १ ॥
परम्पापहरम्पुण्यं पावनंसिद्धिभूतिदम् ।
इदंभव्याशयानांच वक्तव्यंभावितात्मनाम् ॥ २ ॥
भक्तानामप्रमत्तानां पुण्डरीकाक्षसेविनाम् ।
गोपनीयमभक्तानां वाक्छलादिरतात्मनाम् ॥ ३ ॥

अन्यायेनोपसन्नानां नास्तिकानांविशेषतः ।
योगोपायत्ययोग्यानां योग्यानांसम्प्रयच्छति ॥ ४ ॥
इममर्थंसमान्योमे स्वस्तिवोस्तुव्रजाम्यहम् ॥ ३७५ ॥

इति श्रीपाञ्चरात्रे श्रीसात्वतसंहितायाम्
प्रतिष्ठादिविधि नाम
पंचविंशः परिच्छेदः ॥ २५ ॥

समाप्ता च सात्वतसंहिता ।